एकादशपत्रे १४८ ११

आरंभः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी

ॐ श्रीगणेशाय नमः ॥ ॐ श्रीगुरुचरणपादकमलेभ्यो नमः ॥ ॐ विजयंते परानंदकृष्णपादरजोंबु
जाः ॥ याभृतानम्रशिरसां जायंते महेंद्रादिमहास्रजः ॥ उक्तैकविंशदध्यायैर्मुक्तिरेकादशे ततः ॥ ज्ञाप्यते त्रिंशता
सार्धैः समासव्यासरूपतः ॥ २ ॥ नारदो वसुदेवाय समासेन न्यवर्णयत् ॥ भगवानुद्धवायाथ विस्तरेणाध्या
यत्रिभिः ॥ तत्र तु प्रथमेध्याये यदुवंशस्य संक्षयः ॥ उक्तो विरागाय मौसलव्यपदेशतः ॥ प्रवृत्तिनः परानं
दकृष्णस्य क्रीडानुवर्णिता ॥ तन्निवृत्त्या परानंदपदारोहो नुवर्ण्यते ॥ ४ ॥ एवं तावद्दशमस्कंधे भूभारावतारणाय
यदुवं भा स्कं ११ निजविभूतिविभूषितं यदुवंशावतारितसकलसुरांशस्य भगवतः ॥ श्रीकृष्णस्य तदुचितप्रवृत्तिनद्धिउववनंत

कुलस्य संहारस्य गणोपरेषामाने टकारकं क्रीडानिरूपितास्त्रयेत्
दोनी सुपरमित्योगमायावैभव स्य भक्तानामात्मतत्त्वोपदेशस्त्वे
कं क्रीडार्थं भूतले अवतारितानां या पिकादिगणस्य राशनो मौसल
व्यपदेशेन तत्र दधिकारपदप्राप कस्त्वं केवलस्याद्युत्थहायनिः
श्रेयसपदारोहो निरूप्यते ॥ तत्र कृतत्रयायाथ विरक्तस्य वस्टे
वस्य कर्मणा कर्मनिर्हाराय यथास्था न्नस्तिद्युतनात्यंवकर्मयोगाथ्
वृत्तो नारदादिभिः कर्मयोगो निरूपितः ॥ कर्मणा कर्मनिर्हार एव साधु निरूपितः ॥ यदुक्तं याज्ञवल्क्येन स्मृ
तेन्येन तत्स्वरूप इत्यादिना तेन च विशुद्धसत्त्वस्य श्रीकृष्णरामौ परमेश्वरत्वेन ताभ्यां ततः ॥ कृष्णं मेनिय नाथा
ये श्रीकृष्णेनात्मतत्त्वमुपदिष्टं वसुदेवः ॥ समवेनाप्यनेन नितेतद्रुपमनन्यहं ॥ यतः पुत्रान्समुद्दिश्य तत्तयाम उ
द्वाप्यतः ॥ इत्यादिना तद्विषयभोगातिप्रायेन पुनस्तिरोहितमासीत् ॥ तदेवेदानीं नारदमुखेन प्रथ
मे पंचाध्याये निरूप्यते ॥ तत्र प्रथमेध्याये वैराग्योत्पादनाय यदुकुलस्य ब्रह्मशापापदेशेनात्यंत्रन विष
यस्वत्वानामप्यनित्यता प्रतिपाद्यते ॥ ततः चतुर्भिर्निमिजायनेयसंवादेन सपरिकरपरमतत्त्वनिरूप
णं ततः षष्ठे भगवदुद्धवसंवादप्रस्तावः ॥ ततः त्रयोविंशत्या उद्धवं प्रति भगवस्तत्त्वनिरूपणं ॥ ५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततो द्वाभ्यां मौषलक्रीडे तेषामेकत्रिंशताध्यायैरेकादशस्कंधस्य प्रवृत्तिस्तस्य च यथामति व्याख्यानमारभ्यते तत्र मौस
लप्रसंगार्थं स्कंधार्थमनुवदति श्लोकद्वयेन कृत्वेति ॥ अवतारयदित्यडागमो ऽकृष्टव्यं जविष्ठं वेगवत्तरं अतिशीघ्रं हिंस
सापर्यवसायिनमित्यर्थः ॥ कलिं कलहं प्रसिद्धं तत्र ॥ १ ॥ एतदेव स्पष्टयति ये कोपिता इति सपत्नैर्दुर्योधनादिभिः
कोपिताः कोपं कारिताः सुबहु यथा भवति तथा बहुवारानित्यर्थः ॥ तदेवाह दुर्द्यूत हेलन कचग्रहणादिभिरि
ति दुर्द्यूतं कपटद्यूतं हेलनमवज्ञा कचग्रहणं द्रौपद्याः केशाकर्षणमेतानि आदिर्येषां गरदानजतु
गृहदाहादीनां तैर्हेतुभिर्ये कोपिताः । तान् पाण्डुसुतान्निमित्तं कृत्वा इतरेतरतः उभयोः पक्षयोः समेतान् मिलितान्नृ

श्रीबादरायणिरुवाच ॥ कृत्वा दैत्यवधं कृष्णः सरामो यदुभिर्वृतः ॥ भुवोऽवतारयद्भारं जविष्ठं जन
यन्कलिम् ॥ १ ॥ ये कोपिताः सुबहु पांडुसुताः सपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान् ॥ कृत्वा
निमित्तमितरेतरतः समेतान्हत्वा नृपान्निरहरत्क्षितिभारमीशः ॥ १ ॥ ५२ ॥

पान्हत्वा क्षितेर्भारं निरहरत् अहारयद्वा ये कोपिता यैश्च कोपिताः तानितरेतरतः परस्परं निमित्तं कृत्वेत्यन्वयः
येतावत्प्रकट दैत्याः पूतनादयः तान्स्वयमेव हतवान् ये तु दैत्याः बांधवच्छद्मना स्थिताः । तान्परस्परं निमित्तं
विधाय हत्वा भूभारमपाहृतवानित्यर्थः ॥ अथ धूनात देवभूभारभूतराजसूतनासमागतभूपालदैत्यान्निबर्हणा
य स्वमायया प्रपंचविधानेनान्योन्यतः कलहं कुर्वाणाः स्वयं गच्छंतः जानंतीति स्वमहिमानमत्र अध्यायैर्नि तेन
रूपयति ॥ यदुक्तं गीतासु मम माया दुरत्ययेति तदेतदसौ परमेश्वरः क्षितेर्भारमपाहरत् ॥ २ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अपि च भूभारेत्यादि अन्यायभुवो भारभूताः राजपृतनाः सेनाः ॥ राज्ञां सैन्यानीति वा स्वबाहुभिर्गुप्तैः परि
रक्षितैर्यदूभिर्विवादादिकुलेन निरस्य दत्ता बाहुभिरिति बहुवचनेन वस्तुतश्च तद्भुजाभिप्रायेणानेकवद्
कुलमिव किंचिकीर्षितीति तात्वाकथं तस्मै कुलाय यादवानकुर्यादिति ॥ तत्राह ॥ अप्रमेयः प्रमातुमशक्यः किं
तामाह मन्य इति नन्वेतिवितर्के अप्रतं भूभुभारो यद्यपि लोकप्रतीत्यागतः ॥ तथाप्यहमगनुमेवमन्ये यद्य
स्मादविषह्यं सोढुमशक्यं यादवकुलमिति अनेन स्वबलात्वं दहननुमन्यवितमितिविनितं ॥ २ ॥ तर्हीदं
दृमन्यैर्वा स्यात्तात्राह नैवेति अन्यतः देवादिभ्योऽस्य यदवकुलस्य परिभवः तिरस्कारो न भवेत् ॥ अतः

भूभारराजपृतना यदुभिर्निरस्य गुप्तैः स्वबाहुभिरचिंतयदप्रमेयः ॥ मन्येऽवनेर्ननु गतोऽप्य
गतं हि भारं यद्यादवं कुलमहो विष एमास्ते ॥ २ ॥ नैवान्यतः परिभवोऽस्य भवेत्कथंचिन्
मत्संश्रयस्य विभवोन्नहनस्य नित्यं ॥ अंतः कलिं यदुकुलस्य विधाय वेणुस्तंबस्य वह्निमिव
शांतिमुपैमि धाम ॥ ३ ॥ ॥ राम ॥ ॥

विभवोन्नह ... २

मत्संश्रयस्य मां संश्रयन इति मत्संश्रयं कुलं तस्य किंच नित्यं विभवोन्नहनस्य विभवैर्गजतुरंगादिभिरुद्धं
उल्लस्य यद्वा तर्हीदं किमिति सिद्धं तस्येत्तत्राह न स्यादिति तस्मादेवं करिष्यामीत्याह ॥ अंतः कलिमिति शांतिमुपशममुपैमि वर्तमानसामीप्ये वर्तमानवद्वा उपैष्यामि तदनंतरं धाम च वैकुंठाख्यमुपैष्यामीत्यर्थं म
नसि विधाय मायाप्रपंचं विधाय विस्तार्य वेणुस्तंबस्य वेणुकांडस्य वह्निमिव तितवैवेचकारे इत्यर्थः ॥ तदेव
वप्रअमेयप्रकटीकरोति अत्र शांतमितिवा पाठः ॥ ॥ राम ॥ ३ ॥ राम ॥ राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं व्यवसित इत्यादिना कथयति ॥ व्यवसितः कृतनिश्चयः संजातवान् ॥ तदेवं अवतारप्रयोजनं संक्षेपात्
यत्स्वलोकं जगाम तेत्याह ॥ श्लोकद्वयेन स्वम् इति लोकानां लावण्यनिर्मितौ ॥ स्वागोप्य यथा मयेदं लोके
पुंलावण्यं नास्तीत्यर्थः ॥ यद्वा लोकेभ्यो लावण्यस्य विनिर्मितिः दानं यतः ॥ यत्स्वपदेके लोकपाललावण्य
वेत्ता भवतीत्यर्थः ॥ तथा स्वम् इत्यादि लोचनमाक्षिप्य आहृत्य ॥ ततो न्यस्यावलोकने लोचनस्या

एवं व्यवसितो राजन् न्यस्य संकल्पम् ईश्वरः ॥ शापव्याजेन विप्राणां संजज्ञे स्वकुले विभुः ॥ ५ ॥ स्वम्
स्वलोकलावण्यनिर्मुक्त्या लोचनेन्द्रियाणां ॥ गीर्भिः ताः स्मरतां चित्तं पदैस्तानीक्षितां क्रियाः
८ ॥ आछिद्य कीर्तिं सुश्लोकां वितत्य ह्यंजसा नु कौ ॥ तमोऽनया तरिष्यतीत्यगात्स्वं पदमीश्वरः

॥ ७ ॥

प्रवृत्तेः तथा स्व गीर्भिः ता गिरः स्मरतां चित्तं वा छिद्य तथा पदैः तत्र तत्रांकितैः ॥ तानि पदानीक्षतां
ईक्षमाणानां अन्यतो गमनादिकाः ॥ क्रियश्चाछिद्य तदानीन्तनानां सर्वेषां चक्षुरादि प्रवृत्तीः ॥ कनि
ष्टाः कृत्वेत्यर्थः ॥ किं वा इतउपरिजनिष्यमाणानां संसारतरणाय कौ महीलोके शोभनाः श्लोका यस्यां तां स्व
कीर्तिं वितत्य विस्तार्य अनया कीर्त्या अंजसा सुखेनैव जनो निश्चितं तरिष्यतीति प्रेत्येश्वरः स्वपदं स्यानं
भि

ममाहिति ७॥

स्वै २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ ए॰ टी॰ ११ अ

ब्रह्मण्येभ्य उदारेभ्यो वा अप्रसेवकेभ्यो वा विप्राः ॥ कुप्यन्ति ब्रह्मण्यस्तु न तथेत्याह ॥ किंच कोपे जाते ऽपि कृष्णचेतसां कथमभूत्कथं प्राभूदित्यर्थः ॥ अतः स्पष्टस्य निमित्तस्याभावात् ॥ निमित्तान्तरेण स्यादिति ॥ यन्निमित्त इति एकात्मनां एकचित्तानां कथं भेदः कलहः ॥ ईश्वरेच्छैवात्र निमित्तमिति परिहरति ॥ बिभ्रदिति सकलानां सुन्दरवस्तूनां संनिवेशो विन्यासविशेषो यस्मिंस्तत् ॥ वपुर्बिभ्रत् ॥ तर्हि किमिति सौन्दर्यादिविपूर्वः ॥ नस्तु मंगलं कर्माचरत्

श्रीराजोवाच ॥ ब्रह्मण्यानां वदन्यानां नित्यं वृद्धोपसेविनां ॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचेतसां । ८ ॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ९

शुक उवाच ॥ बिभ्रद्वपुः सकलसुन्दरसन्निवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः ॥ आस्थाय धाम रममाण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥ १० ॥

काम ३

तत्किं कयापि कामनया न आप्तकामतया न आप्तकामः ॥ तर्हि किमिति कर्माचरति ॥ धाम द्वारवत्याख्यं गृहमास्थाय रममाणः ॥ गृहे रममाणानि गृहस्थानां कर्म ग्राहयितुमित्यर्थः ॥ ननु किमान्तस्य गृहस्थाकर्म भिवा नेत्याह उदारकीर्तिः ॥ बहुफलप्रदा कीर्तिर्वितानार्थमित्यर्थः ॥ एवं परमैश्वर्येण वर्तमान एव कुलं संहर्तुमैच्छत ॥ तत्कस्य हेतोः स्थितः कृत्ये भूभारहरणे शेषो यस्य सः ॥ १० ॥ ॥ राम॰ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईश्वरेच्छयोत्थिते ब्रह्मशापं निमित्तं कृत्वा वक्तुमाह ॥ कर्माणीति कर्मार्थमाहूताः कर्माणि कृत्वा निसृष्टा मुन
यः तपोधनाः पिंडारकं समगमन्नित्यन्वयः निसृष्टाः प्रस्थापिताः पूर्वोक्तामुदारकीर्तितां विवृण्वन् कर्माणि ।
विशिनष्टि पुण्यनिवहानीत्यादिभिः त्रिभिः पदैः कानिचिदश्वमेधादिकर्माणि पुण्यमेव जनयंति ॥ पुत्रोत्पा
दनादीनि तत्कालसुखमेव कुर्वंति ॥ प्रायश्चित्तादीनि तु पापमेव हरंति एतानि तु सर्वं सुखानीत्याह ॥ पुण्यनि
वहानि कीर्तनादिना पुण्यानि निवहंति प्रापयंतीति तथा सुमंगलानि प्रतिसुखात्मकानि गायतो जगतः

कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा ॥ कालात्मना निवस
ता यदुदेवगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ॥ ११ ॥ विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगि
सि॰ राः कश्यपो वामदेवोत्रिर्वसिष्ठो नारदादयः ॥ १२ ॥ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः ॥ उपसं
गृह्य पप्रच्छुरविनीता विनीतवत् ॥ १३ ॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतं ॥ कृत्वोदरं च मु
हहस्ताग्रे ययुर्यदुनंदनाः ॥ १४ ॥ पप्रच्छुः कृतिनो विप्रा अंतर्वत्न्यसितेक्षणा ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रू
तामोघदर्शनाः ॥ प्रसोष्यंती पुत्रकामा किंस्वित्संजनयिष्यति ॥ १५ ॥ ॥

कलिमलापहराणि कृत्वा मुक्तिप्रस्थापनेनेहेतुः कालात्मना संहारकरूपेण वसुदेवगेहे निवसता स्वकुलं सं
जिहीर्षतेत्यर्थः ॥ पिंडारकं नाम तीर्थविशेषं ॥ ११ ॥ उपसंगृह्य पादग्रहणं कृत्वा ॥ १३ ॥ प्रश्नप्रकारमाह द्व
वे॰ येन ते षयित्वेति ॥ १४ ॥ हे अमोघदर्शना विप्राः एषा अंतर्वत्नी गर्भिणी वः पृच्छति साक्षात्प्रष्टुं विलज्जमाना अप्रस
त्वेन एवं तिप्रसोष्यंती आसन्नप्रसवा किंस्वित्संजनयिष्यति कन्यां वा पुत्रं वा न तत्प्रब्रूत ॥ १५ ॥ ॥ ॥

श्री. भा. पु. टी. ७

प्रलब्धाः वंचिताः ॥ १५ ॥ तस्मिन्नुदरे यस्माद्यल्लोहमयं ॥ १६ ॥ मद्भाग्येयस्माभिः किमेतत्कृतं नः अस्माकं किं वदिष्यं
तीति विह्वलिताः संतो मुसलमादाय गेहान्ययुः ॥ १७ ॥ राज्ञे उग्रसेनायनत्तु श्रीकृष्णाय ॥ १८ ॥ ॥ १९ ॥ श्वाफल्कः उग्र
सेनः ॥ सोपि वसुदेवसहितः ॥ श्रीकृष्णमपृष्ट्वैव ग्रासस्य न्वदिशवान ॥ २० ॥ अस्य मुसलस्य चूर्णीक्रियमाणस्यावशे

एवं प्रलब्धामुनयस्तावद्वृषः कुपितान्नृप ॥ ननयिष्यति वो मंदा मुसलं कुलनाशनं ॥ १५ ॥ तच्छ्रुत्वा ते नि
संत्रस्ता विस्मयमहर्षमोदनं ॥ सोचस्वदृष्टुः तस्मिन्मुसुलं स्वल्लयमश्वयं ॥ १६ ॥ किंकृतं नं मंदभाग्यैर्नः किं
वदिष्यंति नो जनाः ॥ इति विह्वलिता मोहान्नादायमुसुलं ययुः ॥ १७ ॥ तच्चोपनीय सदसि यविम्लानमुख
श्रियः ॥ राज्ञः श्रावयदयावक्रुः सर्वयादवसन्निधौ ॥ १८ ॥ श्रुत्वा मोघं विप्रशापं दृष्ट्वा च मुसलं नृप ॥ विस्मि
ताभयसंत्रस्ता बभूवुर्द्वारकौकसः ॥ १९ ॥ तच्चूर्णयित्वा मुसलं यदुराजः स आहुकः ॥ समुद्रसलि
ले प्रास्यल्लोहं चास्यावशेषितं ॥ कश्चिन्मत्स्यो ग्रसील्लोहं चूर्णानि तरलैस्ततः ॥ उह्यमानानि वेला
यां लग्नान्यासन्किलैरकाः ॥ २० ॥ मत्स्यो गृहीतो मत्स्यघ्नैः जालेनान्यैः सहार्णवे ॥ तस्योदरगतं लो
हं स शल्ये लुब्धकोकरोत् ॥ २१ ॥ भगवान् ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा ॥ कर्तुं नैच्छद्विप्रशापं का
लरूप्यन्वमोदत ॥ २२ ॥ इति एकादशे प्रथमः ॥ १

॥ ॥ ॥

षितं लोहं च प्रास्यत वेलेः तरंगैः ॥ २३ ॥ एरकाः प्रसिद्धतृणविशेषाः ॥ अन्यैर्मत्स्यैः सह शल्ये ॥ शराग्रे ॥ २४ ॥ ज्ञा
ताः सर्वे ह्यर्था येन सः ईश्वरोपि समर्थोपि सन् अन्यथा कर्तुं नैच्छत ॥ किं चान्वमोदत यतः कालरूपी ॥ २५ ॥
इति श्रीएकादशे प्रथमोध्यायः ॥ १ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्वितीयेनिमिजायंतसंवादेनाहनारदः॥ धर्मान्भागवतान्मह्यंब्रूयावसुदेवायपृच्छते॥ श्रुभीत्वांप्रस्थापितोऽ
पिपुनः पुनरवात्सीदित्यर्थः॥ ननुनारदस्यदक्षादिशापात्रैकत्रवासः संभवतिइत्याशंक्याह॥ गोविंदभुज
गुप्तायामिति॥ नतस्याशापादेः प्रभावइत्यर्थः॥ कृष्णोपासनेलालसाउत्कंठायस्यसः॥ पुंजनेषु
क्तानामपीदृशामौत्सुक्यंतत्कोनुनामभजेदित्याह॥ कोन्विति इंद्रियानितिइंद्रियवत्त्वमात्रमेवयत्रार्थ
कारिविशेषणमित्यर्थः॥ सर्वतः सर्वत्रापिलोकेपुमर्त्यस्यसः॥ २॥ यद्यापित्रोर्यात्राआगमनेअपत्या

श्रुकउवाच॥ गोविंदभुजगुप्तायांद्वार्वत्यांकुरूद्वह॥ अवात्सीन्नारदोभीक्ष्णंकृष्णोपासनला
लसः॥ १॥ कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजं॥ नभजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः॥ २
तमेकदानदेवर्षिंवसुदेवोगृहागतं॥ अर्चितंसुखमासीनमभिवाद्येदमब्रवीत्॥ ३॥ वसुदे
व उवाच भगवन्भवतोयात्रास्वस्तयेसर्वदेहिनां॥ कृपणानांयथापित्रोरुत्तमश्लोकवर्त्मनां॥ ४॥ भूता
नांदेवचरितंदुःखायचसुखायच॥ सुखायैवहिभूतानांत्वादृशामच्युतात्मनां॥ ५॥ भजंतिये
यथादेवान्देवाअपितथैवतान्॥ छायेवकर्मसचिवाःसाधवोदीनवत्सलाः॥ ६॥ ॥

नांस्वस्तयेमंगलायकृपणानामुत्तमश्लोकस्यवर्त्मभूतानांमहतांयात्राकृपणानांस्वस्तयेतथाभगवद्
पस्यभवतोयात्रासर्वदेहिनांस्वस्तयेइति॥ ४॥ देवैरपिमहतामुपमानमनुचितमित्याह देवानांचरित
अदृष्टादिनाभूतानांदुःखायापिभवतित्वादृशांतुयासहस्रेणनामच्युतेआत्मायेषांतेषांकिंचसर्वज्ञ
वत्तोपिदेवाभजनानुसारेणफलंददतितथासाधवइत्याह भजंतीतिछायेवयथापुरुषोयावत्करोतिता
वदेवनस्यछायापितथाकर्मसचिवाःकर्मसहायाः॥ ॥ ॥ ६ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ ग॰
प॰ टी॰
५

नदेवंयद्यपिभवतञ्चागमनमात्रेणैववयंकृतार्थाः॥ तथापिएकाकामः नवेतितवयैर्धर्मैः प्रसन्नोभगवान्‌ता
निसर्थः॥ ७॥ ननुतन्नोपिकिमन्योभगवत्प्रसादपात्रमस्तितत्राह॥ अहंकिलेतिभुविप्रजार्थोऽपूजयम्
पुत्रलाभप्रयोजनेनः सन्पूजितवान्‌किलेति॥ मुक्तीगदेभगवदनंतंवचनंअनुस्मरतिअतोयथावयंम्
च्येमहितथानोस्मान्‌शाधिशिक्षयेत्यर्थः॥ ॥ विचित्राणिव्यसनानि यस्मिन्‌तस्मात्‌संसारात्‌
तथाविश्वतः सर्वतोभयंयस्मिन्‌भवद्भिर्हेतुभूतैः अंजसाअनायासेनअद्धासाक्षात्‌॥ निश्चयेनच॥ अद्धा५

त्रिमिस्तथापिएकाकामोधर्मान्भागवतांस्तव॥ यानश्रुत्वाश्रद्धयामर्त्योमुच्यतेसर्वतोभयात्‌
७॥ अहंकिलपुरानंतंप्रजार्थोभुविमुक्तिदं॥ अपूजयंनमोक्षायमोहितोदेवमायया॥ ८॥
यथाविचित्रव्यसनाद्भवद्भिर्विश्वतोभयात्‌॥ मुच्येमह्यंजसैवद्धातथानःशाधिसुव्रत॥ ९॥
श्रीशुकउवाच॥ राजन्नेवंकृतप्रश्नोवसुदेवेनधीमता॥ प्रीतस्तमाहदेवर्षिर्हरेः संस्मारितोगुणैः १०
नारदउवाच॥ सम्यगेतद्व्यवसितंभवतासात्वतर्षभ॥ यत्पृच्छसेभागवतान्धर्मांस्त्वंविश्वभा
वनान्‌॥ ११॥ श्रुतोनुपठितोध्यातआदृतोवानुमोदितः॥ सद्यः पुनातिसद्धर्मोदेवविश्वद्रुहो
पिहि॥ १२॥ ॥

हरेर्गुणैर्वर्णनीयतेनप्रस्तुतैः प्रारब्धैःहरिःसंस्मारितइत्यर्थः॥ १०॥ प्रीतिमाविष्करोतिसम्यगिति
त्रिभिः॥ पृच्छसेपृच्छसिविश्वभावनान्‌सर्वशोधकान्‌॥ ११॥ आदृतः आस्तिकेनगृहीतः अनुमो
दितः परैः क्रियमाणः सेव्यतः सद्धर्मोभागवतोधर्मः देवद्रुहेवस्यदेवेत्यर्थः॥ यद्वादेवेभ्योविश्वस्मै
चद्रुह्यंतियेतानपि॥ १२॥ रामायनमः ॥ राम ॥ ॥ राम ॥ राम॰
५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच त्वया मम त्वमुपकारः कृत इत्याह त्वयेति पुण्ये श्रवणकीर्तने यस्य सः ॥ १२ ॥ अत्रापि भगवद्धर्मनिर्णये पि विदे-
हस्य जनकस्य ॥ १४ ॥ आर्षभाणमृत्यत्रिंसान्वयां विविच्य कथयति सप्तभिः प्रियव्रत इति ॥ १५ ॥ मोक्षधर्मं विवक्ष-
या मोक्षधर्माणां वक्तुमिच्छया तया ॥ अवतरणमवतारः ॥ अवतीर्णं वासुदेवांशमित्याहुः ॥ तस्य च वेदपारगं सुत-
शतमासीत ॥ १६ ॥ तेषामृषभसुतानां मध्ये नव योगेश्वराणां चरितं वक्तुं रतनेषां चरितं ततो विविच्याह ॥ तेषामि-
ति एतत ॥ अजनाभं नाम वर्षं यस्य नाम्ना भारतमित्यद्भुतं विख्यातमासीत ॥ एतेन तस्य धर्मातिरेको निरूपितः ॥ १७

त्वया परमकल्याणः पुण्यश्रवणकीर्तनः ॥ स्मारितो भगवानद्य देवो नारायणो मम ॥ १२ ॥ अत्राप्युदा-
हरंतीममितिहासं पुरातनं ॥ आर्षभाणां च संवादं विदेहस्य महात्मनः ॥ १४ ॥ प्रियव्रतो नाम सुतो मनोः
स्वायंभुवस्य यः ॥ तस्याग्नीध्रः ततो नाभिः ऋषभस्तत्सुतः स्मृतः ॥ १५ ॥ तमाहुर्वासुदेवांशं मोक्षधर्मविव-
क्षया ॥ अवतीर्णं सुतशतं तस्यासीद्ब्रह्मपारगं ॥ १६ ॥ तेषां वै भरतो ज्येष्ठो नारायणपरायणः ॥ विख्यातं व-
र्षमेतद्यन्नाम्ना भारतमद्भुतं ॥ १७ ॥ स भुक्तभोगां त्यक्त्वेमां निर्गतः तपसा हरिं ॥ उपासीनस्तत्पदवीं लेभे
वै जन्मभिस्त्रिभिः ॥ १८ ॥ तेषां नव नवद्वीपपतयो स्य समंततः ॥ कर्मतंत्रप्रणेतार एकाशीतिर्द्विजातयः ॥
नवाभवन्महाभागा मुनयो ह्यर्थशंसिनः ॥ श्रमणा वातरशना आत्मविद्याविशारदाः ॥ २० ॥ ॥ ॥

रमां पृथ्वीं त्यक्त्वा निर्गतः हरिं उपासीनः सेवमानः सन् ॥ १८ ॥ नव सुताः नवद्वीपपतयः नवानां ब्रह्मावर्तादिष्वण्डा-
नां पतयः अस्य भारतवर्षस्य एकाशीतिः सुताः कर्ममार्गप्रवर्तकाः ब्राह्मणा अभूवन् ॥ १९ ॥ अर्थशंसिनः परमा-
र्थनिरूपकाः श्रमणाः श्रमवंतः ॥ आत्माभ्यासे कृतश्रमा इत्यर्थः ॥ वातरशना दिगंबराः ॥ आत्मविद्यायां विशा-
रदाः निष्णाताः ॥ २० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग.
ए. टी.
९

तेषांनामान्याह॥ द्वाभ्यां नव तत्र इति॥ भगवद्रूपं विश्वं पश्यंतः॥ सदसदात्मके स्थूलसूक्ष्मरूपे तच्च
सर्वमात्मनोऽव्यतिरेकेण पश्यंतो॥२२॥ अव्याहता अप्रतिहता इष्टा अभिप्रेता गतिर्येषां ते सुरज्ञा अनासक्ताः॥२३॥ महा
त्मनो निमेर्वितायमानं अनुष्ठीयमानं अजनाभे भारतवर्षे॥२४॥ यजमानो निमिः अग्नयः आहवनीयादयः

कविर्हविरंतरिक्षः प्रबुद्धः पिप्पलायनः॥ आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः॥२१॥ त एते
भगवद्रूपं विश्वं सदसदात्मकं॥ आत्मनोऽव्यतिरेकेण पश्यंतो व्यचरन्महीं॥२२॥ अव्याहतेष्ट
गतयः सुरसिद्धसाध्यगंधर्वयक्षनरकिन्नरनागलोकान्॥ मुक्ताश्चरंति मुनिचारणभूतनाथ
विद्याधरद्विजगवां भुवनानि कामं॥२३॥ त एकदा निमेः सत्रमुपजग्मुर्यदृच्छया॥ वितायमानमृषिभिरजनाभे महात्मनः॥२४॥ तान्दृष्ट्वा सूर्यसंकाशान्महाभागवतान्नृप॥ यजमा
नोऽग्नयो विप्राः सर्व एवोपतस्थिरे॥ विदेहस्तानभिप्रेत्य नारायणपरायणान्॥ प्रीतः संपूज
यांचक्रे आसनस्थान्यथार्हतः॥२५॥ तान्रोचमानान्स्वरुचा ब्रह्मपुत्रोपमान्नव॥ पप्रच्छ परमप्रीतः
प्रश्रयावनतो नृपः॥ विदेह उवाच॥ मन्ये भगवतः साक्षात्पार्षदान्वो मधुद्विषः॥ विष्णोर्भूतानि लोका
नां पावनाय चरंति हि॥२६॥

२५ अभिप्रेत्य ज्ञात्वा॥२६॥ स्वरुचा स्वरोचमानान्॥ नवाभवन्नादि प्रकाशैः ब्रह्मपुत्रोपमान्॥ सनत्कुमारा
दिसदृशान्॥ परमप्रीत्या॥ २७॥ तद्दर्शनं समभिनंदति द्वाभ्यां मन्य इति ननु भगवतः पार्षदादीनां कथं
मत्तोऽपलब्धिः॥ तत्राह॥ विष्णोरिति॥ विष्णुभक्ता लोकपावनार्थं॥ सर्वत्र पर्यटंतीत्यर्थः॥२८॥ गुरु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म याउुर्लभं लब्ध्वमहोभाग्यमित्याह ॥ दुर्लभ इति ॥ बहवो देहाभवंति येषां ते देहिनो जीवास्तेषां क्षणभंगुरोपि ॥
मानुषो देहो दुर्लभः ॥ परमपुरुषार्थसाधनत्वात् ॥ वैकुंठः प्रियो येषां वैकुंठस्य वा प्रियास्तेषां दर्शनं ॥ २९ ॥ हे अनघाः
निरवद्याः भवतः युष्मानात्यंतिकं क्षेमं पृच्छामः ॥ यतः क्षणार्द्धकालभवोऽपि सत्संगः शेवधिः निधिः निखिलाभे
यद्यानंदो भवति तथा परमानंदप्रत्यर्थः ॥ ३० ॥ तदर्थं च भागवतान् धर्मान् ब्रूत यदि नोऽस्माकं श्रुतये श्रवणाय क्षमं

दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः ॥ तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनं ॥ अत आत्यंतिकं क्षेमं
पृच्छामो भवतो नघाः ॥ संसारेस्मिन् क्षणार्द्धोपि सत्संगः शेवधिर्नृणां ॥ ३० ॥ धर्मान् भागवतान् ब्रूत यदि नः श्रु
तये क्षमं ॥ यैः प्रसन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः ॥ ३१ ॥ नारद उवाच ॥ एवं ते निमिनापृष्टा वसुदेव
महत्तमाः ॥ प्रतिपूज्याब्रुवन्प्रीत्या ससदस्यर्त्विजं नृपं ॥ ३२ ॥ ॥

योग्यं भवति ॥ कथंभूतान् यैर्धर्मैः ॥ प्रपन्नाय भक्ताय अजो हरिः ॥ आत्मानमपि दास्यति तान् ॥ ३१ ॥ सह सदस्यैर्ऋत्वि
ग्भिश्च वर्तमानं ते पि भगवद्धर्मश्रवणपरा बभूवुरित्याह ॥ भगवद्धर्मे तद्भक्तमायान् नरदर्णनिच ॥ वृषभकर्मावता
रेहाभक्त्या प्राप्य पुण्यं क्रमात् ॥ ज्ञातं क्रमेण कृतवान्नव प्रश्नान्निमिर्नृप ॥ एकैकस्योत्तरं प्रोचुः कविमुख्या मुनीश्वरा
ः ॥ ॥ ॥

श्री. भाग. प्रदी. ७

अथात्यंतिकं क्षेमं कथयन्ति मन्य इति न कुतश्चिद्भयं यस्मात्तदकुतोभयं ॥ अत्र संसारेऽसदात्मभावा
त् असति देहादावात्मभावनायाः अतः नित्यं सर्वदा उद्विग्नबुद्धेः विश्वात्मना सर्वथा निःश्रेयसत्वपदांबुजो
पासने भीर्निवर्तते तत् ॥ ३३ ॥ भागवतधर्मलक्षणमाह ॥ ये वै इति मन्वादिस्मृतिवन्न वर्णाश्रमादिधर्मा अत्र
कीर्तिता विद्वत्स्वपि सुखेनैव भगवता विदुषामपि पुंसां अंजः सुखेनैवात्मलब्धये ये ये उपायाः प्रोक्ताः
तान् भागवतधर्मान् विद्धि ॥ ३४ ॥ अंजः पदेनोक्तं सुकरत्वं विवृणोति यानिति ॥ यानास्थायाश्रित्य ये धर्मा

कविरुवाच ॥ मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमत्र नित्यं ॥ उद्विग्नबुद्धेरसदात्म
भावाद्विश्वात्मना यत्र निवर्तते भीः ॥ ३३ ॥ ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये ॥ अंजः पुं
सामविदुषां विद्धि भागवतान् हि तान् ॥ ३४ ॥ यानास्थाय नरो राजन्न प्रमाद्येत कर्हिचित्
धावन्निमील्य वा नेत्रे न स्खलेन्न पतेदिह ॥ ३५ ॥ रामाय ॥ नमो नारायणाय ॥ ॥ ॥

दिषु न प्रमाद्येत विघ्नैर्न विहन्येत ॥ किंच निमील्य नेत्रे धावन्नपि इह एषु भागवतधर्मेषु न स्खलेत ॥ ।
निमीलनं नाम ज्ञानेनोपाहृतः ॥ श्रुतिस्मृती उभे नेत्रे विप्राणां परिकीर्तिते एकेन विकलः काणो द्वा
भ्यामंधः प्रकीर्तित इति स्मृतावपि तस्पर्थः ॥ यथा पदन्यासस्थानमतिक्रम्य शीघ्रं परतः पदन्यासेन
गतिर्धावनं तत् द्वयमपि किंचित् किंचित् विदितक्रमस्यापि शीघ्रमनुष्ठानेन धावनेन तथा च निष्ठन्नपि न स्खलेत
न स्वरूपविलयः स्यात् ॥ तथा न पतेत् फलान्न भ्रश्येत ॥ ३५ ॥ ॥ ॥ राम ॥ रामाय ॥ । राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु केते भागवता धर्माः ॥ ईश्वरार्पितानि सर्वकर्माण्यपीत्याह ॥ कायेनेति ॥ आत्मना चित्तेनाहंकारेण वानुसृ-
तो यः स्वभावस्तस्मात् ॥ अयमर्थः न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारि लौकिकमपीति ॥ तथा
च भगवद्गीतासु ॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति ॥ य-
द्वा ननु कायादीनामेव कर्म नात्मन इत्याशंक्याह ॥ अध्यासेनानुसृतान् ब्राह्मण्यादिस्वभावाद्यद्यत्करोत्य-
र्थः ॥ तत्सकलं परस्मै परमेश्वराय नारायणायेति समर्पयेत् ॥ तथा सति सकलमपि कर्म भागवतो धर्मो भव-
तीति भावः ॥ ३६ ॥ ननु किमेवं परमेश्वरभजनेन अज्ञानकल्पितभयस्य ज्ञानैकनिवर्त्यत्वादित्याशंक्याह ॥

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ॥ करोति यद्यत्सकलं परस्मै नारायणाये-
ति समर्पयेत्तत् ॥ ३६ ॥ भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ॥ तन्माययाऽ-
तो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेवतात्मा ॥ ३७ ॥ ॥

भयमिति यतो भयं तन्मायया भवेत् ॥ अतो बुधो बुद्धिमान् तमेवाभजेत् ननु भयं देहाभिनिवेशतो भवति स च
देहोऽहंकारतः ॥ स च स्वरूपास्फुरणात् किं तत्र तस्य माया करोतीत्यत आह ॥ ईशादपेतस्येति ईशाद्विमु-
खस्य तन्मायया अस्मृतिः ॥ भगवतः स्वरूपास्फूर्तिः ॥ ततो विपर्ययो देहोऽस्मीति ततो द्वितीयाभिनिवेशाद्भयं भ-
वतीत्येवं हि प्रसिद्धं लौकिकीष्वपि मायासूक्तं च भगवता ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामे-
व ये प्रपद्यन्ते मायामेतां तरन्ति ते इति ॥ एकयाव्यभिचारिण्या भक्त्या भजेत् ॥ किंच गुरुदेवतात्मा गुरुरेव देवता ई-
श्वर आत्मा प्रियश्च यस्य तथा दृष्टिः सन्नित्यर्थः ॥ ३७ ॥ ॥ राम ॥ राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग ११

ननु विषयविद्धमनसः कुतो व्यभिचारिणी भक्तिः संभवति कुतस्तरामभयं तत्र न न तावद्विषयो नाम वास्तवोऽस्ति किं
तु मनोविलासमात्रं अतो मनोनियमनेन भजनादभयं स्यादित्याह ॥ अविद्यमानोऽपीति द्वयो द्वैतप्रपंचः ध्यातुः प्र
मः धिया मनसा स्वप्नमनोरथवदवभासत इत्यर्थः तत्तस्मात्कर्माणि संकल्पयति विकल्पयति च यन्मनः ॥ तन्निरुंध्यात्
नियच्छेत् ॥ तत्र चैकया भक्त्या भजनादभयं स्यादित्यर्थः ॥ ३८ ॥ एतदेव नाशक्यमित्याशंक्यासंगमं [illegible] माह ॥ शृ
ण्वन्निति तदर्थकानि जन्मानि कर्माणि च रथांगपाणेर्यानि तानि एतान्यपि साकल्येन ज्ञातुमशक्यानीत्याशंक्याह ॥
यानि लोके गीतानि प्रसिद्धानि तानि निर्लज्जो गायंश्च विचरेत् असंगो निःस्पृहः ॥ ३९ ॥ एवं च भजतः संप्राप्तप्रेमल

अविद्यमानोऽप्यवभाति हि द्वयो ध्यातुर्धिया स्वप्नमनोरथौ यथा ॥ तत्कर्मसंकल्पविकल्पकं मनो बु
धो निरुंध्यादभयं ततः स्यात् ॥ ३८ ॥ शृण्वन्सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लोके गी
तानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसंगः ॥ ३९ ॥ एवंव्रतः स्वप्रियनामकीर्त्या जातानु
रागो द्रुतचित्त उच्चैः हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ४० ॥ ॥ ॥

क्षणाभक्तियोगस्य [illegible] धर्मस्य संसारधर्मातीतां गतिमाह ॥ एवमिति एवं व्रतं आचारो यस्य सः स्वप्रियस्य हरे
र्नामकीर्त्या जातोऽनुरागः प्रेम यस्य सः अत एव द्रुतचित्तः स्पष्टं हृदयः कदाचिद्भक्तपराजितं भगवंतमालक्ष्य क
लयंश्चोच्चैर्हसति ॥ एतावंतं कालमप्राप्य वंचितोऽस्मीति रोदिति ॥ अन्योऽन्यस्मात्कादोति क्रोशति हे हरे मामनुगृहाणेति
प्रतिहर्षेण गायति मिलितं जितमिति नृत्यति किं च ॥ भिक्षवत्यराग्रतिप्रकाशयितुं उन्मादवत् ग्रहगृहीत
वत् लोकबाह्यः विवशः ॥ ४० ॥ ॥ राम ॥

१६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंचखमितिसत्वानिभूतानिग्राकाशादीनि॥ यत्किंचिद्भूतमात्रंहरेःशरीरमितिमत्वाप्रणमेत्संभावनायांलि
ङ्॥४१॥ नन्वियमारूढयोगानामपिबहुजन्मभिर्दुर्लभाकथंनामकीर्तनमात्रेणैकस्मिन्नपिजन्मनिभवेदि
त्याशंक्यदृष्टांतमाह॥ भक्तिरिति॥ प्रपद्यमानस्यहरिंभजतःपुंसःभक्तिःप्रेमलक्षणापरेशानुभवःप्रेमा
स्पदभक्तवपुस्फूर्तिःतयानिर्वृत्तस्यततोन्यत्रगृहादिषुविरक्तिरित्येषत्रिकःएककालःभजनसमका
लएवस्यात्॥ यथाश्नतोभुंजानस्यतुष्टिःसुखंपुष्टिरुदरभरणंक्षुन्निवृत्तिश्चप्रतिग्रासंस्युःउपलक्षण

खंवायुमग्निंसलिलंमहींचज्योतींषिसत्वानिदिशोद्रुमादीन्॥सरित्समुद्रांश्चहरेःशरीरंयत्किं
चभूतंप्रणमेदनन्यः॥४१॥भक्तिःपरेशानुभवोविरक्तिरन्यत्रचैषत्रिककालः॥प्रपद्यमान
स्ययथाश्नतःस्युस्तुष्टिःपुष्टिःक्षुदपायोनुघासं॥४२॥इत्यच्युतांघ्रिंभजतोनुवृत्त्याभक्तिर्वि
रक्तिर्भगवत्प्रबोधः॥भवंतिवैभागवतस्यराजंस्ततःपरांशांतिमुपैतिसाक्षात्॥४३॥श्रीराजो
वाच॥ अथभागवतंब्रूतयद्धर्मोयादृशोनृणां॥यथाचरतियद्ब्रूतेयैर्लिंगैर्भगवत्प्रियः॥४४॥

मेतत्प्रतिक्षिप्तव्यमपियथास्युः तद्वत्एवमेकैकस्मिन्भजनेकिंचित्प्रेमादित्रिकेजायमानेनुवृत्त्यानिरं
तरंभजतःपरमप्रेमादिजायतेबहुग्रासभोजनेनइवपरमतुष्ट्यादिजायतेयथातद्वत्॥४२॥ततश्चभग
वत्प्रसादेनकृतार्थोभवतीत्याह॥ इत्यच्युतांघ्रिमितिभागवतस्यभवंतीत्युक्तेतस्यलक्षणंपृच्छति॥४३
प्रयाति॥ यद्धर्मोयस्मिन्धर्मेपरिनिष्ठितःयादृशःयत्स्वभावः यथाचरतिवर्ततेभुंक्तेपिब्रूतेवायैश्च
लिंगैर्भगवतःप्रियोभवति॥४४॥ ॥रामायनमः॥

श्री॰ भा॰ ग॰ प॰ टी॰ ४

यद्रूपं तस्योत्तमत्वमाह ॥ अथेति सर्वभूतेष्विति ॥ आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं यः पश्येत् ॥ तथा ब्रह्म
रूपे आत्मन्यधिष्ठाने भूतानि यः पश्येत् ॥ यद्वा आततत्वात् स्वमातृत्वादात्मा हि परमो हरिरिति तं योक्तेः आत्म
नो हरेः सर्वभूतेष्वप्याकाशादिष्वपि नियंतृत्वेन वर्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत् न तु तन्न्यूनत
रतमं तथात्मनि हरावेव भूतानि च पश्येत् ॥ कथंभूते भगवति अप्रच्युतैश्वर्यादिरूपेण न पुनर्जन्म लिन
भूत्वा प्रयत्नेन जायादि प्रसक्त्यापेक्षैश्वर्यादि प्रच्युतिं पश्येत् स सर्वत्र परिपूर्णं भगवन्तं पश्यन् भागवतोत्तम

हविरुवाच ॥ सर्वभूतेषु यः पश्येत् भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥ ४५
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेम मैत्री कृपोपेक्षा यः करोति स मध्यमः ॥ ४६ ॥ अर्चायामे
व हरये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥ ४७ ॥ गृहीत्वापीन्द्रियैर
र्थान्यो न द्वेष्टि न हृष्यति ॥ विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः ॥ ४८ ॥ रामायनमः ॥

इत्यर्थः ॥ ४५ ॥ प्रेम च मैत्री च कृपा च उपेक्षा च ताः ॥ ईश्वरादिषु चतुर्षु यः करोति स मध्यमो भागवतः एवंभू
तस्य भेददर्शनात् ॥ ४६ ॥ अर्चायां प्रतिमायां पूजामीहते करोति न तद्भक्तेषु अन्येषु च सत्कारं न करोति
प्राकृतः प्रकृतिप्रारंभः अधुनैव प्रारब्धभक्तिः शनैः शनैरुत्तमो भविष्यतीत्यर्थः ॥ पुनरष्टभिः श्लोकैरु
भ्यर्हितत्वात् उत्तमभागवतस्यैव लक्षणान्याह गृहीत्वापीति श्रीवासुदेवाविष्टचित्तो न गृह्णाति ... दि
न्द्रियैरर्थान् गृहीत्वापीत्यपि शब्दार्थः ॥ इदं विश्वम् ॥ ४८ ॥ रामायनमः ॥ राम ॥

राम॰ ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच देहादीनां संसारधर्मैर्जन्माप्ययादिभिर्यो हरेः स्मृत्या विमुह्यमानः स भागवतप्रधानः तत्र देहस्य जन्मा
प्ययौ प्राणस्य क्षुत्पिपासे मनसो भयं बुद्धेस्तर्षः तथा इंद्रियाणां कृच्छ्रमिति ॥४९॥ न कामाद्यकर्माणि
च बीजानि च वासनाः तेषां वासुदेव एको निलय आश्रयो यस्य सः एतेन गृहीत्वापीत्यादि श्लोकत्रयेणाद्वे
षहर्षमोहकामादिरहितत्वं स्फुरतीति यथाचरतीत्यस्योत्तरमुक्तं ॥५०॥ यैर्लिंगैः भगवत्प्रिय इत्यस्योत्तर
माह न यस्येति जन्म कुलं कर्म तपआदि जातयः अनुलोमप्रतिलोमजाः मूर्धावसिक्तादयः अस्मिन्
देहे अहंकाररहितैः सत्कुलकर्मादिलिंगैर्हरेः प्रियो भवतीत्यर्थः ॥५१॥ वित्तेषु स्वीयपरकीयमिति आ

देहेंद्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानः स्मृत्या
हरेर्भागवतप्रधानः ॥४९॥ न कामकर्मबीजानां यस्य चेतसि संभवः ॥ वासुदेवैकनिलयः स
वै भागवतोत्तमः ॥५०॥ न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ॥ सज्जतेस्मिन्नहंभावो देहे
वै स हरेः प्रियः ॥५१॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ॥ सर्वभूतसमः शांतः स वै भा
गवतोत्तमः ॥५२॥ त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ॥ न च
लति भगवत्पदारविंदाल्लवनिमिषार्धमपि स वैष्णवाग्र्यः ॥५३॥ ॥

त्मनि स्वः पर इति ॥५२॥ किंच ॥ त्रिभुवनविभवहेतवे ऽपि त्रैलोक्यराज्यार्थमपि लवार्धमपि निमिषार्धम
पि भगवत्पदारविंदभजनाद्यो न चलति स वैष्णवाग्र्यः ननु लवार्धमात्रभजनोपरमे वेत्तावांल्लाभो भवतात
कुतो न चलेत् ॥ तत्राह ॥ अकुंठस्मृतिः ॥ भगवत्पद[illegible]तोऽन्यत्सारं नास्तीत्येवंरूपा ऊवा अनपगता स्मृ
तिर्यस्य सः ॥ भगवत्पदारविंदादन्यत्सारं नास्तीति कुतः अत आह ॥ अजिते हरावेवात्मा येषां तथाभूतैः
सुरादिभिरपि दुर्लभात् किंतु केवलं विमृग्यात् तदपेतया सर्वस्य तत्त्वं तं स्मरन् न चलतीत्यर्थः ॥ परं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री० भा० न० ए० टी० १०

अपिचविषयाभिसंबंधिनाचलनंकामेनातिसंतापेसतिभवेत्तसचकामोभवत्सेवानिवृत्तोभवतीत्याह॥ भगवतइति॥ उरुक्रमौचरतावंघ्रीचतयोः शाखाअंगुलयः तासांनखानितान्येवमणयः तेषांचंद्रिकाप्रगीतलादीप्तिः तयानिरस्तः कामादितापोयस्मिन्नतस्मिन्नुपसीदतांभजतांहृदिकथंपुनःसंतापः प्रभवतिचंद्रेउदितेसतिअर्कस्यतापइवनयस्यस्वः परइत्यादिनाश्लोकत्रयेणायाहयाइत्यस्योत्तरमुक्तंवेदितव्यंयद्वातेइत्यस्यचदूरितानामानीतिज्ञातव्यम्॥ ५४॥ उक्तंसमस्तंभागवतलक्षणसारमाह॥ विसृजतीति॥ हरिरेवं

वि
भगवत उरुक्रमांघ्रिशाखानखमणिचंद्रिकयानिरस्ततापे॥ हृदिकथमुपसीदतांपुनः सप्रभवतिचंद्रइवोदितेऽर्कतापः॥५४॥ विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितोप्यघौघनाशः॥ प्रणयरशनयाधृतांघ्रिपद्मः सभवतिभागवतप्रधानउक्तः॥५५॥ इतिश्रीकादशेद्वितीयोध्यायः २ राजोवाच॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीम्॥ मायांवेदितुमिच्छामोभगवंतोब्रुवंतनः॥ ॥॥१॥ ॥

स्वयंसाक्षाद्यस्यहृदयंनविसृजतिनमुंचतिकथंभूतः अवशेनाप्यभिहितमात्रोपिअघौघंनाशयति यः सनाक्तिंनविसृजतियतः प्रणयरशनयाधृतंहृदयेनबद्धमंघ्रिपद्मंयस्यसः भागवतप्रधानउक्तोभवति॥५५॥ इतिश्रीकादशेद्वितीयः॥२॥ मायातत्तरणब्रह्मकर्मप्रश्नचतुष्टये॥ तृतीयेत्वृत्तरंदत्तमार्षभैः मुनिभिः पृथक्॥ विष्णोर्मायामिदंपश्यपत्रिसृक्तंअतोमायांपृच्छतिपरस्येतिहेभगवंतः॥१॥

राम० १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु कलत्वतो भागवतो भूत्वा कृतार्थः स्याः किंबहुप्रश्नैः अत आह नानुतृप्य इति संसारतापैर्नितरां प्राप्तो
हं तस्य तापस्य भेषजं हरिकथामृतरूपं युष्मद्वचो जुषमाणो नानुतृप्यामि मायायाः स्वरूपतो निरू[illegible]स
भवात॥२॥ सृष्ट्यादिकार्यद्वारेण निरूपयितुमाह॥ एभिरिति॥ आद्यः पुरुषः यः प्रागुक्त्या भूतानामात्मा॥
कारणभूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचानि भूतानि ससर्ज एषा माया भगवत इति चरं श्लोकपाद
स्यप्रति श्लोकः पादमनुषंगः किमर्थं ससर्ज स्वमात्रात्मप्रसिद्धये स्वमिमी. तेप्रभिमीतेयः उपास्ते सः म५

द्र

नानुतृप्ये जुषन्युष्मद्वचो हरिकथामृतं॥ संसारतापनिस्तप्तो मर्त्यस्तत्तापभेषजम्॥२॥
श्रीअंतरिक्ष उवाच॥ एभिर्भूतानि भूतात्मा महाभूतैर्महाभुज॥ ससर्जोच्चावचान्याद्यः स्वमा
त्रात्मप्रसिद्धये॥३॥ एवं सृष्टानि भूतानि प्रविष्टः पंचधातुभिः॥ एकधा दशधात्मानं वि
भजन्जुषते गुणान्॥४॥

स्वमात्रा तस्यात्मनो जीवस्य प्रकृष्टायै सिद्धये यद्वा स्वांशभूतानां मात्राप्रसिद्धये विषयभोगाय आत्म
प्रसिद्धये मोक्षाय वेत्यर्थः॥ तदुक्तं वेदस्तुतौ॥ बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः॥ मात्रा
र्थं च [illegible]॥ भवार्थं च आत्मने कल्पनायेति॥३॥ एवं जीवोपकरणार्थं पंचधातुभिः महा
भूतैः सृष्टानि भूतान्यन्तर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा बाह्येन्द्रियरूपेण आत्मानं वि
भजन् तत्तद्विषयान् जुषते जोषयतीत्यर्थः॥ यद्वा आत्मानं प्रति गुणान् विभजन् जुषते प्रीयते
इत्यर्थः॥ ॥४॥

तत्तत्पूर्वकर्मफलं च गृह्णन् नयं देहं भ्रमन् भ्रमतीह संसारे न सुखाने इत्यर्थः २॥
एवं मायामयीं सृष्टिमुक्त्वा प्रलयं दर्शीतुं मारभते ॥७॥

श्री भा॰ ए॰ पा॰ टी॰ ११

सर्वजीवस्यात्मानां तर्यामिणा प्रद्योतितैर्गुणैरिंद्रियैर्गुणान् भुंजान इदं सृष्टं शरीरमात्मानं मन्यमान इह शरीरा
दौ सज्जते ॥५॥ कर्मभिः कर्मेंद्रियैः सनिमित्तानि वासनानि कर्माणि कुर्वन् ॥ सुखेतरं सुखेतरः दुःखात्मकं कर्मफ द्रा॥ कथं कियंतं कालं प्र
लैर्बह्वन्यभद्राणि वहंतीति तथा ताः सर्गप्रलयौ उत्पत्तिमरणे ॥७॥ धातूनां महाभूतानां उपप्लवे नाशहेतौ तिनदाह ॥२॥
वासन्ने व्यक्तं कार्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकं अव्यक्ताय अव्यक्ते प्रति नेतुमाकर्षति ॥८॥ नाशर

गुणैर्गुणान् स भुंजान आत्मप्रद्योतितैः प्रभो ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥५॥
कर्माणि कर्मभिः कुर्वन् सनिमित्तानि देहभृत् ॥ तत्तत्कर्मफलं गृह्णन् भ्रमतीह सुखेतरं ॥६॥ भ्रमती १
इत्थं कर्मगतीर्गच्छन् बह्वभद्रवहाः पुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ॥७॥
वर्षे धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकं ॥ अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥८॥ शत
वर्षा ह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥ तत्कालोपचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ॥९॥ पा
तालतलमारभ्य संकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो विष्वग्वर्द्धते वायुनेरितः ॥१०॥
संवर्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते सलिले विराट् ॥११॥

हेतूनाद ॥ शतवर्षेति तस्मिन्काले उपचितः आसौ उष्णः असौ अर्कः अथ यद्वा तेन कालेन उपचितं उष्णत्वं
यस्य सः ॥९॥ ऊर्ध्वशिखा ऊर्ध्वज्वाला विष्वक् परितः ॥१०॥ संवर्तकः प्रलयकर्ता धाराभिर्जलबिंदुभिः
हस्तिहस्ताभिः तत्प्रमाणाभिः ॥ ॥ ॥११॥ रामायनमः ॥ ॥

राम॰
११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततउपाधिलयाद्वैराजः॥ पुरुषोऽव्यक्तं कारणं प्रविशति॥ नतुब्रह्मणा सह ते सर्वे संशान्ते प्रतिसंचरे परस्यांते कृता
त्मानः प्रविशंति परंपदमिति॥ सह ते यावदधिकारिणामिति न्यायाच्च वैराजशब्दाभिधेयस्य चतुर्मुखस्य ब्रह्मणः॥ पर
मभागवतत्वान्मोक्ष एव संगच्छते नान्येषामिव कारणमात्रप्रवेशः सत्यं अस्मिं मे यथादिनास्मल्लोकंगतानाम
प्यभक्तानामाहत्रिश्रवणादभक्तत्वेवस्मलोपि प्रकृतौ लयः पुनरावृत्तिश्चेति मोऽस्तु नायं एव मुक्तिमित्यविरोधः
॥२॥ एवं विराजो लयमुक्त्वा तत्कार वाक्यं
यद्वा केनापि प्रमाणेन नव्यक्तं वसवेवृतत्प्रवेशेन च मोक्ष एवोक्त इति द्रष्टव्यं॥२॥ एवं विराजो लयमुक्त्वा तत्कार
व्यज्यतेइत्य यद्वाकेनापि प्रमाणेन नव्यक्तं वसलेवृतत्प्रवेशेन च मोक्ष एवोक्त इति द्रष्टव्यं ॥
णानां महदादिपृथिव्यंतानां प्रातिलोम्येन लयमाह॥ वायुनेति वायोर्हि गंधरसहारित्वं प्रसिद्धं संवर्तकेन वा

अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः॥१॥ वायुनाहृ
ततो विराज उत्सृज्य वैराजो पुरुषो नृप॥ अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः॥१॥ वायुनाहृ
तगंधाभूः सलिलत्वाय कल्पते॥ सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते॥२॥ हृतरूपं तु तमसा
वायौ ज्योतिः प्रलीयते॥ हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते॥४॥ कालात्मना हृतगुणं नभ आ
त्मनि लीयते॥ इंद्रियाणि मनो बुद्धिः सह वैकारिकैर्नृप॥५॥ प्रविशंति ह्यहंकारं स्वगुणैरहमा
त्मनि॥६॥ एषा माया भगवतः सर्गस्थित्यंतकारिणी॥ त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि॥६॥

.त्रिवर्णा.

पुनाहृतगंधा अत एव गंधस्याव्यावर्तकस्यागतत्वात्सलिले लीयत इत्यर्थः॥ तद्धृतरसं तेन वायुनैव हृतो रसो
यस्य तत्॥३॥ तमसा हृतरूपतिरस्कारित्वं प्रसिद्धं संवर्तकेन तमसा अवकाशेन आकाशेन स्वकारणेन॥४॥
कालात्मना शब्दस्य हि कालएव नाशः प्रसिद्धः तद्रूपेणात्मनि तामसाहंकारे इंद्रियाणि बुद्धिश्च राजसाहंका
रे मनो वैकारिकैर्देवैः सह सात्विकाहंकार एवं त्रिविधैः स्वगुणैः स्वकार्यैः सहितः [illegible] अहंकारः आत्मनि
महति स च प्रकृताविति द्रष्टव्यं॥५॥ त्रिवर्णा त्रिगुणा माया श्रवणभीतं तन्निहत्य पायः श्रवणे [illegible] छेदयति किं

दौर्लभ्य

भागवत ५८ ॥

स नार्हस्यरेण ३४ राजानं

श्री
भा ग
एकी
१२

एवमनुक्तंपितः तद्विस्तरेणोपायमेव पृच्छति ॥ यथैतामिति ॥ यद्यपि तन्माययातो वुध आभजेत्तमिति ॥ भक्तिः
स्तारकत्वेनोक्तैव तथापि किं भक्तिरेव अन्योपि वा तत्रोपायोस्तीति तात्पर्यं पुनः प्रश्नः ॥ अकृतात्मभिः अवशी
कृतांतःकरणैः स्थूलधियः स्थूले शरीरे अहंधीर्येषां ते भक्तिव्यतिरेकेण नास्त्यन्य उपाय इति ॥ अभिप्रेत्य
भक्तिमेव ससाधनां निरूपयति ॥ तत्र प्रथमं वैराग्यद्वारा गुरूपसत्तिमाह चतुर्भिः कर्माणीति ॥ दुःखहंत्यै दुः
खप्रतीकाराय पाकविपर्यासं फलवैपरीत्यं मिथुनीचारिणां मिथुनीभूय प्रवर्तमानानां ॥१८॥ कर्मभिः साधि

राजोवाच यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरंत्यंजः स्थूलधियो महर्ष इदमुच्यतां ॥१७॥
प्रबुद्ध उवाच ॥ कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ॥ पश्येत्पाकविपर्यासं मिथुनीचारि
णां नृणां ॥१८॥ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैः
चलैः ॥१९॥ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितं ॥ सतुल्यातिशयध्वंसं यथा मंडलवर्तिनां ॥२०॥

तान्यपि वित्तादयो न सुखहेतव इति च पश्येदित्याह ॥ नित्यार्तिदेनेति आत्मनः स्वस्य मृत्युरूपेण चलैः अनित्यैः
अपायिभिः ॥१९॥ एवं लोकं परमिति कर्मनिर्मितत्वान्नश्वरं ॥ तथा च श्रुतिः ॥ तद्यथेह कर्मजितो लोकः क्षीय
त एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति किंच वर्तमानसमयेपि दुःखमुक्तं पश्येदित्याह सतुल्यातिश
यध्वंसं सह तुल्येनातिशयेन ध्वंसेन वर्तमानं अत्र तुल्ये स्पर्द्धा अतिशये असूया ध्वंसालोचने भयादिकं चाप
रिहार्यमित्यर्थः ॥ यथा खंडमंडलपतीनां मिथः स्पर्धादि तद्वत् ॥२०॥ ॥

राम
१२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उत्तमं श्रेयो ज्ञातुमिच्छुः ॥ शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्त्वज्ञं अन्यथा संशयनिरासकत्वायोगात् परे च
ब्रह्मणि अपरोक्षानुभवेन निष्णातं अन्यथा संबोधसंचारयोगात् ॥ परे ब्रह्मनिष्णातत्वद्योतकमाह ॥ उपशमा
श्रयमिति ॥ २१ ॥ गुरुरेवात्मा दैवतं च यस्य सः ॥ अनुवृत्त्या सेवया यैः धर्मैः तुष्येत् ॥ आत्मप्रदः स्वोपासकानां यथा ब
लिप्रभृतीनां ॥ २२ ॥ यथोचितमिति समेषु मैत्री उत्तमेषु प्रश्रयं च शिक्षेदित्यर्थः ॥ २३ ॥ शौचं बाह्यं मृज्जलादिभिः
आभ्यंतरं वादंभमानादिभिः शिक्षेत ॥ तपः स्वधर्माचरणं तितिर्दंतमा मौनं वृथावाचामनुच्चारणं स्वाध्यायम

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं ॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं ॥ २१ ॥ तत्र भागवतान्
धर्मान् शिक्षेद्गुर्वात्मदैवतः ॥ अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ २२ ॥ सर्वतो मनसोऽसंगमा
दौ संगं च साधुषु ॥ दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं ॥ २३ ॥ शौचं तपः तितिक्षां च मौनं स्वाध्याय
मार्जवं ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वंद्वसंज्ञयोः ॥ २४ ॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां ॥ वि
विक्तचीरवसनं संतोषं येन केनचित् ॥ २५ ॥ ॥

थिकाराद्रूपं वेदपाठादिकमार्जवं ॥ स्वच्छतां ब्रह्मचर्यं यथास्यपाहक उचिते ऋतौ स्वदारनियमादि अहिंसां भूतेष्व
द्रोहं द्वंद्वसंज्ञयोः ॥ शीतोष्णसुखदुःखादिरूपयोः ॥ समत्वं हर्षविषादराहित्यं ॥ २४ ॥ आत्मेश्वरान्वीक्षां सच्चिद्रूपे
णात्मेक्षां नियंतृरूपेणेश्वरान्वीक्षां च कैवल्यमेकांतशीलत्वं अनिकेततां गृहाद्यभिमानराहित्यं विविक्तचीर ॥
वसनं विजने पतितानां वस्त्रखंडानां प्रहाणां वा वल्कलानां परिधानं ॥ २५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ एका॰ १२

भागवते भगवत्प्रतिपादके अन्यत्र शास्त्रादौ या अनिंदा तां मनसा प्राणायामैः ॥ वाचो मौनेन कर्मणो निरीहया दंडं
सत्यं यथार्थभाषणं शमदमौ अंतःकरणबाह्येंद्रियनिग्रहौ ॥२६॥ हरेर्जन्मकर्मगुणानां श्रवणादि तदर्थं हरे
रुद्देशेन सर्वं कर्म विशेषतस्तु यजनादि यद्वा तदर्थं शिक्षेत ॥२७॥ इष्टं दत्तमित्यादयो भावे निष्ठांतं सदाचारः ॥
आत्मनः प्रियं गंधपुष्पादि दारादीन् प्राणांतं परस्मै परमेश्वराय निवेदनं सेवकतया समर्पणं यत्तच्छिक्षेत ॥२८॥
एवं कृष्ण एवात्मनाथो येषां कृष्ण आत्मनो जीवस्य नाथो येषामिति वा तेषु उभयत्र स्थावरे जंगमे च यथा परिचर्यां तां
श्री

श्रद्धां भागवते शास्त्रेऽनिंदामन्यत्र चापि हि ॥ मनोवाक्कर्मदंडं च सत्यं शमदमावपि ॥२६॥ श्रवणं कीर्तनं
ध्यानं हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितं ॥२७॥ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्म
नः प्रियं ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनं ॥२८॥ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृद
परिचर्यां चोभयत्र महत्सु नृषु साधुषु ॥२९॥ परस्परानुकथनं पावनं भगवद्यशः ॥ मिथो रतिर्मिथ
स्तुष्टिर्निवृत्तिर्मिथ आत्मनः ॥३०॥ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिं ॥ भक्त्या संजातया भक्त्या
बिभ्रत्युत्पुलकां तनुं ॥३१॥

विशेषतो नृषु तत्रापि साधुषु स्वधर्मशीलेषु ततोपि महत्सु श्रीभागवतेषु तैः सह संवासस्य पत्पावनं भगवद्यशः ॥
तस्य परस्परानुकथनं शिक्षेत ॥ यद्वा यशः प्रीतिः तत्र सत्स्वर्थादिपरित्यागेन मिथो या रतिः ॥ रमणं यावत्तुष्टिः ॥
यत्तु च स्वस्थतया च निवृत्तिः समस्तदुःखनिवृत्तिः तां च शिक्षेत ॥३०॥ एवं च वर्तमानानां परमानंदप्राप्तिमाह ॥ स्मरंत इ
ति द्वयेन भक्त्या साधनभूतया संजातया प्रेमलक्षणया भक्त्या यदुत्पन्नं तत्पुलकं तनुं रोदनमिति वेदितव्यं ॥३१॥

रामः
१२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अजेन दत्तं अनुशीलयंति तल्लीलामभिनयंति एवं परमेत्यशाप्यनिर्वृताः संतः तूष्णीं भवंति ॥ ३२ ॥ उपसंहरति इ
तीति भागवतान्धर्मान्त्यक्त्वा भक्त्या नारायणपरो मायां तरती दुस्तरां ॥ ३३ ॥ नारायणाभिधानस्येति निष्ठां स्वरूपम
हमेव ब्रह्मैव तान्नारायण इति भगवानिति परमात्मेति चोच्यते तदुक्तं वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ब्रह्मे
ति परमात्मेति भगवानिति शब्द्यते तथा नारायणो भगवति तदिदं विश्वमाहितं गृहीतमायोरुगुणः सर्गादा
वगुणः स्वतन इत्यादिषु ॥ ३४ ॥ त... वकिमेभिः शब्दैर्निर्विशेषं तदेव वस्तूच्यते अस्तिवाकोपि विशेष इति अ

क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः ॥ नृत्यंति गायंत्यनुशीलयंत्यजं भवं
ति तूष्णीं परमेत्य निर्वृताः ॥ ३२ ॥ इति भागवतान्धर्मान्शिक्षन्भक्त्या तदुत्थया ॥ नारायणपरो माया
मंजस्तरति दुस्तरां ॥ ३३ ॥ राजोवाच ॥ नारायणाभिधानस्य ब्रह्मणः परमात्मनः ॥ निष्ठामर्हथ नो
वक्तुं यूयं हि ब्रह्मवित्तमाः ॥ ३४ ॥ पिप्पलायन उवाच ॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजा
गरसुषुप्तिषु सद्बहिश्च ॥ देहेंद्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि परं नरेंद्र ॥ ३५ ॥

वो नरेंद्र स्थित्युद्भवेति ॥ अयमर्थः ॥ अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः ॥ स्वयं च अहेतुः ॥ हेतुरहितः सन्नारा
यण इति ॥ परमेव तत्त्वमवेहि स्वप्नजागरसुषुप्तिषु सत अनुवर्तमानं यत बहिश्च समाध्यादौ यत्सर्वं वर्तमानं त
द्ब्रह्मेति निर्देशेन ... गमनं इत्यर्थः ॥ तस्मात् परमेव तत्त्वमवेहि देहेंद्रियप्राणमनांसि येन संजीवितानि संति चरंति
प्रवर्तंते तत्परमात्मेति परमेव तत्त्वमवेहि एवं लक्षणभेदे नारायणादिनामभिः ॥ उच्यमानमपि परमेव तत्त्वं जानीहि ॥

स्म २ नेद्र होति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अद्वैदीत्यनेनविषयत्वंप्राप्तंनिषेधतिनैतदिति॥ एतत्परंतत्त्वंमनोनविशतिनविषयीकरोतिवागुतवागपिवदत्त्वद्वैतः
मात्मात्मबुद्धिः॥ प्राणस्तुक्रियाशक्त्यानप्राप्नोतिअन्यानिचेंद्रियाणियथानलंस्वाःस्वांशभूताअर्चिषोविस्फुलिंगा
दयः नप्रकाशयंतिनदहंतिचतथा॥ जगास्तमनआदिहत्रिविधभिक्मज्यमानस्यात्मप्रकाशस्यतत्त्वहृत्तिप्रकाशक
स्यननतत्त्वकाशविषयत्वंयथादीयमप्राणस्यप्राणंउतवदत्त्वश्रुत्तरूतश्रोत्रस्यश्रोत्रमन्नस्यान्नमनसोयेनमनोविदु
रितितथा॥ यतोवाचोनिवर्ततेअप्राप्यमनसासह॥ ॥नत्वंतंत्वौपनिषदंपुरुषंपृच्छामीतिश्रुतेः शास्त्रगोचरत्वं

वट:२

नैतन्मनोविशतिवागुतवदत्त्वरात्मामप्राणेंद्रियाणिचयथानलमर्चिषःस्वाः॥ शास्त्रोपिबोधकनिषेधत
यात्मसूलमथोंक्तमाहयदृतेननिषेधसिद्धिः॥ २५॥॥

प्रतीयतेतत्राह॥ शास्त्रोपीतिशास्त्रोपिआत्ममूलंआत्मनिप्रमाणंसतअर्थोक्तंअर्थाउक्तंयथाभवतितथाहनसाक्षा
तऊनः बोधकनिषेधतयास्वस्यैवबोधकस्यनिषेधरूपत्वात्यतोवाचोनिवर्ततेअप्राप्यमनसासह॥ यद्वाचानभ्युदिते
येनवागभ्युद्यतेतदेवब्रह्मत्वंविद्धियन्मनोनमनुतेनवृत्तघाणपश्यतिकश्चनेनमित्यादिश्रुतिभ्यः॥ ननुतर्हिनेवाह
श्रुतिः॥ किमिदमुच्यतेअर्थाक्तमाहेतितत्राहयदृतरति अथतआदेशोनेतिअस्थूलमनण्व॥ यतोवाचोनिवर्तंते
यद्वाचानभ्युदितमितिनिषेधस्ययदवधिभूतंब्रह्मऋतेविनासिद्धिर्नास्तिसर्वस्यनिषेधस्यसावधित्वात्॥ २६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु तर्हि प्रमाणाविषयित्वान्नास्ति ब्रह्मेति प्रसज्यते अत आह ॥ सत्त्वमिति ॥ सत् स्थूलं कार्यं असत् सूक्ष्मं कारणं
तत्सर्वं ब्रह्मैव भाति अतः यद्यस्मात् ॥ तयोः सदसतोः परं कारणं ननु कथमेकं बहुविधस्य कारणं तत्रा
ह ॥ उरुशक्तिरनेकशक्तिमत् उरुर्महती मायाल्लादिणपाद्भिर्यस्यां दिति वा बहुधा भानमेव दर्शयति
आदौ यदेकं ब्रह्म तदेव सत्त्वं रजस्तम इति त्रिवृत्प्रधानं प्रवदंति हि ततः क्रियाशक्तिं महान्तमिति तदेव
सूत्रं ज्ञानशक्त्या

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदंति जीवं
ज्ञानक्रियार्थफलरूपतयोरुशक्ति ब्रह्मैव भाति सद
सच्च तयोः परं यत् ॥ ॥ २७ ॥ राम

वदंति ततः अहमिति जीवं जीवोपाधिमहंकारं च तदेव प्रवदंति ॥ ततश्च ज्ञानक्रियार्थफलरूपतया ज्ञा
नपादेन देवताः क्रिया इंद्रियाणि अर्थाः विषयाः फलं तत्प्रकाशः सुखादि वा तद्रूपतया ब्रह्मैव भा
ति न हि सर्वरूपेण स्वतो भासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः ॥ ॥ २७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोपि तत्प्रसंगः स्यात्तदत्राह॥ आत्-
भा॰ गु॰ मेति आत्मा ब्रह्म न जज्ञान जातः जन्माभावादेव तदनंतरास्तितालक्षणोपि विकारो नास्ति नैधते न वर्ध-
प्र॰ टी॰ ते वृद्ध्यभावादेव विपरिणामोपि निरस्तः कुतः॥ हि यस्मात् व्यभिचारिणां आगमापायिनां बालयुवा-
१५ दिदेहानां सवनवित् तत्तत्कालद्रष्टा न त्ववस्थावतां द्रष्टा न तदवस्थो भवतीत्यर्थः॥ निरवस्थः के-

नात्मा जजान न मरिष्यति नैधतेऽसौ न क्षीयते
सवनविद्व्यभिचारिणां हि॥ सर्वत्र शश्वदनपाय्युपलब्धि
मात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत्॥ ३५॥ श्रीरामाय नमः॥

स्त्वात्मात्र तत्राह उपलब्धिमात्रमिति ननु आयातं तर्हि क्षणिकत्वं नेत्याह सर्वत्रेति सर्वत्र देशे शश्व-
त्सर्वदा अनपायि अनुवर्तमानं॥ ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्ज्ञानस्यानपायित्व-
मत आह इंद्रियबलेनेति॥ सर्वदैव ज्ञानं इंद्रियबलेन विविधं कल्पितं नीलाद्याकारा वृत्तय एव जायं-
ते न स्वयं प्रतिचन ज्ञानमिति भावः व्यभिचारिषु अव्यभिचारी दृष्टांतः प्राणो यथेति॥ ॥ ३५॥ ॥ ॥ राम॰ १५

दृष्टांतं विवृ एवमिंद्रियादिलयेन निर्विकारात्मोपलब्धिं दर्शयति ॥१॥

सुप्तेदजे १

पेशिषु जरायुजेषु तरुषु उद्भिज्जेषु अविनिश्चितेषु पथावति ॥ अनुवर्तते एवं दृष्टांतेन निर्विकारित्वं प्रदर्श्य दृष्टांतिके
पि दर्शयति कथं तदेवात्मा सविकारैः प्रतीयते यतो यदा जाग्रदेरिंद्रियगणाः ॥ यदा च स्वप्ने तत्संस्कारवान् अहंकारः
[illegible] ॥ यदा च सुषुप्तं तदास्मिन्सुषुप्ते इंद्रियगणे सत्त्वे लीने अहमिवाहंकारे एवम
प्रे कूटस्थो निर्विकार एवं ज्ञातः आशयमृते लिंगशरीरमुपाधिं विना विकारहेतोरुपाधेरभावादित्यर्थः नन्व
हंकारपर्यंतस्य सर्वस्य लये शून्यमिवावशिष्यते कुतः तदा कूटस्थ आत्मा अत आह तदनुस्मृतिर्नः तस्य विशेषणा
न दर्शनस्पर्शनादिशून्यस्य स्वात्मनः ॥ सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवेत्ति एतावंतं कालं सुखमहमस्वाप्सं

दि १

अंडेषु पेशिषु तरुषु विनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र ॥ सन्ने यदिंद्रियगणेऽहमिव प्रसु
प्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ॥ ३९ ॥ यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमे
द्गुणकर्मजानि ॥ तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः ॥ ४० ॥

पश्यन्नेव न दृश्यं न पश्यति २

किंचित् अवेदिषमिति अतो नानुभूतस्यास्मरणात् सैव सुषुप्तावात्मानुभवः ॥ विषयसंबंधाभावात्तु स्वपरति
भावः ॥ तथा च श्रुतिः ॥ तद्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते इति ॥ ननु च यदि सुषुप्तौ कूटस्थात्मा
भवेत्कथं पुनरपि संसारः स्यात् ॥ अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत्कदा तर्हि तन्निवर्तकोऽनुभवो भ
वेत् ॥ ३९ ॥ विशेषणादि विहाय केवलमब्जनाभस्यैव चरणयोर्या उरुभक्तिस्तया भगवान् चेतसो मलानि तया भ
क्त्या क्षालयेत् तदा तस्मिन्विशुद्धे चेतसि सति साक्षादव्यवधानेनात्मतत्त्वमुपलभ्यते अमलयोर्दृशोः सत्योर्य
था सर्वमेव सिद्धं सवितृप्रकाश इति भक्तेरेकमेयोगार्थीनत्वात् पृच्छति पुनः ॥ ४० ॥

आत्मा ४

अनंतरमाह यर्हीति ३

नुभवो २

विधमेत् नाशयेत् चेत एव वा कर्तृ स्वगतानि ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री। नैष्कर्म्यं कर्मनिवृत्तिः साध्यं ज्ञानं प्रश्नांतरमाह ॥ ४१ ॥ प्रश्नप्रश्नमेवमर्थ्ये पितृविद्वाकोर्व्व ब्रह्मणः पुत्राः सनकादयः सर्वे
भाग। ज्ञा अपि नाब्रुवन् गहनत्वेन नायद्धि तीयं प्रश्नोत्तरं प्रकटयन्नाह ॥ ४२ ॥ कर्म विहितं कर्म तद्विपरीतं विकर्म नि
ए। षिद्धं कर्म विहिताकरणं पतत् त्रयं वेदवादो वेदैकगम्यं न लौकिकः वेदस्येश्वरात्मत्वादीश्वराद्भूतत्वात् ॥
१८

श्रीराजोवाच ॥ कर्मयोगं वदत नः पुरुषो येन संस्कृतः ॥ विधूयेहाशु कर्माणि नैष्कर्म्यं विंदते परं ॥ ४१ ॥
एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरंतिके ॥ नाब्रुवन्ब्रह्मणः पुत्रास्तत्र कारणमुच्यतां ॥ ४२ ॥ ॥
आविर्होत्र उवाच ॥ कर्माऽकर्म विकर्मेति वेदवादो न लौकिकः ॥ वेदस्य चेश्वरात्मत्वात्तत्र मुह्यंति सूरयः ॥ ४३ ॥

अपौरुषेयत्वादित्यर्थः ॥ पुंवाक्ये हि वक्तुरभिप्रायतोऽर्थं ज्ञातुं शक्यं अपौरुषेये तु केवलं वाक्यं पौर्वापर्येणैव
तात्पर्यावधारणं तच्च दुष्करमिति तत्र कर्मादौ विद्वांसो मुह्यंति किं तान्ये अतस्तव तदा बालत्वान्नैवाब्रुवन्निति
दुर्ज्ञेयं वेदतात्पर्यमाह ॥ ४३ ॥ ॥ ॥ उ ॥ राम। १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

[illegible] ॥ परोक्षवाद इति श्रुत्यानयाश्रितोऽर्थः संगोपयितुमन्यथाहेत्याख्यानेस परोक्षवादः त
था च श्रुतिः नवा एतं स्वर्गहेतवे विमन्यबकर्हानेत्याख्यातं ॥ परोक्षेण परोक्षप्रिया इव हि देवा इति परोक्षवाद एवायं कर्म
मोक्षायेति ननु स्वर्गाद्यर्थं कर्माणि विधत्ते न कर्ममोक्षार्थं तत्राह बालानामनुशासनं यथा ॥ श्रुत्वाहृष्टोनन्नः
गद्दौषधं यथा पिता बालं मधुरं पाययन्खंडलड्डुकादिभिः प्रलोभयन्पाययति न ददाति निवेनानिवै

परोक्षवादो वेदोऽयं बालानामनुशासनं ॥ कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ ४४ ॥ नाचरे
द्यस्तु वेदोक्तं स्वयमज्ञोऽजितेंद्रिय ः ॥ विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ ॥ ४५ ॥ स्वाम ।

तावनागादृणानस्यात्स भावः प्रयोजनमपिनारोग्यं नयथा वेदोऽप्यवांतरफलैः ॥ प्रलोभयन्कर्ममोक्षायैव
कर्माणि विधत्ते ॥ ४४ ॥ ननु कर्ममोक्षश्चेत्पुरुषार्थः तर्हि [illegible] प्रथममेव कर्माण्यज्ञानो न कुर्यात्तत्राह नाचरेदिति
अज्ञो ऽजितेंद्रियश्चाविद्वान् स्वयं यदि नाचरेत्तर्हि विकर्मणा कर्माचरणरूपेणाधर्मेण मृत्योरनंतरं मृत्युमेव
प्राप्नोति ॥ तथा च श्रुतिः ॥ स्वाध्यायमभ्यसेदिति ॥ माना रिति श्रुत्वा देवोक्तमेव कुर्वीतेति निषिद्धं ॥ ४५

स्वकर्मभि १ लक्षणेनाः

श्री भा. ए. टी. ९

नतु कर्मणा क्रियमाणेन सिद्ध्यासक्तिः नैफलेवस्यानन्तनेनैष्कर्म्येतु णा॥ तस्माह निःसंगस्तनभिनिवेशावा
न ईश्वरेऽर्पितेन नच फलेच्छावान फलस्य श्रुतत्वात्कर्मणि हि तेन फलेन भवेदेवतेरोचनार्थेति कर्मणि रुच्युत्पा
दनार्थं स्वर्गादिफलं लड्डुकादिवत्तन्नस्य कर्माभिरुच्या वेदार्थसम्यक्कविनिर्णीयते नदावपावापनस्तद
रमविविदिषा गामेणाणो लोकाव्रीसति सत्त्वशुद्धिपाणां ज्ञानात्तनस्य हकर्मणा तानतमेनं वेदानुवचनेन ब्राह्मणा विवि
दिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति॥ यज्ञादीनां तत्राशोधनत्वावधार्यन्निष्कामेषु क

वेदोक्तमेव कुर्वाणो निःसंगोऽर्पितमीश्वरे॥ नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥४६॥ य आशु
हृदयग्रन्थिं निर्जिहीर्षुः परात्मनः॥ विधिनोपचरेद्देवं तन्त्रोक्तेन च केशवं॥४७॥ लब्ध्वानुग्रह आ
चार्यात्तेन संदर्शितागमः॥ महापुरुषमभ्यर्च्चेन्मूर्त्त्याभिमतयात्मनः॥४८॥ राम

र्मसु प्रवर्त्तते न तु स्वर्गकामो यजेतेत्यादिभिः कामिनस्तेऽवस्वर्गादेः फलत्वेनावगमात् कामिनोऽपि सो
त्र भवतीति नैष्कर्म्यसिद्धिर्भवतीति भावः॥४६॥ वैदिकं कर्मयोगमुक्त्वा तान्त्रिकमाह॥ य आश्विति परात्मनः
परस्यैव तत्त्वस्यात्मनो जीवस्य हृदयग्रन्थिं अहंकारबंधं निर्हर्त्तुमिच्छुः स तन्त्रोक्तेन च विधिना प्रकारेणाभ
जेत् तन्त्रमार्गमाह॥ वैकारिकाद्वैदिके न सह समुच्चयमाह॥४७॥ तमेवं विधिमाह लब्ध्वानुग्रह इत्यादिना तेना
चार्येण संदर्शितस्त्वागमः॥ स्वेनेप्रकारेणोपस्मृतः॥ ४८ ॥ राम ॥ श्री

राम २

मूर्तेः संमुखमासीनः ॥ आदिशब्देन भूतशुद्ध्यापि पिंडं देहं विशोध्य संन्यासैः कृतायेन सः ॥ ४९ ॥ आदावेवद्रव्या
णि पुष्पादीनि जलादि शोधनेन दीप्तिं संमार्जनादिना आत्मानमव्यग्रतया लिंगमूर्तिं अनुलेपक्षालनादि
नानि निष्पाद्य योग्यानि कृत्वा ॥ ५० ॥ पाद्यादिपात्राण्युपकल्प्य संनिधाप्य हृदि संपूज्य श्रीमूर्तौ ध्यात्वा हृदादिभिः
हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः [illegible] मूलमंत्रेण [illegible]च देवे कृतन्यासो मूलमंत्रेणार्चयेत्

शुचिः सन्मुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोध्य संन्यासैः कृतरक्षोर्चयेद्धरिं ॥ ४९ ॥ अर्चा
दौ हृदयेवापि यथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासनं ॥ ५० ॥ पाद्यादीनु
पकल्प्याथ संनिधाप्य समाहितः ॥ हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत् ॥ ५१ ॥ सांगोपांगां स
पार्षदां तां तां मूर्तिं स्वमंत्रितः ॥ पाद्यार्घ्याचमनीयाद्यैः स्नानवासोविभूषणैः ॥ ५२ ॥ गंधमाल्याक्षत
स्रग्भिर्धूपदीपोपहारकैः ॥ सांगं संपूज्य विधिवत्स्तवैः स्तुत्वा नमेद्धरिं ॥ ५३ ॥ आत्मानं तन्मयं ध्याय
न्मूर्तिं संपूजयेद्धरेः ॥ शेषामादाय शिरसा स्वधाम्नोद्वास्य सत्कृतं ॥ ५४ ॥ एवमग्न्यर्कतोयादावतिथौ
हृदयेवयः ॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥ ५५ ॥ इतिश्रीएकादशे तृतीयः ॥ ॥

उपांगानि सुदर्शनादीनि ॥ पाद्यप्रक्षेन

५१ ॥ अंगानि हृदयादीनि तत्सहितां सपार्षदां सपरिवारां कैरुपाधैर्वर्चयेत् ॥ तदाह पाद्येति आदिशब्देन मधुपर्कमा
चमनं च ॥ ५२ ॥ अक्षतां तिलकालंकारैरनुपूजायां ॥ नूनादत्तैर्वर्चयेद्धिंसुनके तक्ष्यामहेश्वरं इति निषेधात् उपहा
रा नैवेद्यं शेषं निर्माल्यं स्वधाम्नि स्वस्थाने देवं हृदि मूर्तिकवेंडके उद्वास्य स्थापयित्वा पूजाविधिं समापयेदिति शेषः
५४ ॥ तांत्रिककर्मयोगमुपसंहरति एवमिति ॥ ५५ ॥ इत्येकादशे तृतीयः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ ए॰ टी॰ ८

चतुर्थेत्ववतारेद्वाप्रश्नस्योत्तरमुक्तवान्॥ जयंतीनंदनोनाम्नाद्रुमिलोनवसत्तमः॥१॥ सर्वाभिमतयात्मानुग्राह्यत्वेना
त्मनःप्रियमवतारज्ञानमपेक्षितंतथास्तवैः॥ सत्त्वानमेहरिमिष्टक्रमेगुण कर्मतानंचापेक्षितं॥ अतःपृच्छतियानि
यानीतिकर्ताकरिष्यतितत्त्वयादृष्टानिकालत्रयसंबंधिसकलावतारगुणकर्माणिकथयितुमशक्यानिसं क्षेप
स्वकानिविवक्षयिष्यामीत्याह॥ योवाइत्यादिनाअनन्तक्रमिष्यन्गणयितुमिच्छतियःसतुबालानामिवबुद्धिर्यः

राजोवाच॥ यानियानीहकर्माणियैर्यैःस्वच्छंदजन्मभिः॥ चक्रेकरोतिकर्तावाहरिस्तानिब्रुवंतुनः॥१॥
द्रुमिलउवाच॥ योवाअनंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः॥ रजांसिभूमेर्गणयेत्कथंचि
त्कालेननैवाखिलशक्तिधाम्नः॥२॥ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन्॥
स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवः॥३॥ स्कं॰ ११ अ॰ ४

सपसमंदमतिः॥ कालेनमहताकोपिमहामतिः॥ रजांसिगणयेदपिअखिलशक्तिधाम्नः॥ सर्वशक्त्याश्रयस्य
भगवतोगुणांस्तुनैवगणयेत्॥ तथाचश्रुतिः॥ विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसीत्यादि॥
तत्रादौपुरुषावतारमाह॥ भूतैरितियदास्वसृष्टैर्भूतैर्विराजंब्रह्मांडपुरंनिर्मायतस्मिन् स्वांशेनजीवेनयदाप्र
विष्टःनारायणस्तदापुरुषाभिधानमवापलीलयाप्रविष्टोनतुभोक्तृत्वेनप्रभूत्पुण्यस्यजीवस्यतत्रभोक्तृ रम॰ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अस्यगुणकर्माण्याह ॥ द्वयेनयत्कायइतियस्याधिष्ठेयःकायएषःकायइतिसप्तमीवातनुभृतांसमष्टिजी
वानांज्ञानकर्मेंद्रियाणियस्यस्वतःस्वरूपभूतात्स्वज्ञानात्तनुभृतांज्ञानंयस्यश्वसनतःसिद्धंप्राणमितिवायस्यश्वस
नतःप्राणात्बलंदेहशक्तिःओजइंद्रियशक्तिःईहाक्रियायस्यसत्त्वादिभिर्विश्वस्यस्थितिलयोद्भवआदि
कर्ताआदिकर्ता । त्यनेनेतत्पूर्वकंकुर्वंतरमपिस्मृतं ॥ ४ ॥ तत्रप्राधान्येनगुणावतारद्वाराचराचरसृष्ट्यादिक
र्तृत्वमाह ॥ आदावितियस्येतिअनुषंगः यस्यरजसाअस्यजगतःसर्गकार्येशतधृति ब्रह्माभूत स्थितौचवि

यत्कायएषभुवनत्रयसन्निवेशोयस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ॥ ज्ञानंस्वतःश्वसनतोबल
मोजईहासत्त्वादिभिःस्थितिलयोद्भवआदिकर्ता ॥ ४ ॥ आदावभूच्छतधृतीरजसास्यसर्गेविष्णुः
स्थितौक्रतुपतिर्द्विजधर्मसेतुः ॥ रुद्रोऽप्ययायतमसापुरुषःसआद्यइत्युद्भवस्थितिलयःसतत
तंप्रजासु ॥ ५ ॥ धर्मस्यदक्षदुहितर्यजनिष्टमूर्त्यांनारायणोनरऋषिप्रवरःप्रशांतः ॥ नैष्क
र्म्यलक्षणमुवाचचचारकर्मयोऽद्यापिचास्तऋषिवर्यनिषेवितांघ्रिः ॥ ॥ ६ ॥ राम ॥

ष्णुः यस्यसत्त्वेनेतिशेषः क्रतुपतिः तत्फलदाताद्विजातीनांतद्धर्माणांचसेतुःपालकइत्यर्थः ॥ यस्यतमसा
अस्याप्ययायरुद्रोऽभूतइतिएतैर्ब्रह्मादिभिर्निमित्तभूतैःप्रजासुउद्भवादयोभवंतिसआद्यःपुरुषइत्यन्वयः ॥ ५
धर्मस्यभार्यायांदक्षदुहितरिमूर्तिसंज्ञायांनारायणोनरइतिमूर्तिद्वयेनअजनिष्टजातःतच्चरितमाहनैः
कर्मआत्मस्वरूपंलक्ष्यतेयेनतत्कर्मनिर्हाररूपंवाउवाचनारदादिभ्यःस्वयंचचारचयोद्यापिकर्मास्तेऋ
॥ षिवर्यनिषेवितावंघ्रीयस्यसः ॥ ६ ॥ वरतत्१०

द्रुमि १

नरनारायणावतारमाह ॥ २ ॥

श्री। भाग। ए। टी। ११स्कंधे

भगवदवतारत्वद्योतकंपरमोपशमंदर्शयितुमितिहसमाहइंद्रइतिदशभिः। धामस्थानंतपसागृहीत्वमि-
छतीतिविशंक्यतपोनाशायकामंसपरिवारंप्रेषयामाससः कामः बदरीभिरुपाख्यायतेयः तंतस्याश्र
मंअप्सरोगणादिभिः सहगत्वा॥ स्त्रीणांप्रेक्षणान्येवइषवोबाणास्तैः नतस्यमहिमानंजानातिअतन्म
हिज्ञः॥ अक्रमंमपराधंअहंधीरइतिविस्मयोगर्वः तद्रहितः॥ एजमानान्शापभियाकंपमानान्भो
विभोसमर्थहेदेववध्वः॥ माभैष्टबलिमातिथ्यंतान्प्रार्थयतेइममस्माकमाश्रमंआतिथ्याभावेशून्य

इंद्रोविशंक्यममधामजिघृक्षतीतिकामंन्ययुंक्तसगणंसबदर्युपाख्यं॥ गत्वाप्सरोगणव-
संतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः॥७॥ विज्ञायशक्रकृतमक्रममादि
देवः प्राहप्रहस्यगतविस्मयएजमानान्॥ माभैष्टभोमदनमारुतदेववध्वोगृह्णीतनोब
लिमशून्यमिमंकुरुध्वं॥८॥ इत्थंब्रुवत्यभयदेनरदेवदेवाः सव्रीडनम्रशिरसः सघृणं
तमूचुः॥ नैतद्विभोत्वयिपरेविकृतेविचित्रंस्वारामधीरनिकरानतपादपद्मे ॥९॥

प्रायंस्यादित्यर्थः॥८॥ हेनरदेवअभयदे श्रीनारायणेइत्थंब्रुवतिसति [illegible] देवाः॥ कामादयः
सव्रीडानिनम्राणिशिरांसियेषांतेलज्जाभारेणोर्वनतशिरस्काइत्यर्थः॥ सघृणंयथाभवतितथा
पांजनयंतइत्यर्थः॥ कृपायुक्तमितिवामाय्यातः॥ परेअतीतौविकृतेस्वारामाश्चतेधीराश्चतेषां
निकरैरानतंपादपद्मंयस्यतस्मिन्॥९॥ रामायनमः ॥५॥ ॥राम ॥॥ ॥राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वयिपततअद्वेोर्भनुकंपादिनविघ्नं अस्माकंचापराधाचरणंस्वभावत्वान्नविघ्नमित्याहुः त्वामिति त्वांसेवतांसेव
मानानांजनानांसुरैरिंद्रादिभिः कृता अंतराया विघ्ना भवंति कस्मादित्यतआह स्वोकइति॥ स्वस्थानंस्वर्ग
मतिक्रम्यपरमंतवस्थानंव्रजतांनान्यस्य त्वामसेवमानस्य कुतः बर्हिषि यज्ञे स्वभागान्पुरोडाशादीन्
बलीन्करान्कृषिकइवराज्ञे इंद्रादिभ्योददतः प्रयच्छतः॥ तर्हिकिंमद्भक्तोविघ्नैर्भयंप्याति नेत्याह॥ धत्त इ
तियदीतिनिश्चये यतस्त्वंसर्वस्वराज्ञीश्वरोविता रक्षकः अतोसौविघ्नानांमूर्ध्निपदमाधिधत्ते कुतः पुनःत्व
यिविघ्नशंकेतिभावः॥१०॥ त्वद्भक्तानांतु केवलंनपश्चरतांदयीगतिः॥ अस्माकंवावशायाति क्रोधस्यवा॥

त्वांसेवतांसुरकृताबहवोंतरायाः स्वोकोविलंघ्यपरमंव्रजतांपदंते॥ नान्यस्यबर्हिषिबलीन्ददतः
स्वभागान्धत्तेपदंत्वमवितायदिविघ्नमूर्ध्नि॥ १०॥ क्षुत्तृट्त्रिकालगुणमारुतजैह्वशैश्न्यानस्मानपारज
लधीनतितीर्यकेचित्॥ क्रोधस्ययांतिविफलस्य वशंपदेगोर्मज्जंतिदुश्चरतपश्चवृथोत्सृजं
ति॥११॥

तत्रास्मद्दशाः॥ कामोपभोगमप्येतावदनुभवंति क्रोधस्यवशाः॥ पुनरपिमंदाइत्याहः क्षुत्तृडिति॥ क्षुत्तृट्
वत्रिकालगुणाश्चशीतोष्णवर्षाणिमारुतश्चप्राणोबाह्योवाजैह्वाः जिह्वाभोगाश्शैश्न्याः गुह्योपभोगा
श्चएतानस्मान्॥ अपारजलधीन्रूपानतितीर्यविलंघ्यगोष्पदेमज्जंति कुतः यतः क्रोधस्यविफलस्यवशंयांतिग
छंतिकिंचजलेमज्जतांयथाविवशाः संतोमस्तकारोपितंभारमुत्सृजंति तथाहृध्यानमोदायनचभोगा
यश्रणपादिनाउग्रंतपउत्सृजंति॥ हेभगवन्सर्वसाधनानांत्पात्राअपित्वत्सेवाहीनाः संसारंनतरंतीति
भावः॥ ॥ ॥११॥ ॥ रामायनमः॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्रियः योगान्निर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चिताः सुष्ठ्वालंकृताः तेषां स्वलावण्यादिदर्पोपशमाय दर्श
यामास ॥ १२ ॥ रूपिणीर्मूर्तिमतीः श्रीरिव ताः स्त्रीर्दृष्ट्वा तासां तद्रूपस्योदार्येण महता श्रीः कांतिर्येषां ते ॥ १२ ॥
हे धंहणी धंष्ठु वयं वराकाः क्वावेमा इति चेत्तत्राह ॥ सवर्णा समानरूपा नैकाप्यस्मदन्तद्रूपेति चेत् माभ
वत तथापि स्वर्गस्य भूषणरूपा ॥ १४ ॥ सुरवंदिनः देवभृत्याः ॥ १५ ॥ इंद्राय इंद्रप्रति नारायणबलमूचुः

इति प्रगृणतां तेषां स्त्रियोत्यद्भुतदर्शनाः ॥ दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥ १२ ॥ ते
देवानुचरा दृष्ट्वा स्त्रियः श्रीरिवरूपिणीः ॥ गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥ १३ ॥ ता
नाह देवदेवेशः प्रणतान्प्रहसन्निव ॥ आसामेकतमां वृङ्ध्वं सवर्णां स्वर्गभूषणां ॥ १४ ॥ ओमित्या
देशमादाय नत्वा तं सुरवंदिनः ॥ उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥ १५ ॥ इंद्रायानम्
य सदसि शृण्वतां त्रिदिवौकसां ॥ ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः ॥ १६ ॥ हंसस्
वरूप्यवदच्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः ॥ विष्णुः शिवाय जगतां क
लयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥ १७ ॥ ॥

शक्रस्तत्रास त्रासं प्राप्तः विस्मित श्च तत्र विस्मित आसेति वा ॥ १६ ॥ अन्यानप्यवतारांस्तच्चरितानि चाह
हंसे हंसस्वरूपीति दत्तः दत्तात्रेयः कुमारः सनकादिनः पिता ऋषभः च विष्णुरेव कलयावतीर्णः सर्
वात्मयोगमवदत ॥ तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभिदा सता नततः पातालतः सनातनाः
श्रुतयः आहृताः ॥ ॥ १७ ॥ रामायनमः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इलाष्टौगौषधयश्च गुप्ताः क्रौडे वराहावतारे ग्राहात् गजेंद्रममुंचत् मोचयामास एवमादौ यत्रावतारनाम्नास्ति
तत्र विस्तुः शिवाय जगतां कलयावतीर्ण इत्यनुवर्तनीयं संस्तुन्वतः स्तुतिं कुर्वाणान् ऋषीन् बालखिल्या
न् कश्यपपार्श्वसमिधाहरणे गोष्पदे निमग्नान् इंद्रेण प्रहसितान् दृष्ट्वा पदो॰ मोचयत् तमसि ब्रह्महत्यायां

गुप्तोप्यये मनुरिलौषधयश्च मात्स्ये क्रौडे हतो दितिज उद्धरतोंभसः क्ष्मां ॥ कौर्मे धृतोद्रिरमृतो
न्मथने स्वपृष्ठे ग्राहात्प्रपन्नमिभराजममुंचदार्तं ॥१८॥ संस्तुन्वतोब्धिपतितान् श्रमणानृषींश्च
शक्रं च वृत्रवधतस्तमसि प्रविष्टं ॥ देवस्त्रियोऽसुरगृहे पिहिता अनाथा जघ्नेऽसुरेंद्रमभयाय स
तां नृसिंहे ॥१९॥ देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः ॥ भूत्वाथ
वामन इमामहरद्बलेः क्ष्मां याच्ञाछलेन समदाददितेः सुतेभ्यः ॥२०॥ निःक्षत्रियामकृत गां च
त्रिःसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः ॥ सोब्धिं बबंध दशवक्त्रमहन्सलंकं सीतापति
र्जयति लोकमलघ्नकीर्तिः ॥२१॥ ॥

प्रविष्टं मोचयामास असुरगृहे पिहितानि रुद्धा या देवस्त्रियस्ता अमुंचदनेकावतारैः ॥ अंतरेषु सर्वमन्वंतरेषु
कलाभिर्मूर्तिभिर्भुवनानि अदधात् अपालयत् इमां क्ष्मां समदात् ददौ हैहयानां कुलस्याप्ययाय भार्गव
रूपोग्निः स रामो दाशरथिः सन् सलंकं लंकायां स्थितं स च जयति वर्तमानकालीनोऽवतार इत्यर्थः ॥२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा.गु.
ए.टी.
२१

भाविनं रामकृष्णावतारमाह ॥ भूमेरिति ॥ बुद्धावतारमाह ॥ वादैरिति अतदर्हान् यज्ञानर्हान् दैत्यान्विमोह-
यिष्यति ॥ कल्क्यवतारमाह ॥ शूद्रानिति निहनिष्यति ॥ २३ ॥ इत्येकादशे चतुर्थः ॥ ४ ॥ पंचमे भक्तिहीनानां
कानिष्ठा का युगे युगे ॥ पूजाविधिरिति प्रश्नद्वयस्योत्तरमुच्यते ॥ तांसेवतां स्वरक्षतां बहवो तरायाइत्य-
नेन श्रीहरिभक्ताविघ्नमुक्त्वा पदं दत्त्वा परां गतिं यांतीति भक्तानां तु विघ्ना न भवंती त्युक्ते न हि तेषां कागु-
तिर्भवतीति पृच्छति भगवंतमिति द्वेआत्मवित्तमाः अविजितात्मनामतएवाशांतकामानां कानिष्ठा किं

भूमेर्भरावतरणाय यदुषु जन्मजातः करिष्यति सुरैरपि दुःकराणि ॥ वादैर्विमोहयति यज्ञकृतो
तदर्हान् शूद्रान्कलौ क्षितिभुजोन्यहनिष्यदंते ॥ २२ ॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः
भूरीणि भूरियशसो वर्णितानि महाभुज ॥ २३ ॥ इतिश्रीएकादशे चतुर्थोध्यायः ॥ ४ ॥ राजोवाच ॥
भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः ॥ तेषामशांतकामानां कानिष्ठाविजितात्मनां ॥ १ ॥
श्रीचमसउवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ॥ चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः
पृथक् ॥ २ ॥ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरम् ॥ न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्य-
धः ॥ ३ ॥

माह मुखेति

प्राप्स्यमित्यर्थः ॥ स्वजनकस्य गुरोर्भगवतो नादरानुरूपो द्वेन उर्गतिं यांतीति वक्तुं भगवतः सकाशात्
वर्णाश्रमाणामुत्पत्तिं गुणैः सत्वेन विप्राः सत्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वैश्यः ॥ तमसा शूद्र इति एषां
मध्ये ये ज्ञात्वा न भजंति ये च ज्ञात्वाप्यवजानंति आत्मनः प्रभवो जन्म यस्मात्तं तदभजने हेतुस्तमात्मप्रभवमाह
ईश्वरमिति स्थानाद्वर्णाश्रमाद्भ्रष्टाः ॥ ॥ राम ३ राम ॥ श्रीरामायनमः ॥ ॥ ॥ ॐ रामजेय ॥ ॐ ॥ राम. २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्रयेताः भवद्विधानामनुग्राह्याइत्याह ॥ हरेरिति ॥ हरेर्हरिकथाश्रवणंयेषांतेअतएवहरेश्चअच्युतकीर्तनंयेषां
तेहरेरच्युतकीर्तनावेतितानलवदुर्विदग्धास्वविविकित्सतादुपेत्याश्रयेत्याश्रयेनाहविप्रइति श्रौतेन उ
पनयनाख्येनइपलक्षणमेतत अध्ययनादिनापिहरेः पदांतिकंतज्जनोत्तमाधिकारआप्तंअपिमुख्य
तिकर्मफलेषुसक्तंतेऽतः आम्नायेषुयेवादाअर्थवादाः तेमोहकतयाप्रियंतेयेषांतेतदुक्तंगीतासु ॥ यामि
मांपुष्पितांवाचंप्रवदंतिविपश्चितः ॥ वेदवादरताःपार्थनान्यदस्तीतिवादिनइत्यादिनाभक्तिमार्गदार

हरेर्हरिकथाः केचिद्धरेश्चाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयश्चैवतेऽनुकंप्याभवादृशां ॥ ४ ॥
वै. विप्रोराजन्यवैश्यौवाहरेः प्राप्ताःपदांतिकम् ॥ श्रौतेनजन्मनाथापिमुह्यंत्याम्नायवादिनः ॥ ५
कर्मण्यकोविदास्तब्धामूर्खाः पंडितमानिनः ॥ वदंतिचाटुकान्मूढाययामाध्व्याग
गिरोत्सुकाः ॥ ६ ॥ ॥

ज्ञाप्यतेषांमोहंप्रपंचयन्निंदंतिकर्मणीत्यादिना ॥ ५ ॥ अकोविदाः यथाबंधकंनभवति ॥ तथाकर्तुं
मंताः ॥ नचाभिज्ञाम्लेछेतियतस्तब्धाअननम्राः ॥ स्तब्धत्वेहेतुः यतोमूर्खाअपिपंडितावयमितिमान
वंतः अतः अपामसोमममृताअभूम ॥ अक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवतियत्रनोऽस्मिनच
प्रीतंस्यात्त्वस्नानिनोऽप्यसमस्तयइत्यादिकयायैमाध्व्यागिरोत्सुकाः संतोमूढास्तयाचाटुकानप्स
अप्सरोः रोभिः सहविचरिष्यामइत्यादिप्रियान्शब्दान्वदंति ॥ ॥ ६ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच तेषां कर्मभिनिवेशात्कामक्रोधदंभादयो वर्धंत इत्याह त्रयेण रजसेति घोराः अभिचारादिसंकल्पा येषां ते आहि
वन्मनुष्येषां ते काम कृत्वं प्रपंचयति ॥ वदंतीति ऽ उपासितास्त्रियो ये न तु वृद्धाः ते मैथुन्यमिथुनस्त्रावमेव परं
न वानिष्यादियेषु गृहेषु तेषु आशिषो वदंति ॥ इदमद्यमया लब्धमिदं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे
भविष्यति पुनर्धनमित्याशिषः ॥ दांभिकतां प्रपंचयति यजंतीति असृष्टान्नविधानदक्षिणान सृष्टाः न संपा
दिता अन्नविधानदक्षिणा यथा यजंति तदा हि जीविकार्थं परं केवलं पशून्घ्नंति अतत्विदः हिंसा
यथा

रजसा घोरसंकल्पाः कामुका अदिमन्यवः ॥ दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ॥ ७ ॥
वदंति तेन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै
परं घ्नंति पशूनतद्विदः ॥ ८ ॥ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ॥ जात
स्मयेनांधधियः सहेश्वरान्सतोवमन्यंति हरिप्रियान्खलाः ॥ ९ ॥ सर्वेषु शश्वत्तनुभृत्स्ववस्थि
तं ॥ यथा खमात्मानमभीष्टमीश्वरं ॥ वेदोपगीतं च न शृण्वते बुधा मनोरथानां प्रवदंति वार्तया ॥ १० ॥

दोषानभिज्ञाः मानितां प्रपंचयति श्रियेति श्रिया धनादिसंपदा विभूत्या ऐश्वर्येण श्रियादिना जातो यः
स्मयो गर्वस्तेन अंधा धीर्येषां ते ईश्वरसहितान्सतः अवमन्यंते किंच एवं वर्तमानास्ते वेदतत्वार्थं स्फुटमपि न जा म२
नंतीत्याह ॥ सर्वेष्विति केन रूपेणावस्थितं तदाह ॥ आत्मानमीश्वरं आत्मतया ईश्वरतया वा वा अवस्थितं एव
मप्यसंगतमाह ॥ यथा खं पुरुषार्थतामाह ॥ अभीष्टस्फुटमाह ॥ वेदोपगीतं चेति तत्कृतः ॥ यतो मनो
रथानां व्यवायामिषमद्यसेवाविषयाणां वार्तया प्रवदंति प्रवृत्तिपरमिति वर्णयंति ॥ ॥ १० ॥ राम ॥ राम।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ना नासाधनसाध्यक्रियायामेकसाधनप्राप्तौ वा प्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः यथाहुः विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति तत्र चान्यत्र च प्राप्तौ परिसंख्येति अस्यार्थः प्रमाणांतरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः यथा यजेत स्वर्गकाम इत्यादिः स्वर्गार्थकयागस्य प्रमाणांतरेणाप्राप्तस्यानेन विधानात् पक्षे ऽप्राप्तस्य प्रापको विधिर्नियमविधिः यथा व्रीहीनवहंतीत्यादिः अयमेव पक्षे ऽप्राप्तांशपूरक इति नियमः सचानेन विधिना क्रियते ... नत्वेनु ... तत्प्रतिपादने ... सिद्धत्वात् किंतु नियमः स च ... सम्प्रति ... साध्यत्वात् ... तस्या प्राप्तत्वेन तद्विधानकमप्राप्तांशपूरणं नियमः तेन विधिना क्रियते ... नियमविधावप्राप्तांशपूरणं नियमएवतावत् ... पक्षे ऽप्राप्तत्वात् विधानमिति यावत् उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्याविधिः यथा पंच पंचनखा भक्ष्या इत्यादिः ...

ननु व्यवायादीनामपि अनृतौ भार्यामुपेयात् ऋतौ भार्यामुपेयादित्यादिना विहितत्वात् किमेवं निषिध्यंते अत आह ॥ लोके व्यवायः स्त्रीसंगः नित्यः रागत एव नित्यप्राप्ता जंतोः प्राणिमात्रस्य अतस्तत्र तास्तु चोदनाविधिर्नास्ति ननु ऋतावुपेयादित्यादिविधिदर्शितः सत्यं नतदयमपूर्वविधिः रागतः प्राप्तत्वात् ॥ किंतु नियमविधिरूपेणारागिणामनृतावाप्तक्रियते तदाह ॥ व्यवस्थितिरिति तेषु व्यवायादिषु केः विवाह यज्ञ सुराग्रहैः विवाह विषय एव व्यवायः कार्यः यज्ञ एवामिषसेवा सौत्रामण्यां सुराग्रहान् गृह्णातीति श्रुतेस्तद्वेवमद्यसेवेति नियमः क्रियते ननु च नियमपक्षे व्यावर्तकत्वात्तन्निदापुष्टा अत आह आसु निवृत्तिरिष्टेति अयं भावः नायं नियमविधिरपि नित्यप्राप्तत्वात् अतो निवृत्तिः परिसंख्यैवात्रास्तु व्यवायामिषमद्यसेवास्तु विधिरिष्टः कथं तर्हि ... व्यवस्थितिरित्युक्तं उच्यते न तावत्परिसंख्याविधिनाशस्त्यानिवृत्तिरुच्यते तथा सत्ये

लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना ॥ व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा

तिस्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् अतः क्वचित्प्राप्यमाणोपपर्थस्य प्रापणं एवमनर्थकमित्य पूर्वविधिद्वारा न्यनिवृत्तिः फलतो भवति तद्यथा ॥ १॥ इमामगृह्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र रशनालिंगतो गर्दभाश्वाभिधानीरशनाद्वये प्राप्यते ॥ मंत्रस्यापूर्वविधिद्वारा परिसंख्योच्यते ॥ यथोक्तं तत्र वार्तिके ॥ अप्राप्तविधिरेवायमतो मंत्रः स्वनिश्चितः ॥ परिसंख्याफलेनोक्ता नविशेषः पुनः श्रुतेरित्यक्त चित् रागतो नित्यप्राप्तस्यांप्रांशापूरणलक्षणस्य नियमफलस्याप्यभावान्नियमविधिद्वारा फलतः परिसंख्या भवति यथा पंचनखाभ ... स्याइति तथा रागतो नित्यवत्प्राप्तस्य व्यवायादेर्विवाहादिनियमे नाप्यनुज्ञाद्वारा परिसंख्यैवेति ननु यद्यप्यनुज्ञानमात्रमेतज्ज्ञेवेति हि ॥ ॥

निषेधपर्यवसितं च पंचनखा भक्ष्या इति वाक्यं ननु पंचनखभक्षणस्य रागतः प्राप्तत्वादितरव्यावृत्तिबोधको विधिः परिसंख्याविधिरित्युक्ते न कलंजं भक्षयेदित्यादि निषेधवाक्येतिव्याप्तिरतस्तदाहरणयोरुभयप्राप्ताविति न च नियमपरिसंख्याविधयोः को विशेषः उभयत्रेतरव्यावृत्तेस्तुल्यत्वादिति वाच्यं नियमविधावितरव्यावृत्तिरार्थिकी परिसंख्याविधौ विधेयेति विशेषः ॥

[Left margin:]
अ० ५
पि: परिसंख्याविधिः यथा पंचपंच नखा भक्ष्या इति ... न पंच नखभक्षणं रागतः प्राप्त ... नियमपक्षे पंचनख ... पंचनखभक्षणस्य युगपत्प्राप्तेः पक्षे ऽप्राप्त्यभावात् ... पंच नखभक्षणनिवृत्तिपरिसंख्या ... भवति परिसंख्या ... श्रोतीला ... तेनिवृत्तौ परिसंख्या ... अभिधानात् पंच पंचनखा भक्ष्या ... कीदृशः निवृत्तिवाचक ... दाभावात् ... दोषत्रयं च ... निवृत्तकल्पना प्राप्तबाध ... श्रुतस्य पंचनखभक्ष ... पंचनखभक्षणनिवृत्ति ... त्वात् प्राप्तस्य पंचनखभक्षणात् इति ... पंच ... पंचनखभक्षणादपंच ... प्राप्तं पंचनखभक्षणमवधा

[Right margin:]
श्रीरा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दोषरहितं १

श्री
भा. गु.
ए. टी.
२२

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ॥ घोरायां भ्रूणहत्यायां पच्यते नात्र संशय इत्यादिदोषश्रवणान्न स्या
त् ॥ नैष दोषः मनसि कामे सत्यपि तस्यामरुच्या द्वेषादिना वा तामनुपगच्छतो दोषश्रवणोपपत्तेरिति सर्व
मनवद्यं तात्पर्यमित्यर्थः ॥ तदेवं व्यवायादिमनोरथोज्ज्वलितत्वादभीष्टमात्मानं न स्पृशंतीत्यभिहितं इदानीं युक्तम् ३।२।
धनस्यापि धर्मद्वारा परमात्मप्रापकस्य दृष्टोपभोगार्थं विनियोगात्त आत्मतानं गच्छंतीत्याह धनं चेति धर्म एवैकः फल
यस्य तत् यतः धर्मात् सविज्ञानमपरोक्षज्ञानसहितं ज्ञानं परोक्षज्ञानं भवति कथंभूतमनुप्रशान्ति अनन्तरमे
व प्रकृष्टा शांतिः निर्वाणलक्षणा यस्य तत् एवंभूतं धनं गृहेषु देहाद्यर्थं युंजंति ॥ १२ ॥ किंच व्यवस्थयापि

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति ॥ गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति
दुरंतवीर्यं ॥ १२ ॥ यद्घ्राणभक्षो विहितः सुरायाः तथा पशोरालभनं न हिंसा ॥ एवं व्यवायः प्रजया
न रत्या इमं विशुद्धं न विदुः स्वधर्मम् ॥ ॥ १३ ॥

व्यवायाद्यभ्यनुज्ञा न यथेष्टं अपि तु नियम्यैवेत्याह ॥ यदिति यस्मात्सुरायाः घ्राणभक्षः अवघ्राणं स एव विहि-
तः न पानं तथा पशोः आलभनमेव विहितं न तु हिंसा अयमर्थः ॥ देवतोद्देशेन यत्पशुहननं तदालभनं वा
यव्यं श्वेतमजमालभेतेत्यादिश्रुतेः न तु हिंसा ॥ या वेदविहितां हिंसां निकीर्त्यंते इति वचनात् भक्षणोद्देशे-
न तु क्रियमाणं लौकिकहननवत् अत्र वा आलभनमेव विहितं न तु हिंसा अतो न यथेष्टमभक्षणाभ्यनुज्ञे-
त्य र्थः व्यवायोपि प्रजया निमित्तभूतया न तु रत्या अतो मनोरथवादिन इमं विशुद्धं स्वधर्मं न विदुरिति ॥ १३ ॥ राम. २२

हिंसैव २।।   हिंसासान २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं भगवत्परांमुखानां बहुदोषतां प्रपंच्य तत्र विशेषं प्रपंचयति पंचभिः येत्विति अनेवंविदः । न एवं धर्मं विंदंति ये ते विस्रब्धाः निःशंकाः
अनेन मनोरथो भविष्यतीति विश्वस्ता वा ॥ इदानींतन योषणेन वा ते पशुभिर्विश्वस्ताः ते पशवः प्रेत्य अमुत्र तान् खा
दंति ॥ मांसभक्षयिता अमुत्र यस्य मांसमिहाद्म्यहं ॥ एतन्मांसस्य मांसत्वं प्रवदंति मनीषिण इति वचनात् ॥१४॥ अभि
चारादिना द्विषंतः ॥ मृतके देहे ॥ सानुबंधे पुत्रादिसहिते ॥१५॥ अत्र तांस्तत्त्वैरनुकंपितः तरंतीति तत्र तानाह त्वतः ये
तु नात्यंतमत्ताः न च तत्त्वज्ञाः तेऽतरालवर्तिनः पतंतीत्याह ॥ ये इति ॥ कैवल्यं तत्त्वज्ञानमसंप्राप्ताः अत्र हेतुः त्रि

ये त्वनेवंविदोऽसंतः स्तब्धाः सदभिमानिनः ॥ पशून्द्रुह्यंति विस्रब्धाः प्रेत्य खादंति ते च तान् ॥१४॥ द्विषंतः
परकायेषु स्वात्मानं हरिमीश्वरम् ॥ मृतके सानुबंधेऽस्मिन् बद्धस्नेहाः पतंत्यधः ॥१५॥ ये कैवल्यमसं
प्राप्ता ये चातीताश्च मूढताम् ॥ त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते ॥१६॥ एत आत्महनोऽशां
ता अज्ञाने ज्ञानमानिनः ॥ सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः ॥१७॥ हित्वात्मायासरचिता गृहा
पत्यसुहृच्छ्रियः ॥ तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः ॥ ॥१८॥ श्रीरामाय नमः ॥

वर्गप्रधानाः अक्षणिकाः उपशांतिलक्षणरहिताः ॥ देहादिस्थैर्यबुद्धयो वा वा ते स्वयमेव स्वात्मानं घातयंति ॥
१६ ॥ तदाह एत इति आत्महनः आत्मापह्नवकर्तारः अज्ञाने कर्मणि तथा च श्रुतिः असुर्या नाम ते लोका अं
धेन तमसा वृताः ॥ तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना इति ॥१७॥ या गृहापत्यसुहृच्छ्रियस्ता हित्वा ॥१८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदेवं भगवद्भक्तिरेव कर्तव्येति स्थिते तत्र विशेषं पृच्छति कस्मिन्काले इति किंवर्णः कीदृग्वर्णो वान् कीदृशः की
दृगाकारः केन वा नाम्ना केन वा विधिना पृथुक्तानादिकालेषु नानाप्रकाराः वर्णाभिधाकाराद्युस्पसः नानैव वि
धिनाविविधेनैव मार्गेण ॥१९॥ तदेव वर्णादि चतुष्टयमाह ॥ कृत इत्यादिना ॥२०॥ कृष्णाजिनादीन बिभ्रदिति २१

राजोवाच ॥ कस्मिन्काले स भगवान् किंवर्णः कीदृशो नृभिः ॥ नाम्ना वा केन विधिना पूज्यते तदिहोच्यतां
१९ ॥ करभाजन उवाच ॥ कृते त्रेता द्वापरे च कलिरित्येषु केशवः ॥ नानावर्णाभिधाकारो नानैव वि
धिनेज्यते ॥ २० ॥ कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलांबरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडक
मंडलून् ॥ २१ मनु ष्यास्तु तदा शांता निर्वैराः सुहृदः समाः ॥ यजंति तपसा देवं शमेन च दमे
न च ॥ २२ ॥ हंसः सुपर्णो वैकुंठो धर्मो योगेश्वरोऽमलः ॥ ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते
त्रेतायां रक्तवर्णोसौ चतुर्बाहुस्त्रिमेखलः ॥ हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः २४
तं तदा मनुजा देवं सर्वदेवमयं हरिम् ॥ यजंति विद्यया त्रय्या धर्मिष्टा ब्रह्मवादिनः ॥ २५ ॥

ब्रह्मचारिवेषो दर्शितः तपसा ध्यानेन ॥ २२ ॥ २३ ॥ त्रिगुणादीक्षांगभूता मेखला यस्य सः ॥ यज्ञ
मूर्तिः ॥ हिरण्यकेशः ॥ पिशंगकेशः ॥ २४ ॥ त्रय्या विद्यया वेदत्रयोक्तकर्मभिः ॥ २५ ॥ राम ॥
ॐ नमः कमलदलविपुलनयनाभिरामाय श्रीरामचंद्राय नमो नमः ॥ ॥ ॥ राम ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पृश्निगर्भः तस्य पुत्रः वृषाकपिस्ततः सनूँश्चाकंपयति च [illegible] लोके प्राणिनि तान् घाजयत्येवंसर्वदा जयतेतः॥२६॥ श्यामः अत
सीपुष्पसंकाशः निजानि चक्रादीन्यायुधानि यस्य सः॥ श्रीवत्सो नाम वक्षसो दक्षिणभागे रोम्णां प्रदक्षिणावर्तः
स श्रादिर्येषां करचरणादिगतपद्मादीनां तैः विह्नैः॥ लक्षणैर्बाह्यैः कौस्तुभादिभिः॥२७॥ महाराजोपलक्षणं
छत्रचामरादियुक्तं वेदतंत्राभ्यां वैदिकेनागमिकेन चा मार्गेण यजंति पूजयंति परमीश्वरं ज्ञातुमिच्छवः॥२८

विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः॥ वृषाकपिर्जयंतश्च उरुगाय इतीर्यते॥२६॥ द्वापरे भगवान्
श्यामः पीतवासा निजायुधः॥ श्रीवत्सादिभिरंकैश्च लक्षणैरुपलक्षितः॥२७॥ तं तदा पुरुषं मर्त्या
महाराजोपलक्षणं॥ यजंति वेदतंत्राभ्यां परं जिज्ञासवो नृप॥२८॥ नमस्ते वासुदेवाय नमः संकर्ष
णाय च॥ प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः॥२९॥ नारायणाय ऋषये पुरुषाय महात्मने॥
विश्वेश्वराय विश्वाय सर्वभूतात्मने नमः॥३०॥ इति द्वापर उर्वीश स्तुवंति जगदीश्वरम्॥ नानातंत्र
विधानेन कलावपि तथा शृणु॥३१॥ कृष्णवर्णं त्विषाकृष्णं सांगोपांगास्त्रपार्षदम्॥ यज्ञैः सं
कीर्तनप्रायैर्यजंति हि सुमेधसः॥ ॥॥३२॥ ॥

नामान्याह नमस्त इति नानातंत्रविधानेनेति कलौ तंत्रमार्गस्य प्राधान्यं दर्शयति वृत्तांतं व्यावर्तयति॥३१॥ त्वि
षा कांत्या अकृष्णमिंद्रनीलमणिवदुज्ज्वलं यद्वा त्विषा कृष्णावतारं अनेन कलौ कृष्णावतारस्य प्राधान्यं द
र्शयति॥ अंगानि हृदयादीनि उपांगानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदाः सुनंदादयः तैः सहितं
यज्ञैः अर्चनैः संकीर्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः सुमेधसो विवेकिनः॥ ॥॥ ३२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰ग॰
प्र॰टी॰
२५

स्तुतिमाह ॥ ध्येयमिति ॥ हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे कथंभूतं ध्यातुं योग्यं सदेति सर्वत्र संबध्यते ध्येय
विहेतवः इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारः तं हंतीति तथा तत् किंच अभीष्टदोहं मनोरथपूरकं किंच
तीर्थास्पदं गंगायाश्रयत्वेन परमपावनं शिव विरिंचाभ्यां नुतं ते स्तुतं महत्तमैर्नतं नुतोक्तताश्री देवा किमर्थं
ताभ्यां स्तुतं तत्राह शरण्यं आश्रययोग्यं स्तुत्वात्मकमित्यर्थः ॥ तर्हि ब्रह्मादिस्तुतत्वात् प्राकृतस्य कथं गोचरं स्यात् तत्र न भृत्या
र्तिहं यस्य कस्यापि भृत्यमात्रस्यार्तिं हंतृ न केवलमागतकार्तिकामात्रं हंतीति किंतु भवाब्धिपोतं संसारार्णवतारकं च

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं ॥ भृत्यार्तिहं प्रणतपाल भवाब्धि
पोतं वंदे महापुरुष ते चरणारविंदम् ॥ ३३ ॥ ॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आ-
र्यवचसा यदगादरण्यम् ॥ मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदम्

३३ ॥ इदानीं स्वयमात्मकामत्वात्त्वैरप्येवं भक्तार्थं च सापेक्षितां दर्शयन् श्रीरामचंद्रं स्तौति त्यक्त्वेति अन्यैः सुदु-
स्त्यजायाः सुरेप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा यदिति य इत्यर्थः ॥ यः अरण्यमगात् ॥ किंच राज्यवैकल्यदर्शनेन
धर्मिष्ठः अतः आर्यस्य गुरोर्दशरथस्य वचसा ॥ किंच ॥ एवं राज्यं त्यक्त्वापि भक्तवत्सल्येन दयितया सीतया ई-
प्सितं मायामृगं स्वर्णाकारं योऽन्वधावत् तस्य भगवतश्चरणारविंदं वंदे ॥ यद्वा हे धर्मिष्ठेति संबोधनं तथा पि
विवक्षितत्वादार्यपदेन संबंधिर्न भवति चरणाविंदमेवोच्यते यच्च मायामृगमन्वधावत् तत्ते पदारविंदं वंदे इत्य-

॥ ३४ ॥ चरणारविंदं

राम॰
२५

र्थायदगादिति १॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

युगानुरूपाभ्यां नाममूर्तिभ्यां ॥ ३५ ॥ एतेषु चतुर्षु युगेषु कलिरेव श्रेष्ठ इत्याह ॥ कलिमिति गुणज्ञाः कलेर्गुणं जानंतीति येन न
यद्दोषा एव बहवस्तथापि कथं सभाजयंति तत्राह सारभागिनः गुणांशग्राहिणः को ऽसौ गुणः तमाह यत्रेति तदुक्तं ॥ ध्याय
न् कृते यजन् यज्ञैस्त्रेतायां द्वापरे ऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति ॥ ३६ ॥ तस्मात्कलौ अतः
तस्मात्संकीर्तनात्परमो लाभो नास्ति यतः संकीर्तनात् ॥ ३७ ॥ किं च कृतादिष्विति अमलाशयाः संतः प्रायः प्रा
यशो भगवति भक्ता भवंति भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह ॥ देवर्षीति आप्ताः पोष्याः कुटुंबिनः इत

एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः ॥ मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ॥ ३५ ॥ कलिं स
भाजयंत्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थो ऽभिलभ्यते ॥ ३६ ॥ न ह्यतः परमो ला
भो देहिनां भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ॥ ३७ ॥ यो ऽसौ कलियुगे प्राप्ते सर्वध
र्मविवर्जिते ॥ वासुदेवपरा मर्त्यास्ते कृतार्था न संशयः ॥ ३८ ॥ ते सभाग्या मनुष्येषु कृतार्था ऽत्यपि नि
श्चितम् ॥ ये स्मरंति स्मारयंति हरेर्नाम कलौ युगे ॥ ३९ ॥ कृतादिषु प्रजा राजन् कलाविच्छंति संभवं
कलौ खलु भविष्यंति नारायणपरायणाः ॥ ३९ ॥ क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ॥ ता
म्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ ३९ ॥ कावेरी च महापुण्या प्रतीची च महानदी ॥ ये पिबंति
जलं तासां मनुजा मनुजेश्वर ॥ ४० ॥ प्रायो भक्ता भगवति वासुदेवे ऽमलाशयाः ॥ देवर्षिभूताप्तनृणां पि
तॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्तम् ॥ ४१ ॥

रे देवादयः पंच यज्ञदेवताः एतेषां यथा अभक्तः ऋणी भवति एवं तेषां किंकरः ॥ तदर्थं नित्यं पंचयज्ञादिकर्तीत
थावस्मरति हीनजातिं परिहीणामृणार्थं कर्म कारयेदिति ॥ अयं तु न तथा को ऽसौ यः सर्वभावेन मुकुंदं श
रणं गतः कर्तं कृत्यं परिहृत्य यद्वा कर्तं भेदं परिहृत्य कृती छेदन इत्यस्मात् वासुदेवः सर्वमिति बुद्ध्येत्यर्थः ५१

विहितकर्मनिवृत्तेर्मुमुक्षोर्निषिद्धनिमित्तप्रायश्चित्तनिवृत्तिमाह स्वपादमूलमिति त्यक्तः अन्यस्मिन्देहादौ देवतांतरे वा
भावो येन तस्य तथाभूतस्य विकर्मणि प्रवृत्तिर्न संभवति॥ यच्च कथंचित्प्रमादादिना उत्पतितं भवेत्॥ तदपि हरिर्धु-
नोति न तु यमस्तत्र मन्येत॥ तत्राह परेशः ननु च स्मृतिश्रुती ममैवाज्ञे इति भगवद्वचनात्त्वाज्ञाभंगे कथं स्नेहेन
तत्राह प्रियस्य ननु तथापि पापक्षयार्थं भजते तत्राह हृदि संनिविष्टः॥ न हि वस्तुशक्तिरर्थितामपेक्षत इत्यर्थः॥ ४२

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः॥ विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृ-
दि संनिविष्टः॥ ४२॥ श्रीनारद उवाच॥ धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः॥ जायंतेयान्मुनीन्
प्रीतः सोपाध्यायो ह्यपूजयत्॥ ४३॥ ततोंतर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः॥ राजधर्मानुपातिष्ठन्न-
वाप परमां गतिं॥ ४४॥ त्वमप्येतान्महाभाग धर्मान्भागवतान् श्रुतान्॥ आस्थितः श्रद्धया युक्तो निः-
संगो यास्यसे परम्॥ ४५॥ युवयोः खलु दंपत्योर्यशसा पूरितं जगत्॥ पुत्रतामगमद्यद्वां भगवानीश्व-
रो हरिः॥ ४६॥ दर्शनालिंगनालापैः शयनासनभोजनैः॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्व-
तोः॥ ४७॥ ॥

जायंतेयान् जयंत्याः पुत्रान्॥ ४३॥ उपातिष्ठन् अन्वतिष्ठन्॥ ४४॥ निःसंगो भूत्वा शास्त्रप्रक्रियेयमुक्ता युवां तु
प्रसंगत एव कृतार्था इत्याह॥ युवयोरिति वां युवयोः॥ न च सर्वकर्मार्पणादिभागवतधर्मैरन्येषामिव युवयोः स-
त्वशुद्धिरापादनीया पुत्रोपलालनेनैव भागवतधर्मसर्वस्वनिष्पत्तेरित्याह दर्शनेनेति कृष्णे पुत्रस्नेहं प्रकु-
र्वतोर्वा तस्य दर्शनादिभिरात्मा पावितः शोधितः॥ ॥ ॥४७॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एतदेवकैमुत्यन्यायेनस्फुटयति॥ वैरेणेतियंशयनासनादौवैरेणापिध्यायंतस्तस्यगतिविलासाद्यैः आकृतधि
यः तदाकाराः धीर्येषांतेतत्साम्यमापुः॥ किंपुनर्वक्तव्यमनुरक्तधियांतत्साम्यंभवतीति॥ ४८॥ ननुपुत्र
स्नेहस्यमोहहेतुः नहिंसवैमुच्येरन्॥ तत्राह॥ मापत्यबुद्धिमिति अपत्यमितिबुद्धिमाकृथाः अत्रागमः ह्राद

वैरेणायंनृपतयः शिशुपालपौंड्रसाल्वादयोगतिविलासविलोकनाद्यैः॥ ध्यायंतआकृतधि
यः शयनासनादौतत्साम्यमापुरनुरक्तधियांपुनः किं॥ ४८॥ माप्रत्यबुद्धिमकृथाः कृष्णेसर्वात्म
नीश्वरे॥ मायामनुष्यभावेनगूढैश्वर्येपरेऽव्यये॥ ४९॥ भूभारासुरराजन्यहंतवेगुप्तयेसतां॥ अव
तीर्णस्यनिर्वृत्यैयशोलोकेवितन्वते॥ ५०॥ शुक उवाच॥ एतच्छ्रुत्वामहाभागोवसुदेवोतिविस्मितः
देवकीचमहाभागाजहतुर्मोहमात्मनः॥ ५१॥ इतिहासमिमंपुण्यंधारयेद्यःसमाहितः॥ सवि
धूयेहशमलंब्रह्मभूयायकल्पते॥ ५२॥ इतिश्रीभागवतेपंचमेध्यायः॥ ॥ ५ ॥

सः॥ ४९॥ ननुकथमीश्वरोमानुष्यः स्यात्॥ कथंवातस्यविश्वस्रष्टादिकर्तुः पूतनाशोषणादिकर्माश्च
र्यमिवनिरूप्यते तत्राह भूभारेति भूभाराः असुराएवयेराजन्यास्तेषांहंतवेतान्हंतुंनिर्वृत्यैमोक्षाय॥ ५०॥ इहअत्र
सितेत्रैवदेहेशमलंमोहंविधूयब्रह्मत्वायकल्पते॥ ५२॥ इतिश्रीभावार्थएकादशेपंचमः॥ ॥ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग. ए. टी. २०

वष्टब्रह्मादिभिस्त्वागंतुं वित्तापितं हरिं ॥ उद्धवः प्रार्थयामास स्वधाम नयमामिति अतः परमतिविस्तारेणा-
त्मविद्यां निरूपयितुं तत्प्रस्तावमाह ॥ अथेति आत्मजैः सनकादिभिः अभ्यगात् द्वारकामिति चतुर्थेनान्वयः न
नु तेषामपि ऐंद्रादिरूपं भगवंतं नित्यं पश्यतां कोयमिति दिदृक्षा अत आह ॥ वपुषेति ॥ येन वपुषा नरलोकमनोर

श्रीबादरायणिरुवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोभ्यगात् ॥ भवश्च भूतभव्येशो ययौ भूतग-
णैर्वृतः ॥ १ ॥ इंद्रो मरुद्भिर्भगवानादित्या वसवोश्विनौ ॥ ऋभवोंगिरसो रुद्रा विश्वे साध्याश्च देवताः ॥ २ ॥
गंधर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिंनराः ॥ ३ ॥ द्वारकामु-
पसंजग्मुः सर्वे कृष्णदिदृक्षवः ॥ वपुषा येन भगवान्नरलोकमनोरमः ॥ ४ ॥ यशो वितेने लोकेषु सर्-
वलोकमलापहं ॥ ४ ॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ॥ ५ ॥ व्यचक्षतावितृप्ताक्षाः कृ-
ष्णमद्भुतदर्शनम् ॥ ५ ॥ स्वर्गोद्यानोपगैर्माल्यैः छादयंतो यदूत्तमम् ॥ गीर्भिश्चित्रपदार्थाभिः तुष्टु-
वुर्जगदीश्वरम् ॥ ६ ॥

मः सन् सर्वलोकेषु यशो वितेने तदतिसुंदरं वपुः दिदृक्षवः व्यचक्षत अपश्यन् ॥ ५ ॥ स्वर्गोद्यानस्थैर्माल्यैः
चित्राणि सुंदराणि अलंकारप्रबंधप्रायाणि पदानि अर्थाश्च यासु ताभिर्गीर्भिः ॥ ॥ ६ ॥ ॥ ॥ राम ॥ राम. २०

बुद्धींद्रियादिभिः॥ दर्शनार्थं प्राणेन च बलं हेतुना दंडवत्प्रणिपातेन नताः वयं नमस्कृतवंतः स्मेति विस्मये यथा
ऊः॥ दोर्भ्यां पदाभ्यां जानुभ्यामुरसा शिरसा दृशा॥ मनसा वचसा वेति प्रणामोऽष्टांग ईरित इति॥ स्मशब्दो
क्तो विस्मयाय विशेषणं कर्ममयात् उरुपाशात् मुमुक्षुभिर्भावयुक्तैः अपि यत्केवलमंतर्हृदि चिंत्यते न तु
दृश्यते तद्वयं नताः॥ अहो भाग्यमित्यर्थः॥ ७॥ ननु ममापि दृष्टादृष्टकर्मकरणात्॥ कुतो मत्पदारविं
दं चिंतनेन कर्मपाशान्मुमुक्षुभिः॥ क्रियते तत्राहुः॥ त्वमिति हे अजित त्वमास्तामिदानीं तन मिदमल्पकर्म

देवा ऊचुः॥ नताः स्म ते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः॥ यच्चिंत्यतेंतर्हृदि
भावयुक्तैर्मुमुक्षुभिः कर्ममयोरुपाशात्॥ ७॥ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं
सृजस्यवसि लुंपसि तद्गुणस्थः॥ नैतैर्भवानजित कर्मभिरज्यते वै यत्स्वे सुखेऽव्यवहितेऽभि
रतोऽनवद्यः॥ ८॥

अमे॰ ८

त्वं व्यक्तं महदादिप्रपंचं सृजसि पालयसि संहरसि च तदप्यात्मन्येव न पृथक् दुर्विभाव्यं मनसापि चिंत
कैंवं तद्गुणस्थः तस्या मायाया गुणेषु नियंतृत्वेनास्थितः॥ अथ च एतैः कर्मभिः॥ भवान्नाज्यते न लिप्यते ऊ
तः॥ यो भवान्॥ अनवद्यः॥ रागादिरहितः यतः स्वे आत्मरूपे सुखे अव्यवहिते। अनावृते अभिरतः अन
त्वकर्मऊर्वं॥ तथात्मारामः॥ परमेश्वर इति मुमुक्षुभिः चिंत्यत इति भावः॥ ८॥ ॥

श्री॰
भा॰ ग॰
ए॰ टी॰
२८

न त्वात्मारामस्य किं कर्मकरणेनेत्यत आहुः शुद्धिरिति ॥ हे ईड्य हे ऋषभ दुराशयानां रागिणां विद्यो-
पासनाविद्यादिभिस्तथा शुद्धिर्न भवति सत्त्वात्मनां सतां ते यशसि श्रवणेन संभृतया परिपुष्टया ॥ प्र-
वृद्धया सच्छ्रद्धया यथा स्यात् परमपावनस्य यशसो वितानाय त्वं कर्माचरणमिति भावः ॥ ९ ॥ त-
देवं तव यशः शुद्धेर्वस्तु शुद्धिहेतुः ॥ अस्माभिस्तु तवाङ्घ्रिरेष्टः अतस्तवाङ्घ्रिर्नोऽस्माकमशुभाशयानां विवि-

शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपः क्रियाभिः ॥ सत्त्वात्म-
नामृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ॥ ९ ॥ स्यान्नस्तवाङ्घ्रि-
रशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः ॥ यः सात्वतैः समवि-
भूतय आत्मवद्भिर्व्यूहेऽर्चितः सवनशः स्वरतिक्रमाय ॥ १० ॥

ध विषयवासनानां धूमकेतुः दाहकः स्यात् कथंभूतः यः क्षेमाय मोक्षाय मुनिभिः प्रेमार्द्र-
हृदा उह्यमानः विध्रियमाणः यश्च सात्वतैः भक्तैः समविभूतये समानैश्वर्याय वासुदेवादिव्यूहेऽर्चि-
तः तेषु चतुर्षु त्रिर्दान्तवद्भिः धीरैः स्वरतिक्रमाय स्वर्गमतिक्रम्य वैकुण्ठप्राप्तये सवनशः त्रिकालमर्चि-

॥१०॥ राम॰ २८

प्र॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच प्रयतपाणिभिः॥ संयतहस्तैर्हविर्गृहीत्वा अध्वराग्नौ आवहनीयादौ याज्ञिकैर्यच्चिंत्यते तेन त्रय्यैव देवतायै हविर्गृहीतं स्यात्तत्रैवाध्यायेद्वषट्करिष्यन्निति वचनात्॥ तत्र हि देवता चिंत्यते अत आह॥ त्रय्या निरुक्तेन विधिना इंद्रादिरूपेणैव यजुषुरूपः किं सततं स्पर्धः॥ उत किंच अध्यात्मयोगे आत्माधिकारे योगे योगिभिरध्यात्मनस्तव मायां अणिमादिसिद्धिं जिज्ञासुभिः॥ तत्कामैर्यच्चिंत्यते परमभागवतैस्तु मुक्तैर्यः परीष्टः सर्वतः यः पूजितः स तवांघ्रिर्नोऽशुभाशयधूमकेतुः स्यादिति पूर्वेणैवान्वयः॥ ॥११॥ एतेषां च मुनिसात्वतादीनां षण्णां सेवकानां मध्ये परमभागवतेषु लक्ष्म्या अपि तव प्रीतिरधिकेति स्तुवंति पर्युष्टयेति हेतुभावः॥ छांदसः॥ अद्यं यत्र वसामि तत्रैव वत्स्यसि पर्युषिता पीयं वसतीति प्रतिपत्निवत्॥ सपत्नीवत्।

यच्चिंत्यते प्रयतपाणिभिरध्वराग्नौ त्रय्या निरुक्तविधिनेश हविर्गृहीत्वा॥ अध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः परीष्टः॥ ॥११॥ पर्युष्टया तव विभो वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्निवच्छ्रीः॥ यः सुष्ठु प्रणीतममुयार्हणमाददन्नो भूयात्सदांघ्रिरशुभाशय धूमकेतुः॥ १२॥

श्रीः संस्पर्द्धमाना भवति॥ तथापि तां स्पर्द्धमानां श्रियमनादृत्य यो भवान्पर्युषितयापि अमुया वनमालया भक्तैः रर्पितेयमिति प्रीत्या सुष्ठु प्रणीतं सुपुरस्कृतं यथा भवति तथार्हणं पूजामाददत्स्वीकृतवान् तस्य तवांघ्रिर्नः॥ अशुभाशयधूमकेतुर्भूयात् तं सुष्ठु प्रणीतमर्हणमाददत॥ स नोऽशुभाशयधूमकेतुर्भूयादित्यन्वयः॥ अथवैवं संबंधः॥ एतेभ्यो ध्यानार्चनादिनिष्ठेभ्योपि त्वद्यशसि श्रद्धावत्सु वृद्धेनैव पक्षपातो भगवतो यशः प्रियत्वादित्याह॥ पर्युष्टयाव शक्तानाविभस्मास्मदितः सर्वांगेजष्टयाक्रांतया शोभितं वनमालया वत्स्यसि एकदेशे वर्तमाना श्रीः संस्पर्द्धमाना भवति तथाप्यनादृत्य मत्त्वात्रैनैवं कृष्णावर्णितया कीर्तिमय्या वैजयंत्या वनमालयेव यो भवान्सुष्ठु प्रणीतमर्हणमाददादित्यादि पूर्ववत्॥

या२

यद्वायोंघ्रिरस्मयाहै

त्रिषुलोकेषुपतंती

श्री
भा॰ गु॰
ए॰ टी॰
२९

तच्चरणस्य भक्तेषु पदस्य पातः प्रसिद्ध एवेति स्तुवंतः प्रार्थयंते केतुरिति बलिबंधने त्रिभिर्विक्रमैर्युतः तत्र
द्वितीयविक्रमे सत्यलोकं गतः । तत्पादः केतुरत्युच्छ्रितो विजयध्वज इव तत्संपादयतीति त्रिपतत्पता-
कः त्रिधा पतंती गंगा पताका यस्य सः ॥ तथासुरसुरदेवचम्वोरुभयोर्भयाभयकरः साधुषु स्वर्गाय स्व-
र्गाय खलेषु इतरेषु इतराय अधोगमनाय य एव केतुरूपस्ते पादः स भजतां नः अघं पुनातु शोध-

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेव
चम्वोः । स्वर्गाय साधुषु खलेष्वितराय भूमन् पादः पुनातु भगव
न्भजतामघं नः ॥ १३ ॥ ॥

यत्र स्रवादिति पाठे भजतां नः इति कर्मणि षष्ठी अत्र वा भजतोऽस्मान् पुनात्विति तथा च श्रुतिः
चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुःकृतानि । तेन पवित्रेण शुद्धेन पूता अतिपाप्मा
नमरातिं तरेम । लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् अमृतस्य धारा बहु
धा दोहमानं चरणं नो लोके सुधितां दधात्विति ॥ ॥ १३ ॥ ॥ राम ॥ ॥

राम॰
२९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गन्तुं बुद्धेर्देवास्तवादयः परस्यं ब्रंजयंति जीर्यंते वा किं पुनरन्ये तेनातनवक्तुः ॥ नसीतिमिथुः मिथः वर्धमाना पुष्टाः दिभिः
पीड्यमाना वर्षमादयो पि यस्य तत्ववशो भवंति न तु जेयपराजेयवास्तवं तन्नाः करेवनसिनासिका याउता: नासिका
माविष्यवृद्धाः गावो बलीवर्दाः इव ॥ कृतः कालस्य कल यितः प्रवर्तकस्य तेदेवद्रुता ॥ प्रकृतिपुरुषयोरपि
परस्य तस्येतपुरुषोत्तमस्य पादेतः शांतनो तु ॥ ४ ॥ प्रकृतिपुरुषाभ्यां परत्वमुपपादयंतः कालत्वेन पुरुषत्वमा

नेर्स्यंतर्गविश्वस्य वशे भवंति ब्रह्मादयस्तनुभृतां मिथ्यवर्धमानाः ।का
लस्यते प्रकृतिपुरुषयोः परस्य धाम्नस्तनोतु चरणः पुरुषोत्तमस्य ॥ ४
ग्रस्यासिहेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि काल
माहुः । सोयं त्रिणाभिरखिलापचये प्रवृ
त्तः । कालो गभीरवय उत्तमपू
रुषस्त्व ॥
१५

त्रः श्रेष्ठस्य जगतः उदयादीनां हेतुत्वमित्यतः अव्यक्तं प्रकृतिः जीवः पुरुषः महान् महत्तत्वं तेषां कालं नियं
तावंतमाहुः श्रुतयस्ततः परः महतः परमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्याद्य
श्रुतयः किं वक्ष्ये संवत्सरात्मकोयं कालः त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सोपि त्वमेव वृत्तः सु
त्तमपुरुषत्वं तथा वर्णितास्ते ॥ यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मिं लोके वेदे च प्रथितः पुरुषो

ल२

श्री
भाग
टी०
४४

त्वमेव पूर्वकृत्यादि हारा जगत्सृष्ट्यादिहेतुर्विभुत्वं तत्केन प्रकारेणेत्यत आह। त्वमिति त्वं प्रकृतेर्वीर्यशक्तिं स
मधिकृत्य प्राप्य यया सह महदादिगर्भमिव विश्वस्य गर्भमिव सोयं महानतः एवमायया अनुगतः सन् स्वात्मनः
सकाशात्सृष्टे कोशे ससर्ज तथानुगत इति पाठे पितया मायया त्वया पिहितः ॥२८॥ नन्वेवंभूतमीश्वरं वे
म म नो विद्यानेन्द आह। तदिति तस्मात्तस्य सर्वस्य स्थावरस्य च जङ्गमस्य च भवान् अधीशः यत्त्वस्मा
न्मायया अन्याऽजेत्यभिता यागुणविक्रिया इन्द्रियवृत्तिः तयोपनीतान् अर्थान् विषयान् जुषमाणोऽपि हृषी
कपतेन न लिप्तः तं येव न्ये जीवा यया विना वास्वतः परिहृतादपि प्रविय मानान्य काद्या विषयजो पणाहिस्य

तत्रः इमान्समपिकृत्य यया स्य वीर्यं येन महातमिव गर्भममोच वीर्यं सोयं तयानुगतस्त्वात्म।
नश्चाण्डकोशे हैमं ससर्ज बहिरावरणोपेतं ॥२८॥ तदिदं स्थास्नु जङ्गमस्य भवानधीशो यन्मायया।
त्मगुणा विक्रिययोपनीतान् ॥ अर्थान् जुषन्नपि हृषीकपतेन नालिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्य
ति स्म ॥३७॥ स्मायावलोकलवदर्शितभावहारिभ्रूमण्डलप्रहितसौरतमन्त्रशौण्डैः पत्न्यस्तु षो
डशसहस्रमनङ्गबाणैर्यस्येन्द्रियं विमथितुं करणैर्न विभ्व्यः ॥३८॥ ॥ ॥ ॥ ॥

तिवासनामात्रेण कथं तरत्यर्थः ॥३७॥ स्मित्वमाह। स्मयंतिस्मयावलोकोऽस्मदस्मितविलसितावलोकः
तस्य लवः कटाक्षः तेन दर्शितेन भावेन हारिणा वियत भ्रूमण्डलेन प्रहिता ये सौरतमन्त्राः तैः शौण्डैः प्र
गल्भैरनङ्गबाणैः संमोहनैकरणैः कामकलाभिः षोडशसाहस्रं पत्न्यः यस्येन्द्रियमनः विमथितुं क्षो
भयितुं न विभ्व्यः न समर्था समभवान् अलिप्त इति पूर्वेणान्वयः ॥३८॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्मात्तवअमृतरूपायाकथायास्तदेवउदंउदकंवहंतीतितथाकीर्तिनद्याः तथापादावनेजसरितोगंगाद्याश्चत्रिलो
क्याः शमलानिहंतुंविभ्वः केनप्रकारेणआनुश्रवंगुरोरुच्चारणमनुश्रूयतइत्यनुश्रवोवेदः तत्रभवंकीर्ति
रूपं तीर्थंश्रुतिभिः श्रवणेंद्रियैः अंघ्रिजंचांगसंगैः एवंशुचिषदः स्वाश्रमधर्मस्थितास्तवतीर्थद्वयमुप

विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानिहंतुं॥ आनुश्रवंश्रुतिभिरंघ्रि
जमंगसंगैः॥ तीर्थद्वयंशुचिषदस्तउपस्पृशंति॥१९॥ बादरायणिरुवाच॥ इत्यभिष्टूयविबुधैः से
शः शतधृतिर्हरिं॥ अभ्यभाषतगोविंदंप्रणम्यांबरमाश्रितः॥२॥ श्रीब्रह्मोवाच॥ भूमेर्भारावतारा
य पुराविज्ञापितः प्रभो॥ त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं॥२१॥ धर्मश्चस्थापितः सत्सुसत्य
संधेषुवैत्वया॥ कीर्तिश्चदिक्षुविक्षिप्तासर्वलोकमलापहा॥२२॥ अवतीर्ययदोर्वंशेबिभ्रद्रूपमनुत्तमं
कर्माण्युद्दामवृत्तानिहितायजगतोकृथाः॥२३॥ यानितेचरितानीशमनुष्याःसाधवःकलौ॥ शृण्वंतः
कीर्तयंतश्चतरिष्यंत्यंजसातमः॥२४॥ यदुवंशेवतीर्णस्यभवतः पुरुषोत्तम॥ शरच्छतंव्यती
यायपंचविंशाधिकंप्रभो॥२५॥ नाधुनातेखिलाधारदेवकार्यावशेषितं॥ कुलंचविप्रशापेननष्ट
प्रायमभूदिदं॥ ततः स्वधामपरमंविशस्वयदिमन्यसे॥ सलोकान्लोकपालान्नः पाहिवैकुंठकिं
करान्॥२७॥ श्रीभगवान्॥ अवधारितमेतन्मेयदात्थविबुधेश्वर॥ कृतंवः कार्यमखिलंभूमेर्भारो
वतारितः॥२८॥ तदिदंयादवकुलंवीर्यशौर्यश्रियोद्धतं॥ लोकंजिघृक्षद्रुद्धंमेवेलयेवमहार्णवः॥२९

स्पृशंतिसेवंतइति॥१९॥ विबुधैः सह दिक्षुविक्षिप्ता विस्तारिता उद्दामानि वृत्तानि विक्रमा येषु तानि कर्माणि
वीर्यशौर्यप्रकृत्याश्रिया॥ ॥ श्रीरामचंद्रायनमः॥ ॥ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री० भा० ए० टी० ११

उद्वेलेन लंघितमर्यादेन वै कुलं यास्यन् तव भवनं यास्यामि ॥ प्रभासं यास्याम इति वदतोयमभिप्रायः एते देवां
शाः स्वाधिकारानेवार्हंतीति न तत्समीपे मोदं द्वारवत्यां मत्तामच्येरन् ॥ तस्मादभ्युदयफलं प्रभासं नेष्यामीति दक्ष

यद्यसंहृत्य दृप्तानां यदूनां विपुलं कुलं ॥ गंतास्म्यनेन लोकोयमुद्वेलेन विनंक्ष्यति ॥ ३०॥ इदानीं नाश
आरब्धः कुलस्य द्विजशापजः ॥ यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ॥ ३१॥ श्रीशुक उवाच ॥ इत्युक्तो लो
कनाथेन स्वयंभूः प्रणिपत्य तं ॥ सह देवगणैर्देवाः स्वधाम समपद्यत ॥ ३२॥ अथ तस्यां महोत्पातान्द्वा
रवत्यां समुत्थितान् ॥ विलोक्य भगवानाह यदुवृद्धान्समागतान् ॥ ३३॥ श्रीभगवानुवाच ॥ एते वै सु
महोत्पाता व्युत्तिष्ठंतीह सर्वतः ॥ शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः ॥ ३४॥ न वस्तव्यमिहा
स्माभिर्जिजीविषुभिरार्यकाः ॥ प्रभासं सुमहापुण्यं यास्यामोद्यैव मा चिरम् ॥ ३५॥ यत्र स्नात्वा दक्षशापा
त् गृहीतो यक्ष्मणोडुराट् ॥ विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयं ॥ वयं च तस्मिन्नाप्लुत्य तर्प
यित्वा पितॄन्सुरान् ॥ भोजयित्वोशिजो विप्रान्नानागुणवतांधसा ॥ ३७॥ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा
महांति वै ॥ वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवं ॥ ३८ ॥ श्रीशुक उवाच ॥ एवं भगवतादिष्टा याद
वाः कुलनंदन ॥ गंतुं कृतधियस्तीर्थं स्यंदनान्समयूयुजन् ॥ ३९॥ तन्निरीक्ष्योद्धवो राजन् श्रुत्वा भगव
तोदितं ॥ दृष्ट्वारिष्टानि घोराणि नित्यं कृष्णमनुव्रतः ॥ ४०॥ ॥

शापाद्यक्ष्मणा गृहीतश्चंद्रो यत्र स्नानमात्रं कृत्वा किल्बिषात् तस्माद्रोगदुःखान्सद्यो विमुक्तः सन्कलाभिवृद्धिं भेजे ॥ ३६
उशिजान् कमनीयान् अंधसान्नेन ॥ ३७॥ उप्त्वेति यथा क्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं सत्पात्रे इति ॥

राम० ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लोकंमर्त्यलोकं ॥ ४४ ॥ नप्रतिहन्ननप्रतिहतवान् ॥ ४५ ॥ शय्यादिषुत्वांभक्ताः नित्यंसेवितवंतोवयंकथंत्यजेम ॥ ४६ ॥ त्वयेतिचर्चिताअलंकृताः हिनिश्चितंजयेम ॥ ४७ ॥ सं
॥ ४८ ॥ त्वत्तःमयाज्ञानवंतःप्रार्थ्यंयेनमायाभयादित्याह ॥ ४९ ॥ वातरशनाइतिऊर्ध्वरेतसः
न्यासिनोहिब्रह्मचर्यादिनाकथंचित्तरंतिवयंत्वनायासेनैवतरिष्यामइत्याह ॥ वातरशनाइतिऊर्ध्वरेतसः

॥ देव
विविक्तउपसंगम्यजगतामीश्वरेश्वरं ॥ प्रणम्यशिरसापादौप्रांजलिस्तमभाषत ॥ ४८ ॥ उद्धवः देव
देवेशयोगेशपुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलंनूनंलोकंसंत्यक्ष्यतेभवान् ॥ ४९ ॥ विप्रशापंसमर्थो
पिप्रत्यहन्नयदीश्वरः ॥ नाहंतवांघ्रिकमलंक्षणार्धमपिकेशव ॥ ४५ ॥ त्यक्तुंसमुत्सहेनाथस्वधा
मनयमामपि ॥ ४६ ॥ तवविक्रीडितंकृष्णनृणांपरममंगलं ॥ कर्णपीयूषमासाद्यत्यजंत्यन्यस्पृहां
जनाः ॥ ४४ ॥ शय्यासनाटनस्थानस्नानक्रीडाशनादिषु ॥ कथंत्वांप्रियमात्मानंवयंभक्तास्त्यजेम
हि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥ उच्छिष्टभोजिनोदासाःतवमायांजयेमहि ॥ ४६ ॥
वातरशनायऋषयः श्रमणाऊर्ध्वमंथिनः ॥ ब्रह्माख्यंधामतेयांतिशांताःसंन्यासिनोमलाः ॥
वयंत्विहमहायोगिन्भ्रमंतःकर्मवर्त्मसु ॥ त्वद्वार्तयातरिष्यामस्तावकैर्दुस्तरंतमः ॥ ४८ ॥ स्मरं
तःकीर्तयंतस्तेकृतानिगदितानिच ॥ गत्युत्स्मितेक्षणक्ष्वेलियन्नृलोकविडंबनं ॥ ४९ ॥ शुक
एवंविज्ञापितोराजन्भगवान्देवकीसुतः ॥ एकांतिनंप्रियंभृत्यमुद्धवंसमभाषत ॥ ५० ॥ इत्येकादशे

षष्ठोध्यायः ॥ ६ ॥

तावकैर्भक्तैः सहत्वद्वार्तया ॥ ४८ ॥ क्ष्वेलीपरिहासः हंहैकत्वं ॥ ४९ ॥ एकांतिनमित्यादिस्वाभिप्रायवचने
हेतुः ॥ ५० ॥ इत्येकादशेषष्ठोध्यायः ॥ ॥ ६ ॥ राम ॥ राम ॥

योगेश्वर

श्री
भाग०
ए० टी०
७२

सप्तमे तद्द्वयस्यात्मज्ञानसिद्धेर्हरिः स्वयं ॥ अवधूतेतिहासोक्त्या गुरून् षड्विंशति वर्णयत् ॥ यदात्थेत्यस्य संस्तवैपूर्वं तत्कुलमिति स्व
र्वासं वै ऊर्ध्वं वासं प्रति ॥ १ ॥ त्वं च सर्वत्यागेनात्मनिष्ठो भवेति वक्तुमाह कुलमिति त्रयेण ॥ ३ ॥ तदैवायं नष्टमंगलो भ
विष्यति ॥ ४ ॥ न वस्तव्यमेव त्वया ॥ ५ ॥ नन्तु गुणदोषाभ्यां विषमेऽस्मिंल्लोके कुतः समदृष्टिः स्यात्तत्राह यदिदमिति म

श्रीभगवानुवाच ॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभि
कांक्षिणः ॥ १ ॥ मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः
कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येतां पुरीं च प्लावयिष्यति ॥ ३ ॥ यर्ह्ये
वायं मया त्यक्तो लोकोऽयं नष्टमंगलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥ ४ ॥ न वस्तव्यं
त्वयैवेह मया त्यक्ते महीतले ॥ जनोऽधर्मरुचिर्भद्र भविष्यति कलौ युगे ॥ ५ ॥ त्वं तु सर्वं परित्यज्य स्नेहं
स्वजनबंधुषु ॥ मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गां ॥ ६ ॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रव
णादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥ ७ ॥ पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदो
षभाक् ॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥ ८ ॥

नसादिभिर्गृह्यमाणं मनोमयत्वान्मायेति विद्धि तदपि न स्थिरं किं तु नश्वरं च विद्धि ॥ ७ ॥ मनोमयत्वे हेतुः ॥ पुं
स इति ॥ अयुक्तस्य विक्षिप्तमनसः ॥ नानार्थो भेदविषयो भ्रमः स भ्रम एव गुणदोषभाक् ननु वेदेनैव विधिनिषे
धाभ्यां भेदः सत्यतोऽज्ञानभ्रमविजृंभितगुणदोषबुद्धेः पुंसः कर्म विहितं अकर्म तल्लोपः विकर्म निषेधमिति
भेदः अविद्यावद्विषय एव वेद इत्यर्थः ॥ ८ ॥ रामाय नमः ॥

राम०
७२

कथमात्मनिपरिछिन्नैर्विततंजगदीक्षणीयंआत्मानमिति मयिब्रह्मणितद्रूपेणेक्षस्व ॥ ९ ॥ नत्वेवंयुक्तविज्ञाने
नकर्माकरणेदेवादयोविघ्नान्करिष्यंतितत्राह ॥ ज्ञानेनेति ज्ञानेनवेदतात्पर्यनिश्चयः ॥ विज्ञानेनतदर्थानुभवः ता
भ्यांसम्यक्प्रयुक्तः ॥ ततश्चात्मानुभवेनैवतुष्टचित्तः ॥ अतः शरीरिणांदेवादीनामात्मभूतः अंतरायैर्नप्रतिहन्यसे
अयंभावः यावदनुभवंयथाश्रमंकर्माणिकुर्यादेवतदनंतरंसर्वेषामात्माभूतत्वान्नकोपिविघ्नानाचरतीति

तस्माद्युक्तेंद्रियग्रामोयुक्तचित्तइदंजगत् ॥ आत्मनीक्षस्वविततमात्मानंमय्यधीश्वरे ॥ ९ ॥ ज्ञान
विज्ञानसंयुक्तआत्मभूतः शरीरिणां ॥ आत्मानुभवतुष्टात्मानांतरायैर्विहन्यसे ॥ १० ॥ दोषबुद्ध्योभया
तीतोनिषेधान्ननिवर्तते ॥ गुणबुद्ध्याचविहितंनकरोतियथार्भकः ॥ ११ ॥ सर्वभूतसुहृच्छांतोज्ञानवि
ज्ञाननिश्चयः ॥ पश्यन्मदात्मकंविश्वंनविपद्येतवैपुनः ॥ १२ ॥ शुकउवाच ॥ इत्यादिष्टोभगवतामहा
भागवतोनृप ॥ उद्धवः प्रणिपत्याहतत्त्वजिज्ञासुरच्युतम् ॥ १३ ॥ ॥

यथावच्छ्रुतिः ॥ तस्यहनदेवाश्चनभूत्याईशतेआत्माह्येषांसभवतीति ॥ १० ॥ नचोत्पन्नज्ञानस्यापियथेष्टाचरण
प्रसंगइत्याह ॥ दोषबुद्ध्येति ॥ गुणदोषबुद्ध्यातीतोपिप्राक्तनसंस्कारान्निषेधान्निवर्ततएवकिंतुनदोषबु
द्ध्याविहितंचप्रायशः करोतिनगुणबुद्ध्यायथार्भकः संकल्पविकल्परहितः किंचित्करोति ऊनाद्विनि
वर्ततेनहत्तत् ॥ ११ ॥ एवंभूतस्यनपुनः संसारइत्याह ॥ सर्वभूतेतिनविपद्येतनपुनः संसरेत् ॥ १२ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री०
भा०गु०
ए०टी०
२२

क्रियते २ योगेशेति १

ं तेन सर्वं परित्यज्य त्यागमुपदेशमात्मनो योगं मन्वानः पृच्छति योगफलदायिन् योगविदां न्यासो ऽनुमानि गोप्यानि
देयविशेषः यद्वा योगो विन्यस्यतेयस्मिन्योगात्मन् योगे आत्माप्रकटो भवति यस्य योगः स्वरूपे तिष्ठा योगसं
संभवो यस्मात् ॥ चतुर्भिरेतैः संबोधनैः स्वमहिमा केवलं त्वयोपदिष्टं न तु मदधिकारपर्यालोच्येति योगेति तं
तदाह निःश्रेयसायेति न चारोग्याय पृथक् सर्वं स्वदानादिवद्यं त्यागः किं तु संन्यासलक्षणः अयं त्यागो दुःकरः
यं प्रति त्यागायोपदिष्टं सो ऽहं मूढमतिः कृतः ॥ ममेति अहमिति च सानुबंधेषु त्वत्सृष्टेन त्वन्मायया विरचितेष्वा

उद्धव उवाच ॥ योगेश योगविन्यास योगात्मन्योगसंभव ॥ निःश्रेयसाय मे प्रोक्तः त्यागः संन्यासल
क्षणः ॥१४॥ त्यागोयं दुष्करो भूमन्कामानां विषयात्मभिः ॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः ॥१५॥
सोहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे ॥ तत्त्वंजसा निगदितं भवता यथा
हं संसाधयामि भगवन्ननुशाधि भृत्यं ॥१६॥ सत्यस्य ते स्वदृश आत्मन आत्मनोन्यं वक्तारमीश विबुधेष्वपि
नानुचक्षे ॥ सर्वे विमोहितधियः तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥ ॥ ॥१७॥ ॥ राम

त्मनि देहे विगाढो निमग्नः तत्तु भवता निगदितं यथाहमंजसा संसाधयामि तथा भृत्यं मामनुशाधि शिक्षय ॥१६॥ मया संदेहे पतत उक्तं विस्तरतः तत्पुनः पृच्छति चेत् अत आह सत्यस्येति स्वदृशः स्वप्रकाशस्य सत्यस्या
त्मनः आत्मनो मां प्रतिवक्तारं तेन त्वं अन्यं नानुचक्षे न पश्यामि स्वदृशस्त्वं तः सिद्धज्ञानात्त्वत्तोन्यमिति वा
कृत इत्यत आह सर्व इति बहिरर्थभावा विषये एवार्थबुद्धयः ॥ ॥ ॥१७॥ ॥

गी०
२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केचिद्दुःशीलाभवंतिकेचित्सेविताःफलकालेविनश्यंतिकेचिदज्ञाःकेचिद्गुणतोसमर्थाःकेचित्स्थानभ्रष्टाः॥
तथाहस्वयंमनवद्यमित्यादीनिपंचविशेषणानि॥नश्रंतःकालतःपारंदेशतश्चयस्यतेकालादिभिरकुंठो
विकुंठलोकाधिपस्त्वंस्थानंयस्यतेतं॥उद्धेभगवन्नहमकुटनिर्वेदहेतुःवृजिनैर्दुःखैरभितप्तःइकारगौरवायह
कारोद्युक्तइवपठनीयः॥नन्वनवद्यत्वादीनिकुतोममतदाह॥नारायणमिति॥अनुक्तंपितामाह॥नरोजीवः
तस्यसखायंभवंतंशरणंप्रपद्ये॥१८॥तदेवमसंभावनाविपरीतभावनाभ्यामुपदिष्टंतत्त्वमनवगाहमानं

तस्माद्भवंतमनवद्यमनंतपारंसर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं॥ निर्विण्णधीरहमुहेवृजिनाभि
तप्तोनारायणंनरसखंशरणंप्रपद्ये॥१८॥ श्रीभगवानुवाच॥ प्रायेणमनुजालोकेलोकतत्त्वविचक्ष
णाः॥समुद्धरंतिह्यात्मानमात्मनैवाशुभाशयात्॥१९॥आत्मनोगुरुरात्मैवपुरुषस्यविशेषतः॥यत्प्र
त्यक्षानुमानाभ्यांश्रेयोसावनुविंदते॥२०॥पुरुषत्वेचमांधीराःसांख्ययोगविशारदाः॥आविस्तरां
प्रपश्यंतिसर्वशक्त्युपबृंहितम्॥२१॥ ॥

प्रतितत्त्वविद्धत्वयेगुरूपदेशंविनापिस्वान्वयव्यतिरेकाभ्यामेवतत्त्वप्रतिपत्तिर्भवतीतिदर्शयितुमाह॥प्रायेणे
तिलोकतत्त्वस्यविचक्षणाःपरीक्षकाःअशुभाशयात्।विषयवासनातः॥१९॥नन्वुपपादयतिआत्मनःपश्वा
दिशरीरेष्वात्मैवहिताहितज्ञानगुरुः॥२०॥तत्रप्रत्यक्षंदर्शयतिपुरुषत्वेचेतितथाचश्रुतिः॥पुरुषत्वेचाविस्त
रामात्मासहिप्रज्ञानेनसंपन्नतमोविज्ञातंवदतिविज्ञातंपश्यतिवेदश्वस्तनंवेदलोकालोकौमर्त्येनामृत
मीप्सत्येवंसंपन्नोपीतरेषांपशूनामशनापिपासेएवाभिविज्ञानमिति ॥ ॥२१॥ ॥

[illegible]३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री०
भा० ए०
पु० टी०
३४

अतः पुरुषत्वं स्तौति एकेति ॥२२॥ अनुमानमाह अत्रेति अत्र पौरुष्यां पुरि युक्ता अप्रमत्ताः॥ अग्राह्यं ग्राहकेभ्योऽहंका
रादिभ्यो व्यतिरिक्तं मां अद्धा साक्षात् ॥ मार्गयंति मार्गणे प्रकारद्वयमाह ॥ गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः ज
डानां प्रकाशः स्वप्रकाशमेकं विना न घटत इत्यनुपपत्तिमुखेन लक्षकैः तथा तैरेव लिंगैर्व्याप्तिमुखेनानुमान
त ईश्वरं प्रवर्तकं मार्गयंते बुद्ध्यादिकरणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति ॥ तदुक्तं भगवान्सर्वभूते

एकद्वित्रिचतुष्पादो बहुपादस्तथापदः ॥ बह्व्यः संति पुरः सृष्टाः तासां मे पौरुषी प्रिया ॥२२॥ अत्र मां मा
र्गयंत्यद्धा युक्ता हेतुभिरीश्वरं ॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः ॥२३॥ अत्राप्युदाहरंतीममिति
हासं पुरातनं ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥२४॥ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं ॥ कविं
निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥२५॥ यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा
यामासाद्य भवाँल्लोके विद्वांश्चरति बालवत् २६ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः हेतु
नैव समीहंत आयुषो यशसः श्रियः ॥२७॥ ॥

पलक्षितः स्वात्मना हरिः दृश्यैर्बुद्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैरिति न चैतावता आनुमानिक आत्मेति मंतव्
यं देहादिव्यतिरिक्तत्वे पदार्थशुद्धिमात्रस्यैवानुमानेन विवक्षितत्वात् ॥२३॥ भूयोऽन्वयव्यतिरेकाभ्यामसंभावना
दिनिवृत्त्यर्थमितिहासमाह ॥ अत्रापीति ॥२५॥ सुविशारदा अतिनिपुणा ॥२६॥ सर्वलोकवैलक्षण्यमाह प्राय इति ध
र्मादिषु विवित्सायां आत्मविचारे च मानवाः समीहंते प्रवर्तंते अत्रापि आयुरादेर्हेतुना कामनयैव ॥२७॥ ॥ ॥

उ०
३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वंतुनकस्यचित्कर्मणःकर्ताभवसिनकिंचिदीहसे॥ सइच्छसिनतच्छास्त्रार्थावाअप्रवृत्तानेनवाअनैपुण्येनवाविदग्धत्वेनवा
अवाग्मितयावाऔदासीन्यंकुतएवनेत्याहकल्पइत्यादिना॥२७॥ महानानंदस्तवकुतइतिपृच्छति॥ जनेष्वितिस्प
र्शविहीनस्यविषयभोगरहितस्यअत्रहेतुः॥ केवलात्मनःकलत्रादिशून्यस्यबुद्ध्यैवोपाश्रिताःस्वीकृताःनतु

त्वंतुकल्पःकविर्दक्षःसुभगोमृतभाषणः॥ नकर्तानेहसेकिंचिज्जडोन्मत्तपिशाचवत्॥२७॥ जनेषु
दह्यमानेषुकामलोभदवाग्निना॥ नतप्यसेग्निनामुक्तोगंगांभःस्थइवद्विपः॥२८॥ त्वंहिनःपृच्छतां
ब्रह्मन्नात्मन्यानंदकारणं॥ ब्रूहिस्पर्शविहीनस्यभवतःकेवलात्मनः॥२९॥ श्रीभगवानुवाच॥ यदुनै
वंमहाभागोब्रह्मण्येनसुमेधसा॥ पृष्टःसभाजितःप्राहप्रश्रयावनतंद्विजः॥३०॥ श्रीब्राह्मणउवाच॥
संतिमेगुरवोराजन्बहवोबुद्ध्युपाश्रिताः॥ यतोबुद्धिमुपादायमुक्तोटामीहतान्शृणु॥३१॥ पृ
थिवीवायुराकाशमापोग्निश्चंद्रमारविः॥ कपोतोजगरःसिंधुःपतंगोमधुकृद्गजः॥३२॥ मधुहा
हरिणोमीनःपिंगलाकुररोर्भकः॥ कुमारीशरकृत्सर्पऊर्णनाभिःसुपेशकृत्॥ एतेमेगुरवोरा
जन्चतुर्विंशतिराश्रिताः॥ शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः॥३४॥ यतोयदनुशिक्षा
मियथावानाहुषात्मज॥ तत्तथापुरुषव्याघ्रनिबोधकथयामिते॥३५॥ भूतैराक्रम्यमाणोपिधी
रोदैववशानुगैः॥ तद्विद्वान्नचलेन्मार्गादन्वशिक्षंक्षितेर्व्रतं॥३६॥ ॥

पदेशेनसृजामिपर्यटामि॥३१॥ शोभनंरूपंकीटस्यकरोतीतिसुपेशकृत्॥३३॥ तेमयाआश्रितास्तदाह॥ ए
तेषांवृत्तिभिःआत्मनःशिक्षाःशिक्षणीयानर्थान्हेयोपादेयादीन्॥ अन्वशिक्षंअनुशिक्षितवानस्मि॥३४॥ ना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा०ग०
ए०टी०
४५

क्षितेः व्रतं शिक्षितवानित्याह॥ भूतैरिति आक्रम्यमाणः पीड्यमानः तद्विद्वान् भूतानां दैववशवर्तित्वं विद्वान्॥ व-
र्त्मनि यमं पर्वतद्रूपाद्वृक्षद्रूपाच्च या पृथिवी तस्याः शिक्षितमाह॥ शश्वदिति सर्वदा परार्थाः परोपकारार्थाः
सर्वा ईहा यस्य सः परार्थ एव एकान्ततः संभवो यस्य सः॥ भूभृतः पर्वतात् तस्यापि वृक्षात्मत्वेन निर्झरप्रसवक्रिया
परार्था एव यथा तद्वत् तथा नगशिष्यः॥ वृक्षशिष्यः सन् परात्मतां पराधीनात्मतां वृक्षो यथा परैरेव छिद्यो
त्पाद्यो वानयनमप्यनुमन्यते तद्वत्॥ ३७॥ वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणस्य गुणमाह॥ प्राण-
वृत्त्येति प्राणेच्छाहारादिमात्रेण प्रवर्तेत न तु परस्मादीनीन्द्रियविषयवृत्तिं नापेक्षते॥ तथाम्तुनिरपि भवेदित्यर्थः॥

शश्वत्परार्थसर्वेहः परार्थैकान्तसंभवः॥ साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां॥ ३८॥ प्राणवृ-
त्त्यैव संतुष्येन्मुनिर्नैवेन्द्रियप्रियैः॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः॥ ३९॥ विषयेष्वाविश-
न्योगी नानाधर्मेषु सर्वतः॥ गुणदोषव्यपेतात्मा न विषज्जेत वायुवत्॥ ४०॥ पार्थिवेष्विव देहेषु प्रवि-
ष्टस्तद्गुणाश्रयः॥ गुणैर्न युज्यते योगी गन्धैर्वायुरिवात्मदृक्॥ ४१॥ ॥ ४० ॥

प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्यात्॥ अतो देहनिर्वाहः कर्तव्यः गुणान्विष्यायंस्तु वाक् मनश्च वि-
क्षिप्येत अतो नातिकं लिप्स्यादित्याह॥ ज्ञानमिति नावकीर्येत न विक्षिप्येत॥ ३९॥ विषयानेव मानोऽपि तेषु नासक्ति
बाह्याद्वायोः शिक्षितमित्याह॥ विषयेष्विति नानाधर्मेषु शीतोष्णादिधर्मकेषु॥ नहि वायुर्वनेदहनेवासज्जते तद्व-
त्॥ यथा वायुर्गन्धादिधर्मयोगेन प्रतीयमानोऽपि वस्तुतो न तद्योगी॥ ४१॥ एवं देहादिधर्मयोगे नाहंप्रत्यये प्रती-
यमानोऽप्यात्मा न तद्धर्मवानिति संभावितमिति वायोरेव शिक्षितमित्याह पार्थिवेष्वित्यर्थः॥ ॥ ॥ ४० ॥ ॥

राम०
४५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आकाशवच्छिन्नत्वसंभावनाद्वयमाह॥ अंतर्हितश्चेतिद्वयेनअंतर्हितश्चदेहांतर्गतोपिमुनिरात्मनोदेहाद्यसंगेनय
तएवात्मअव्यवच्छेदंचभावयेत् कुतः स्थिरजंगमेषुसमन्वयेनयाव्याप्तिः तयाकिंमणिषुसूत्रस्येवव्याप्तिःनवितत
स्यसर्वगतस्यतत्कुतः ब्रह्मात्मभावेनब्रह्मस्वरूपभावनया॥ तत्त्वमसीतिश्रुतेः नत्वेतत्सर्वैकथंसंभवतितत्रा
हनभस्त्वंनतुल्यत्वंसंभावयेत्॥ यथानभसःसर्वगतस्यनघटादिभिःसंगःपरिछेदोवाएवमात्मनोपिसंभ
वतीति॥४१॥ किंचकूटस्थस्यात्मनोनागमापायिदेहादिसंबंधइत्याह॥ तेजोवन्नमयैःतेजश्चआपश्चअन्नं

अंतर्हितश्चस्थिरजंगमेषुब्रह्मात्मभावेनसमन्वयेन॥ व्याप्त्याव्यवच्छेदमसंगमात्मनोमुनिर्नभस्त्वं
विततस्यभावयेत्॥४२॥ तेजोवन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः॥ नस्पृश्यतेनभस्तद्वत्कालसृष्टै
र्गुणैःपुमान्॥४३॥ स्वच्छःप्रकृतितःस्निग्धोमाधुर्यस्तीर्थभूर्नृणां॥ मुनिःपुनात्यपांमित्रमीक्षो
पस्पर्शकीर्तनैः॥४४॥ तेजस्वीतपसादीप्तोदुर्धर्षोदरभाजनः॥ सर्वभक्षोपियुक्तात्मानादत्तेमलम
ग्निवत्॥४५॥

चपृथिवीचतन्मयैःकालसृष्टैर्गुणैर्देहादिभिः॥पुमान्नसंस्पृश्यतइतिनभोवत्संभवतीति॥४३॥स्वच्छत्वादि
भिर्गुणैः॥उदकंजगत्पुनातीतितद्गुणमयाशिक्षितमित्याह॥स्वच्छःनिर्मलःप्रकृतितःस्वभावतःस्निग्धः
जनेष्वनुरागवान्॥माधुर्यःमधुरालापीतीर्थभूः॥तीर्थस्थानंअपांमित्रमुदकतुल्यः॥अद्भ्यादितिपाठेसात्वा
यंपापात्पुनाति॥स्वच्छत्वादिगुणैरपांउदकसादृश्यंस्तानव्यं॥४४॥अग्नेःशिक्षितमाह॥तेजस्वीतितेजस्वि
त्वातिशयात्॥विशेषतःतपसादीप्तःदुर्धर्षः॥अद्योऽसावुदरभाजनश्चअपरिग्रहः युक्तात्मामुनिः॥पवित्रस्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री. भा. गु. ए. टी. २६

अग्नेरेवदृष्टांतरमाह ॥ क्वचिदितियथाग्निःपरैरुद्दिष्टंहविर्गृह्णातितथायमपीत्याह ॥ दातृणामितिप्रागुत्तरं ए१
अशुभंभूतंभविष्यच्चपापं ॥ ४५ ॥ आत्मनोदेहोपाधिकमेवोच्चनीचत्वादिनस्वाभाविकमित्यग्निदृष्टांतेनसं
भावितमित्याह ॥ स्वमाययेति ॥ स्वमाययास्वाविद्ययासृष्टंसदसल्लक्षणंदेवतिर्यगादिरूपंविप्रशूद्रादिरूपं
वा ॥ ४६ ॥ आत्मनोजन्मादिषड्विकाराभावः ॥ चंद्रदृष्टांतेनसंभावितइत्याह ॥ विसर्गाद्याइतिविसर्गोजन्म
श्मशानंनाशः ॥ तत्रेयंज्योतिःशास्त्रप्रक्रिया ॥ आप्यमंडलंचंद्रःतेजोमयंमंडलमादित्यः तयोरेकनक्ष
त्रावस्थानेचंद्रोनदृश्यते ॥ चतुर्दश्यआदित्यमंडलेनसमदेशस्थितेनव्यवधानात्साअमावास्याअथष

क्वचिच्छन्नः क्वचित्स्पष्टः उपास्यः श्रेयइच्छतां ॥ भुंक्तेसर्वत्रदातृणांदहन्प्रागुत्तराशुभम् ॥ ४५ ॥
स्वमाययासृष्टमिदंसदसल्लक्षणंविभुः ॥ प्रविष्टईयतेतत्तत्स्वरूपोग्निरिवैधसि ॥ ४६ ॥
विसर्गाद्याः श्मशानांताभावादेहस्यनात्मनः ॥ कलानामिवचंद्रस्यकालेनाव्यक्तवर्त्मना ॥ ४७ ॥

ष्टिघटिकाभिःचंद्रोनक्षत्रांतरंगच्छति ॥ आदित्यस्तु त्रयोदशभिरहोरात्रैः अतःप्रतिपदमारभ्यविषमदे
स्थितस्यादित्यमंडलस्यपंचदशःपंचदशोभागआप्यमंडलेप्रतिबिंबितोदृश्यतेसाकलेत्युच्यते एवंपंचद
शेऽह्नि त्रयोदशभिर्नक्षत्रैरंतरमितिराशिचक्रस्यसमविभागेननक्षत्रात्मकस्यमध्येसंमुखीभावेचंद्रादित्ययोरिति ततः
तदासंपूर्णप्रतिबिंबंभूच्छायालांछितंदृश्यतेसापूर्णिमातस्याममावास्याप्रतिबिंबेनसहषोडशकलःचं
द्रःउपचर्यतेततःपुनःप्रतिपदमारभ्यमंडलयोर्विषमीभावात्कलाह्रासःतत्रयथाकलानामेवोत्पत्त्या
दयोनाप्यमंडलस्यतथात्मनोपीत्याह ॥ कलानामिवेति ॥ ॥ ४७ ॥ रामायनमः ॥ ॥ ॥ राम. २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सिंहावलोकनेनाग्निदृष्टांतेनैवदेहानांक्षणभंगुरतयावैराग्यंशिक्षितमित्याहकालेनेतिओघवद्वेगोयस्यतेनआ
त्मनःसंबंधिनांदेहानामित्यर्थः॥४८॥आदित्यात[illegible]शिक्षितमाहद्वयेनगुणैरितिगुणैरिंद्रियैर्गुणान्विषय
याननुपादत्तेयथाकालंअर्थिभ्यागतेसतिविमुंचतिचनतेषुयुज्यतेलक्षुमितिवाभिनिवेशंनकरोतिगोभिःर
श्मिभिःगाजलानिगोपतिःसूर्योयथास्वतोभेदप्रतीतिरूपाधिवशादित्यादिदृष्टांतेनैवसंभावितमित्याह

15

कालेनत्योघवेगेनभूतानांप्रभवाप्ययौ॥नित्यावपिनदृश्येतआत्मनोग्नेर्यथार्चिषाम्॥४८॥गुणैः
गुणाननुपादत्तेयथाकालंविमुंचति॥नतेषुयुज्यतेयोगीगोभिर्गाइवगोपतिः॥४९॥बुध्यतेस्वेनभे
देनव्यक्तिस्थइवतद्गतः॥लक्ष्यतेस्थूलमतिभिरात्माचावस्थितोर्कवत्॥५०॥नातिस्नेहःप्रसंगो
वाकर्तव्यःक्वापिकेनचित्॥कुर्वन्विंदेतसंतापंकपोतइवदीनधीः॥५१॥कपोतःकश्चनारण्येकृ
तनीडोवनस्पतौ॥कपोत्याभार्ययासार्द्धंउवासकतिचित्समाः॥॥५२॥॥

बुध्यतइतिस्वेस्वरूपेवस्थितआत्माभेदेननबुध्यतेअभिव्यनक्तीतिव्यक्तिरूपोभिःव्यक्तिस्थःउपाधौप्रतिबिंबित
स्तद्गतइवउपाधिप्रविष्टइवभेदेनस्थूलमतिभिर्लक्ष्यतेअर्कवदित्यन्वयः॥५०॥कपोतातशिक्षितमाह॥नाति
स्नेहइतिस्नेहःप्रीतिःप्रसंगउपलालनाद्यासक्तिः॥दृष्टांतंप्रपंचयति॥कपोतःकश्चनेति॥॥॥५२॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा ए टी ७

तयोर्मिथः स्नेहप्रसंगोत्दर्शयति ॥ कपोतौ इति त्रयेण स्नेहेन गुणितं तं निबद्धं हृदयं ययोस्तौ ॥ ५३ ॥ विस्रब्धौ निःशं
कौ ॥ ५४ ॥ सा कपोती तर्पयंती सदा सवीक्षिताल्पापादिभिः प्रीणयंती ॥ अत एव तेनानुकंपिता सती यं यं वांछति
तं कामं समनयत ॥ संपादयामास ॥ ५५ ॥ तेषु जलभरितेषु अंडेषु हरेः स्वभावकर्मादिशक्तिभिः रचितावः

कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ॥ दृष्टिं दृष्ट्यांगसंगेन बुद्धिं बुद्ध्या बबंधतुः ॥ ५३ ॥ शय्या
सनाटनस्थानवार्ताक्रीडाशनादिकं ॥ मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ॥ ५४ ॥ यं यं वांछति
सा राजंस्तर्पयंत्यनुकंपिता ॥ तं तं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ॥ ५५ ॥ कपोती प्रथमं गर्भं गृ
ह्णंती काल आगते ॥ अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ॥ ५६ ॥ तेषु काले व्यजायंत रचिताव
यवा हरेः ॥ शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ॥ ५७ ॥ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्स
लौ ॥ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ॥ ५८ ॥ तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः
प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥ ५९ ॥ एकदा जग्मतुः तासामन्नार्थौ तौ कुटुंबिनौ ॥ परितः
कानने तस्मिन्नर्थिनौ चेरतुः चिरम् ॥ ६० ॥ दृष्ट्वा तान्लुब्धकः कश्चिद्यदृच्छातो वनेचरः ॥ जगृहे जा
लमातत्य चरतः स्वालयांतिके ॥ ६१ ॥

स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया विमोहितौ दीनधियौ शिशून् पुपुषतुः प्रजाः २ — शिशून् बालान् = प्रजाः पुत्रान् १

यवाः पक्षिणः कोमलाङ्गानि तनूरुहाश्च येषां ते ॥ ५७ ॥ पतत्रैः पक्षैः अदीनानां अहृष्टानां ॥ ५९ ॥ स्वालयं इति
केवलं ततः क्रीडतः तान् कपोतप्रजान् आतत्य प्रसार्य ॥ ६२ ॥ ॥

राम ७३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उत्सुकत्वादेवचतत्पोषणार्थंगतौपोषणंभक्ष्यं॥ ६३॥ शिचाजालेन॥ ६५॥ आत्मानुरूपांभार्यांविललापअशोच॥
६६॥ विलापमाह॥ त्रयेण॥ अहोइति॥ अतृप्तस्यदृष्टमनुरेवअकृतार्थस्यअदृष्टमसंपादयतः॥ ६७॥ तानाहृता

कपोतश्चकपो[illegible]तीचप्रजापोषेसदोत्सुकौ॥ गतौपोषणमादायस्वनीडमुपजग्मतुः॥ ६३॥ क
पोतीस्वात्मजान्वीक्ष्यबालकान्जालसंवृतान्॥ तानभ्यधावत्क्रोशंतीक्रोशतोभृशदुःखिता॥ ६४
सासकृत्स्नेहगुणितादीनचित्ताजमायया॥ स्वयंचाबध्यतशिचाबद्धान्पश्यंत्यपस्मृतिः॥ ६५॥ कपो
तस्वात्मजान्बद्धानात्मनोप्यधिकान्प्रियान्॥ भार्यांचात्मसमांदीनोविललापातिदुःखितः॥ ६६॥
अहोमेपश्यतापायमल्पपुण्यस्यदुर्मतेः॥ अतृप्तस्याकृतार्थस्यगृहस्त्रैवर्गिकोहतः॥ ६७॥ अनुरू
पानुकूलाचयस्यमेपतिदेवता॥ शून्येगृहेमांसंत्यज्यपुत्रैःस्वर्यातिसाधुभिः॥ ६८॥ सोहंशून्येगृ
हेदीनोमृतदारोमृतप्रजः॥ जिजीविषेकिमर्थंचविधुरोदुःखजीवितः॥ ६९॥ तांस्तथैवावृतान्
शिग्भिर्मृत्युग्रस्तान्विचेष्टितः॥ स्वयंचकृपणःशिक्षुपश्यन्नप्यबुधोपतत्॥ ७०॥ तंलब्ध्वालु[illegible]ब्ध
कःक्रूरःकपोतंगृहमेधिनं॥ कपोतकान्कपोतींचसिद्धार्थःप्रययौगृहम्॥ ७१॥ एवंकुटुंब्यशां
तात्माद्वंद्वारामःपतत्रिवत्॥ पुष्णन्कुटुंबंकृपणःसानुबंधोवसीदति॥ ७२॥ यःप्राप्यमानुषंलो
कंमुक्तिद्वारमपावृतम्॥ गृहेषुखगवत्सक्तःतमारूढच्युतंविदुः॥ ७३॥ इतिश्रीभागवतेएकादश
स्कंधेसप्तमोध्यायः॥ ॥ ७॥ ॥

न्यप्रपन्नपिशितजालेषुदार्थेतिकेयोजयति॥ एवंगृहासक्तिःतिरश्चामप्यनर्थहेतुः॥ ७०॥ मानुषस्यत
तिनिंदितइत्याह॥ यःप्राप्येति॥ ७३॥ इतिश्रीभा[illegible]वार्थदीपिकायांएकादशस्कंधेसप्तमोध्यायः॥ ७॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰स्कं॰
प॰ टी॰
६८

एषधर्मेजगरादिभ्योनवभिःशिक्षितंदर्शि:॥अवधूतगिराप्राहविवेकंयोद्धवंप्रति॥१॥प्रारब्धकर्मभोगस्यावश्यंभावि-
त्वात्तदर्थोद्यमैर्नायुर्व्ययोवृथाकर्तव्यइत्यजगरात्शिक्षितमित्याह॥स्वाभमित्यादिनायदैंद्रियकंसुखंतत्स्व-
र्गेनरकेचभवत्येवयथादुःखंतस्मात्बुधःतन्नेछेत॥शारीरनिर्वाहमात्रंतुयथालब्धेनकर्तव्यमित्याह॥ग्रासमि-
तिआजगरःअजगरवृत्तिःअक्रियःउदासीनः॥२॥यदानापततितदाकिंकर्तव्यंतत्राहशयीतेतिअनुपक्रमःनि-
रुद्यमःदिष्टभुक्दैवमेवप्रापकमितिधैर्यवान्॥३॥नचसमर्थोपिशयीतेवकिंगेइत्याह॥ओजइति॥ओजइंद्रियबलं

श्रीब्राह्मणउवाच॥सुखमैंद्रियकंराजन्स्वर्गेनरकएवच॥देहिनांचयथादुःखंतस्मान्नेछेततद्बुधः॥१
ग्रासंसुमृष्टंविरसंमहांतंस्तोकमेववा॥यदृछयैवापतितंग्रसेदाजगरोक्रियः॥२॥शयीताहानिभू-
रीणिनिराहारोनुपक्रमः॥यदिनोपनयेद्ग्रासोमहाहिरिवदिष्टभुक्॥३॥ओजःसहोबलयुतंबिभ्रद्दे-
हमकर्मकम्॥शयानोवीतनिद्रश्चनेहेतेंद्रियवानपि॥४॥मुनिःप्रसन्नगंभीरोदुर्विगाह्योदुरत्ययः
अनंतपारोह्यक्षोभ्यस्तिमितोदइवार्णवः॥५॥ ॥ ॥श्रीराम ॥

सहोमनोबलंबलंशारीरमेवंयुतमप्यक्रमपिदेहमकर्मकमेवबिभ्रत्शयानएवभवेत्॥वीतनिद्रःस्वार्थेदत्त-
दृष्टिश्चभवेत्॥नचपुनरीहेतइंद्रियवानपीतिदर्शनादिव्यापारमपिनिवारयति॥समुद्रात्शिक्षितमाह॥मुनि-
रिति॥बहिःप्रसन्नश्चासौअंतर्गंभीरश्चदुर्विगाह्यः॥एवंभूतइतिपरिकलयितुमशक्यःअलक्ष्याभिप्रायत्वा-
त्दुरत्ययःअनतिक्रमणीयःतेजस्वित्वात्अनंतपारःकालतोदेशतश्चअपरिच्छेद्यःस्वरूपाविर्भावा-
त्अक्षोभ्यःअविकार्यःरागाद्यभावात्स्तिमितोदःनिश्चलोदकोर्णवोयथातद्वदेतैर्गुणैर्भवेदित्यर्थः राम॰ ५
६८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंच॥ वर्षासुसरिद्भिः समृद्धोपिसागरोयथानोत्सर्पेत ग्रीष्मेतद्विहीनोपिनशुष्येत
तथासमृद्धकामस्तद्विहीनोवानहृष्येत नचशोचेतइत्यर्थः॥ तत्रहेतुः॥ नारायणपरः नतुविषयपर
इतिरूपगंधस्पर्शशब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीनाहताः अतस्तेषुनासक्तोऽयं
चैतेगुरवः॥ तदुक्तं॥ पतंगमातंगकुरंगभृंगमीनाहताः पंचभिरेवपंच॥ एकःप्रमादीसकथंनहन्यते यःसेवते
तेपंचभिरेवपंचेति॥ तत्ररूपविलाससमोहितोनश्यतीतिपतंगात्शिक्षितमाह॥ दृष्ट्वेति॥ तस्याभावैः प्रलो
भितः॥७॥ स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयति॥८॥ मधुकरात्शिक्षितमाह॥ स्तोकमितिगृहानगृहस्थान्

समृद्धकामोहीनोवानारायणपरोमुनिः॥ नोत्सर्पेतनशुष्येततसरिद्भिरिवसागरः॥६॥ दृष्ट्वा
स्त्रियंदेवमायांतद्भावैरजितेंद्रियः॥ प्रलोभितःपतत्यंधेतमस्यग्नौपतंगवत्॥७॥ योषिद्धिरण्याभ
रणांबरादिद्रव्येषुमायारचितेषुमूढः॥ प्रलोभितात्माह्युपभोगबुद्ध्यापतंगवन्नश्यतिनष्टदृष्टिः॥८॥
स्तोकंस्तोकंग्रसेत्ग्रासंदेहोवर्तेतयावता॥ गृहानहिंसन्नातिष्ठेद्वृत्तिंमाधुकरींमुनिः॥९॥ अणुभ्यश्च
महद्भ्यश्चशास्त्रेभ्यःकुशलोनरः॥ सर्वतःसारमादद्यात्पुष्पेभ्यइवषट्पदः॥१०॥ सायंतनंश्वस्तनं
वानसंगृह्णीतभिक्षितं॥ पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही॥११॥

स्थान्अहिंसन्अपीडयन्अयंभावः यथामधुकरोविशिष्टगंधलोभेनैकस्मिन्नेवपद्मेसक्तस्तन्मध्येमुकु
लितेतस्मिन्बध्यतेएवंमुनिरपिगुणलोभेनैकमेवगृहमाश्रितस्तन्मोहेनबध्यतइति॥९॥ किंचअणुभ्यश्चेति
द्विविधोमधुकृत्मधुहंतातिपुष्पादाक्षिप्यगृह्णातीतिमधुकृत्भ्रमरः मधुकरोतिआहारत्वेनस्वरूपे
णचेतिमधुमक्षिकाच॥१०॥ तत्रप्रथमात्शिक्षितमुक्तं द्वितीयात्शिक्षितमाह॥ सायंइदंभोक्ष्यामीतिभि
क्षितमन्नादिनसंगृह्णीतकिंतुपाणिपात्रः तन्मात्रग्राही॥ यद्वाउदरमेवामत्रंपात्रंयस्यसः एकभिक्षा
यामुदरमात्रग्राहीभवेत्॥ संग्रहीतमक्षिकेवनभवतिनजीवतीत्यर्थः॥ ॥ ॥ ११ ॥ राम ॥ ॥

पतद्दिहणोपि तु पुनः सायंतनमिति ॥१२॥ स्पर्शासक्तिर्नाशहेतुरिति गजात् शिक्षितमित्याह ॥ पदापीति पादेनापि
दारवीं दारुमयीमपि गजो हि करिणीस्पर्शं प्रयन्निवातपिहितगर्ते निपात्य बध्यते ॥१३॥ किंच नाधिगच्छेत् नोपगच्छेत्
त्यागभोगविहीनो धनसंचयः परगामी भवतीत्यत्र मधुहा गुरुरित्याह न देयमिति ॥ तदन्यो बलवान् भुंक्ते तदप्यपर
स्तच्चान्यः मधुहा मक्षिकाभिः संचितं मधु यथा भुंक्ते तद्वत् ॥ ननु स्वगृहे धनं कथमन्यो ज्ञास्यति हरिष्यति०

सायं तनं श्वस्तनं वा न संगृह्णीत भिक्षितं ॥ मक्षिकेव संगृह्णन्सह तेन विनश्यति ॥१२॥ पदापि
युवतीं भिक्षुर्न स्पृशेद्दारवीमपि ॥ स्पृशन्करीव बध्येत करिण्या अंगसंगतः ॥१३॥ नाधिगच्छेत् स्त्रियं
प्राज्ञः कर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा ॥१४॥ न देयं नोपभोग्यं च लु
ब्धैर्यद्दुःखसंचितं ॥ भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥१५॥ सुदुःखोपार्जितैर्वित्तैराशासानां
गृहाशिषः ॥ मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनाम् ॥१६॥ ॥

चेतित्याह ॥ अर्थवित् लिंगैरर्थं तदुपायं च वेत्तीत्यर्थवित् ॥ यथा मधुहा तं कोटरादिगतं मधु वेत्ति हरति च
॥१५॥ स्वीयं मं विनापि भोगः संभवतीत्यत्रापि स एव गुरुरित्याह ॥ सुदुःखेति आशासानानामिति वक्तव्ये वर्ण
लोपश्छान्दसः ॥ यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ इति तयोरत्र मदत्त्वात् भुक्त्वा वा द्राग्यायाच्च रेदिति गृ
हिणामावश्यकत्वेन दानविधानात् ॥ ॥ १६ ॥

हरिणात्शिक्षितमाह ॥ ग्राम्येति भगवद्गीतं तु शृणुयादेव मृगयोर्लुब्धकस्य ॥ १७ ॥ हरिणप्रसङ्गादेव हरिणीसुतमृष्य
शृंगोपि गुरुस्तं तत्वमाह नृत्येति वश्यो बभूवेति शेषः रसासक्तिर्नाशहेतुरिति ॥ १८ ॥ मीनात्शिक्षितमाह ॥ जिह्व
येति ॥ अतिप्रमाथिन्या अतिक्षोभिकया दुर्जयया ऋच्छति प्राप्नोति बडिशोग्रामिषलिप्तैर्लोहकंटकैः ॥ १९ ॥ दुर्जय
त्वमुपपादयति इंद्रियाणीति द्वाभ्यां अयं भावः यदाहारस्त्यज्यते तदान्येंद्रियजयः केवलं भवति रसनेंद्रियं तु व

ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् ॥ शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् ॥ १७ ॥ नृत्य
वादित्रगीतानि जुषन्ग्राम्याणि योषितां ॥ आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः ॥ १८ ॥ जिह्वयाति
प्रमाथिन्या जनो रसविमोहितः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥ १९ ॥ इंद्रियाणि जयंत्या
शु निराहारा मनीषिणः ॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते ॥ २० ॥ तावज्जितेंद्रियो न स्याद्विजितान्येंद्रि
यः पुमान् ॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे ॥ २१ ॥ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा ॥ तस्या
मे शिक्षितं किंचिन्निबोध नृपनंदन ॥ २२ ॥ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती ॥ अभूत्काले बहिर्द्वा
रि बिभ्रती रूपमुत्तमं ॥ २३ ॥ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ ॥ तान्शुल्कदान्वित्तवतः कांतान्मे
नेर्थकामुका ॥ २४ ॥ ॥

र्द्धते ॥ यदि तु भुज्यते तर्हि पुनश्च रसासक्त्या सर्वेंद्रियक्षोभः स्यात् अतो रसासक्तिं परित्यज्यौषधवद्भुंजीतेति
प्राणहृद्यैव संतुष्येदित्यत्रोक्तमपि रसनस्यातिदुर्जयत्वत्तापनायोच्यत इति विशेषः ॥ २१ ॥ पिंगलाया नैराश्यप्राप्तिर
शिक्षितमिति वक्तुं तदाख्यानमाह पिंगलेत्यादिना मे मया च शिक्षितं ॥ २२ ॥ स्वैरिणी कामचारिणी संकेते इति स्था
ने ॥ २३ ॥ तान्वित्तवतः सधनान् अत एव शुल्कदान्मूल्यदान्कांतान्सुरतार्हान् ॥ २४ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री. भा. ग. प्र. टी. ध.

अपिसंभावनायां । अन्योपिमामुपैष्यतीत्येवंदुराशयेत्युत्तरेणान्वयः ॥ २५ ॥ द्वार्यवलंबमाना पुनः प्रविशति पुनः निर्ग
च्छति एवंकुर्वती निशीथंअर्धरात्रंप्राप ॥ २६ ॥ निर्वेदः अलंबुद्धिः वित्तचिंतैवहेतुर्यस्य सः ॥ २७ ॥ यथाय यथावत् ममम
त्तः शृणुनन्वकिंनिर्वि ण्णायागीतश्रवणेन तत्राह हि यस्मात् पुरुषस्याशापाशानांनिर्वेदोसिर्यथा तथाछेत्तातद्वद
तः । नहीति अंग हे राजन् ॥ २८ ॥ अविजितात्मत्वे हेतुः याहंबालिशा अविवेकशून्या तस्याः कुतः येनकारणेन अस

आगतेषूपयातेषु सा संकेतोपजीवना । अप्यन्यो वित्तवान्कोपि मामुपैष्यति भूरिदः ॥ २५ ॥ एवंदुराशा
याध्वस्तनिद्राद्वार्यवलंबती ॥ निर्गच्छंती प्रविशंती निशीथं समपद्यत ॥ २६ ॥ तस्या वित्ताशया शुष्यद्वद
क्राया दीनचेतसः ॥ निर्वेदः परमो जज्ञे चिंताहेतुः सुखावहः ॥ २७ ॥ तस्या निर्विण्णचित्ताया गीतं शृणु
यथा मम ॥ निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ॥ २८ ॥ नह्यंगाजातनिर्वेदो देहबंधं जिहासति
यथा विज्ञानरहितो मनुजो ममतां नृप ॥ २९ ॥ पिंगलोवाच ॥ अहो मे मोहविततिं पश्यताविजिता
त्मनः ॥ या कांतादसतः कामं कामये येन बालिशा ॥ ३० ॥ संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यम
मं विहाय । अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छमहं भजेज्ञा ॥ ३१ ॥ अहो मयात्मा परितापितो
वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया ॥ स्त्रैणान्नराद्यार्थतृषोनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ३२
तृ ने

तः तुच्छात् वराक कामं कामये ॥ २९ ॥ बालिशात्वं प्रपंचयति संतमिति चतुर्भिः समीपे संतं अंतर्यामिनात्मरमणं परो
क्षमीश्वरं ॥ ३० ॥ विगर्ह्या विनिंद्या वार्ता या जीविका तया कृतः सांकेत्येन यह्यार्जितं तया वृत्त्या श्रीहिणा स्वविशेषणे वा
परितापं प्रपंचयति स्त्रैणादिति स्त्रीलंपटात् अर्थवत् अर्थतृष्णः लुब्धात् अतएव अनुशोच्यात् नरात् याहं वित्तं रति
वेच्छती तया हृथात्मा परितापितः केन वित्तमिच्छती तेन नरेणार्जितेन स्वयं विक्रीतेनात्मना देहेन ॥ ॥ ३२ ॥

राम.
५०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अहोधिकमांयाहंअतिबीभत्सिंतंभजामीत्याह ॥ अदितिविंशेणनामस्थूणेण हृनिहितः ॥ तिर्यक्वेणउवंशरणासन
स्मिन्नुभयनेोत्त्रिहितावेलवः ॥ अस्थिभिरेवनिर्मितावेष्ट्रा दयोयस्मिन् ॥ तत्रएषदीर्घमस्थियत्रसवंशः पार्श्वा
स्थीनिवं शर्पनिस्थूणेणहसलपादास्थीनितथारोमभिर्नरवैश्चपिनद्धंक्वादितंतथापि ॥ क्षरेति नवद्वाराणियस्मि
ननत् ॥ एवंभूतागाररूपेनरवशरीरमेनत ॥ मत्तोअन्याकावाकांतबुद्ध्याउपैतिसेवते ॥ २१ ॥ नत्संगतोसन्त्यामण्ड
ममममोहरस्याह विदेहानामिति ॥ याहमसतीअच्युतादन्यंकामंभोगमिच्छती सा ॥ २२ ॥ एवंनिर्विण्णासती

यदस्थिभिर्निर्मितवंशवंश्यस्थूणंत्वचारोमनखैःपिनद्धं ॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं
मदुपैतिकान्या ॥ २२ ॥ यस्याहुल्लातिपवित्राणिपंचगव्यहवीषिच ॥ अशुचित्वेवलणध्यातिकान्यामहं
उपैतितं ॥ जिघ्रंकोपिचदुर्गंधंपश्यन्नपिस्वकंमलं ॥ जिघ्रन्पश्यन्स्वकंविद्वान्कायस्योनविरज्यते
अहोमोहस्यमाहात्म्यंसर्वंव्यामोहितंजगत् ॥ नविरज्यतिकायोयंपीडयन्नपिनासिका ॥ विदेहा
नांपुरेह्यस्मिन्नहमेकैवमूढधीः ॥ यान्यमिच्छन्त्यसत्यस्मादात्मदात्काममच्युतात् ॥ २३ ॥ सुहृत्
प्रेष्ठतमोनाथआत्माचायंशरीरिणां ॥ तंविक्रीयात्मनैवाहंरेमेऽनेनयथारमा ॥ २४ ॥ कियत्प्रि
यंतेव्यभजन्कामायेकामदानराः ॥ आद्यंतवंतोभार्यायादेवावाकालविद्रुताः ॥ २५ ॥ नूनंमेभ
गवान्प्रीतोविष्णुःकेनापिकर्मणा ॥ निर्वेदोयंदुराशायायन्मेजातःसुखावहः ॥ २६ ॥ ॥

अनः पशुमेवंकरिष्यामीत्याह ॥ सुहृदिति ॥ अयमीश्वरआत्मनैवआत्मानमेवनिवेद्यतंविक्रीयविशेषेणक्री
त्वा अनेनैवसहरेमेरमात्मस्मीर्यथा ॥ २४ ॥ अन्यस्यासेव्यत्वंदर्शयन्ति कियदिति ॥ आद्यंतवंतोयेकामाः विषयाः का
मदानरावादेवाःकालकलिताः ॥ भार्याभ्याः ॥ कियत्प्रियंकृतवंतः ॥ किंचित् ॥ अतोनेहामुत्रचतद्व्यतिरिक्तः कोपि
सेव्योस्तीत्यर्थः ॥ २५ ॥ एवंनिश्चित्यस्वभाग्यमभिनंदति नूनमिति दुराशाआशायस्याः तस्यामे ॥ २६ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ प॰टी॰ ८१।

ननु धनाशया आस्थिताशास्मि कथं विष्णुः प्रीतः तत्राह मैवमिति ॥ मंदभाग्याया चेदहं स्यां तर्ह्येवं निर्वेदहेतवः क्लेशा न
स्युः इत्यर्थः ॥ येन निर्वेदेनानुबंधं गृहादिकं निर्हृत्य परित्यज्य ॥ ३८ ॥ अतः तेन श्रीविष्णुनोपकृतं तत्कृतमुपका
रं निर्वेदलक्षणं ग्राम्येषु नरेषु विषयेषु वा संगताः ॥ ३९ ॥ कथं व्रजसि तदाह संतुष्टेति ॥ ४० ॥ ननु ब्रह्मादीन्
हित्वा अमुनैवेति कोऽयं नियमः ॥ तत्राह संसारेति ॥ मुषिते दृष्टे ईक्षणं अपहृतविवेकं ॥ ४१ ॥ तर्हि किमात्मा त्राणे पर्या

मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः ॥ येनानुबंधं निर्हृत्य पुरुषः शममृच्छति ॥ ३८ ॥ तेनोपकृ
तमादाय शिरसा ग्राम्यसंगताः ॥ त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ॥ ३९ ॥ संतुष्टा श्रद्दधत्ये
तद्यथालाभेन जीवती ॥ विहराम्यमुनैवाहमात्मना रमणेन वै ॥ ४० ॥ संसारकूपे पतितं विषयैर्मुषिते
क्षणं ॥ ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः ॥ ४१ ॥ आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदा
खिलात् ॥ अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥ ४२ ॥ ब्राह्मण उवाच ॥ एवं व्यवसितमतिर्दु
राशां कांततर्षजां ॥ छित्त्वोपशममास्थाय शय्यामुपविवेश सा ॥ ४३ ॥ आशा हि परमं दुःखं नैराश्यं
परमं सुखं ॥ यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला ॥ ४४ ॥ इति श्रीभा॰ एकादशे अष्टमोऽध्यायः ॥ ८ ॥

नाभविष्यसि न तत्र सर्वतो निर्विद्य भगवद्भजनेन बुद्धस्यात्मन एवं समर्थत्वादित्याह ॥ आत्मैवेति यदा एवं
जगत्पश्येत् तदा अप्रमत्तः सन् निखिलाद् इहामुत्र भोगान्निर्विद्येत तदा हि ॥ आत्मैवात्मनो गोप्ता नान्यस्त्वयः ॥ अतः
केवलं प्रेम्णैव भजामीति भावः ॥ ४२ ॥ कांतस्य तर्षोऽभिलाषः ततो जातां ॥ ४३ ॥ फलितमाह आशा हीति ॥ ४४ ॥
इत्येकादशे अष्टमः ॥ ॥ ॥ ॥

राम। ८१।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नवमे कुररादिभ्योपाहृत शोपशिक्षितं॥ कृत्वा यद्दुःकृतार्थो भूदिति कृत्स्नेन वर्णितः॥ कुररात्शिक्षितमाह॥
परिग्रहो हीति॥ यद्यत्प्रियतमं तस्य तत्तस्य परिग्रहः तद्विद्वान्परिग्रहो दुःखमिति विद्वान् सत्यस्त्व किंचनः॥
स कृपरिग्रहः॥ नत्वदरिद्रः तदाह॥ सामिषमिति॥ १॥ अर्भकशिक्षितमाह नेनियोह पुत्रिणां नदुतोया भवति॥
सा चिंता च येनास्ति॥ आत्मनेव क्रीडा यस्य आत्मनि रतिः प्रीतिर्यस्य सः॥ नन्वत्र सर्व तयोः किं साह एवं नैश्चिंत्य

ब्राह्मण उवाच॥ परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणां॥ अनंतं सुखमाप्नोति तद्विद्वान्यस्त्वकिं
चनः॥ १॥ सामिषं कुररं जघ्नुर्बलिनोऽन्ये निरामिषाः॥ तदामिषं परित्यज्य स सुखं समविंदत॥ २॥ न
मे मानावमानौ स्तो न चिंता गेहपुत्रिणां॥ आत्मक्रीड आत्मरतिर्विचरामीह बालवत्॥ ३॥ द्वावेव
चिंतया मुक्तौ परमानंद आप्लुतौ॥ यो विमुग्धो जडो बालो यो गुणेभ्यः परं गतः॥ ४॥ क्वचित्कुमारी
त्वात्मानं वृणानान्गृहमागतान्॥ स्वयं तानर्हयामास क्वापि यातेषु बंधुषु॥ ५॥ तेषामभ्यवहारा
र्थं शालीन्रहसि पार्थिव॥ अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत्॥ ६॥ ॥

सुखमित्याह॥ द्वाविति॥ ३॥ विमुग्धः अज्ञः॥ अजडः अधमः॥ एवंभूतो यो बालः॥ यश्च प्रकृतेः परमीश्वरं प्राप्तः॥
नो द्वौ कुमार्याः॥ शिक्षितं वक्तुं आख्यायिकामाह॥ क्वचिदित्यादिना॥ वृणानान् वरणार्थमागतान्॥ बंधुषु पित्रा
दिषु॥ ५॥ शंखाः शंखवलयाः॥ महद्गुप्या भवति॥ तस्याः स्वनं व्रकुः॥ ६॥ सा महती बुद्धिमतीति त्वयं शाल्यवह
ननेन त्वगुप्सितं चटदिति नापोतकं पकेकशः॥ क्रमेणैकमेकं वभंज करादयस्मारितवती॥ ७॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निरभिदत्तस्यश्चक्रू नवतीनतु ऊर्मायालवकक्कथं संगतिः ॥ ८ ॥ तदेवाह द्वयोर्लोकाविति ॥ ९ ॥ वासइति प्रथमं
तपावेकलहद्वैधः ॥ वार्तागोष्ठी देहर्भवेदित्यर्थः ॥ चित्तैकाग्रताहेतोस्फूर्तिं लक्षणसमाधिहेतुरिति पार
कारीतः शिक्षितमित्याह ॥ मनइति ॥ तत्रोपायमाह जितेति ॥ श्वासनजयेश्वासजयः तस्यच जयेश्वासाधीनं
मनोनिश्चलं भवति ॥ ननु तदाणं निश्चलं सदपि मनो विषयवासनयापदि विवितिष्येत तस्य बुद्धाविवसर्वेष्यालीः
येनवा तदा किं तत्राह ॥ वैराग्येति वैराग्येण विहितपमानेन अभ्यासयोगेन लक्ष्ये ध्रियमाणं स्थिरीक्रियमा

सातज्जुगुप्सितं मत्वा महती व्रीडिता ततः ॥ बभंजैकैकशः शंखान्द्वौ द्वौ पाण्योरशेषयत् ॥ ७ ॥ उ
भयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्मशंखयोः ॥ तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः ॥ ८ ॥ अन्व
शिक्षमिमं तस्या उपदेशमरिंदम ॥ लोकाननुचरन्नेतान्लोकतत्त्वविवित्सया ॥ ९ ॥ वासो बहूनां
कलहो भवेद्वार्ता द्वयोरपि ॥ एक एव वसेत्तस्मात्कुमार्या इव कंकणः ॥ १० ॥ मन एकत्र संयुञ्ज्याज्जित
श्वासो जितासनः ॥ वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रितः ॥ ११ ॥ यस्मिन्मनो लब्धपदं यदे
तच्छनैः शनैर्मुंचति कर्मरेणून् ॥ सत्त्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिन्धनम् ॥ १२

लं ॥ ११ ॥ एकत्रेति ऊत्र तदाह ॥ यस्मिन्निति ॥ यल्लयविक्षेपात्मकं मनः एतद्यस्मिन्परमानंदरूपे भगवति ल
ब्धास्पदं सत्कर्मवासना मुंचति तस्मिन् ॥ ननु कर्मवासनात्यागेपि सत्त्वमिव लयोऽदुर्वारः ॥ नासत्त्वेनेति वृद्धे
नोपशमात्मकेन रजस्तमसोरभावे विक्षेपलयाभावान्निर्वाणमहन्निकल्पयाकारेणावस्थानमुपैति
कुतः अनिंधनं इंधनगुणः तत्कार्यं च तद्रहितं ॥ तदुक्तं योगशास्त्रे ॥ मनसोहृन्निरुद्धान्यस्य ब्रह्माकारतया
स्थितिः ॥ यासंप्रज्ञातनामासौ समाधिरभिधीयत इति ॥ १२ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततः चनष्टेतस्फूर्तिरित्याह ॥ तदेति वाह्यदर्शनादिनाऽनुसंधानसमरत्वात् सौगतात्मा तस्य ज्ञजल्पकरणेन दृष्टविघ्नः भेरी
घोषैरेतिकेव अनंतं स्वयंतिमपिन वेद तद्वत् ॥ १२ ॥ सर्पात्व सिद्धितमाह ॥ एकचारीति ॥ योगिसंमर्दस्यापि त्यागः
कुमार्गीगृहः जनसंगत्यागो सर्पः ॥ सर्पस्यापि जनात्संकमानएकाकी क्वचरति नियतनिकेतनरहितत्वं सदाप्रमत्त
त्वमेकांतवासीच आचारैरेंगितिभिः ॥ सविषोनिर्विषोवेत्तिनलक्ष्यतेव असहायत्वमितभाषी चेतद्वत् मुनिर्वर्त

तदैवमात्मस्वरूपद्वविज्ञोनवेद किंविद्वद्धिर्वृत्तरंवा ॥ यद्येऽष्टकारोनयतिं व्रजंतमिषौगतात्मा
नन दर्शपार्श्वे ॥ १३ ॥ एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः ॥ अलक्ष्यमाण आचारैर्मुनिरेकोऽ
ल्पभाषणः ॥ १४ ॥ गृहारंभोतिदुःखायविफलश्चाध्रुवात्मनः सर्पः परकृतंवेश्मप्रविश्यसु
खमेधते ॥ १५ ॥ एकोनारायणोदेवः पूर्वसृष्टं स्वमायया ॥ संहृत्य कालकलया कल्पान्त इदमी
श्वरः ॥ १६ ॥

तेन्पस्थः ॥ १४ ॥ किंचगृहारंभइति ॥ अध्रुवात्मनः नश्वरदेहस्यसुखंयथाभवति तथावर्द्धते ॥ १५ ॥ कारक
सामग्रीनिरपेक्षात्केवलादीश्वरात्सृष्टिसंहारादर्शनाभिहृष्टात्तेनमयासंभाविताविति वक्तुंश्य
मसंहारप्रकारमाह ॥ एकइति सार्द्धत्रयेण एकः कारकनिरपेक्षः पूर्वसृष्टमिदंजगत् । कालकल
याकालशक्त्यासंहृत्य ॥ १६ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भाग
ए॰ टी॰
धर

एक एवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत ॥ कारणभूतादिषु सत्वादिषु शक्तिष्वपि साम्यं नीतासु स्व
तीषु ॥१६॥ गुणसाम्यप्रधानेनतदुपाधिः ॥ पुरुषः तयोरीश्वरः ॥ परावराणां परे ब्रह्मादयः ॥ अवरे अन्ये च मुक्ता जीवाः
तेषां परमः प्राप्य आस्ते ॥ कुतः कैवल्यसंज्ञितः मोक्षशब्दाभिधेयः ॥ तत्र हेतुः ॥ केवलेति निर्विषयः स्वप्रकाशः ॥
आनंदानां संदोहः ॥ स परमानंद इत्यर्थः ॥ कुतः निरुपाधिकः ॥ ततः केवलादेव सृष्टिं दर्शयति केवलेनात्मा
नुभावेन कालेन स्वतंत्रक्रियाशक्तिप्रधानं महत्तत्वं सृजति जीवसंसारहेतुभूतं सृष्टेः पित्वं मामेवेति संबोधय

एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः ॥ कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥१६॥ स
त्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः ॥ परावराणां परम आस्ते कैवल्यसंज्ञितः ॥१७॥ केवलानुभ
वानंदसंदोहो निरुपाधिकः ॥ केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकां ॥१८॥ संक्षोभयन्सृज
त्यादौ तया सूत्रमरिंदम ॥ तामाहुस्त्रिगुणव्यक्तिं सृजंतीं विश्वतोमुखं ॥२०॥ यस्मिन्प्रोतमिदं विश्वं
येन संसरते पुमान् ॥२१॥ ॥

ति ॥१९॥ अरिंदम अरीन् संगादीन् दमयितुं समर्थ सूत्रस्यैव व्यक्तिशब्देनोच्यमानस्य तामिति स्त्रीलिंगेन परामृ
शः ॥ त्रिगुणव्यक्तिं गुणत्रयस्य कार्यं अत एव विश्वतोमुखं नानाविधं त्रिगुणात्मकं विश्वमहंकारद्वारेण सृजं
तीं त्रिगुणकार्यं सूत्रसंज्ञां यां कारणमाहुः ॥ यस्मिन्निति कारणभूते समष्टिरूपे यस्मिन्निदं विश्वं प्रोतं ग्रथि
तं ॥ वायुर्वै गौतम तत्सूत्रं ॥ वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि भूतानि संदृब्धानीति श्रु
तेः ॥ येन वाह्यात्मप्राणरूपेण जीवः संसरति ॥२२॥ ॥

राम
धर

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदेवंशिक्षितमर्थमनुक्रान्तंदर्शयन्नाह । यथेति ॥ हृदयादूर्णांतन्तून्वक्त्रतःवक्त्रेणसंतत्यप्रसार्यविहृत्यक्रीडित्वाभगवद्वत्
नपरंगांतत्सारूप्येनविश्वमितिपेशस्कृतोभ्रमरविशेषात्ज्ञानमित्याह ॥ यत्रयत्रेति ॥ २२ ॥ सकलमैकाग्र्येणकु-
ड्यांवेशितः निरुद्धःभयेनध्यायन्सात्मतांतत्सारूप्यंसाम्यतामितीतिपाठेनार्थता । पूर्वरूपमसंत्यजन्नित्यस्या-
भिप्रायः ॥ यदातेनैवदेहेनान्यसारूप्यंतूपतेतदाकिंवक्तव्यंदेहांतरेणसारूप्यंघटतइति ॥ २३ ॥ स्वदेहादेव
शिक्षितमाह ॥ स्वात्मेति ॥ २४ ॥ आत्मनोदेहात्शिक्षितंगुरुर्देहः ॥ विरक्तिविवेकयोर्हेतुः ॥ विरक्तिहेतु-

यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्त्रतः ॥ तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्वरः ॥ २१ ॥ यत्रयत्र
मनोदेहीधारयेत्सकलंधिया ॥ स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्स्वरूपतां ॥ २२ ॥ कीटःपेशस्कृ-
तंध्यायन्कुड्यांतेनप्रवेशितः ॥ यातितत्सात्मतांराजन्पूर्वरूपमसंत्यजन् ॥ २३ ॥ एवंगुरुभ्यएते-
भ्यएषामेशिक्षितामिति ॥ स्वात्मोपशिक्षितांबुद्धिंशृणुमेवदतःप्रभो ॥ २४ ॥ देहोगुरुर्ममविर-
क्तिविवेकहेतुर्बिभ्रत्स्मसत्त्वनिधनंसततार्त्युदर्कं ॥ तत्त्वान्यनेनविमृशामियथा ॥ तथापिपार-
क्यमित्यवसितोविचराम्यसंगः ॥ २५ ॥

त्वमाह । सत्त्वनिधनंउत्पत्तिविनाशौयोविभ्रत्स्म ॥ किंचसततंसंततंआर्त्युदर्कंदुःखमेवोत्तरोत्तरफलंविभ्रत्य-
वासततमार्तिरेव । उदर्कउत्तरफलंयस्यतत्सत्त्वनिधनंविभ्रत् । विवेकहेतुत्वमाह ॥ तत्त्वानीति ॥ यथायथाव-
त् । एवंप्रत्युपकारित्वेपि देहेनैवास्थाकर्तव्येत्याह । तथापीतिपारक्यंश्वसृगालादिभक्ष्यमितिनिश्चितः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सततार्थेहकं तां प्रपंचयति जायेति द्वाभ्यां यस्य देहस्यापि प्रियचिकीर्षया भोगसंपादनेच्छया जायाद्विवर्गान्वितन्व
न् ॥ पुष्णाति पुरुषः कथंभूतः कृच्छ्रं यथा भवति तथावरुद्धानि संचितानि धनानि यस्य सः येन सः देहो विशेष
एवं वा स देहः स्वांते तस्यायुषोंतेऽवसीदति नश्यति ॥ किंच देहनाशेपि न तु स्वसमाप्तिरित्याह ॥ अस्य देहो
नरबीजं कर्म सृष्ट्वेति ॥ वृक्षस्येव धर्मा यस्य सः ॥ २२ ॥ किंच जिह्वेति अमुं देहं तदभिमानिनं पुरुषं वापकर्षतः

र्जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षतया वितन्वन् ॥ स्वांते सकृच्छ्रम
वरुद्धधनः स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा ॥ २२ ॥ जिह्वैकतोऽमुमपकर्षति कर्हि
तर्षा शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः स
पत्न्य इव गेहपतिं लुनंति ॥ २३ ॥ ॥

रसं प्रति जिह्वामुमपकर्षति आकर्षति त्रिकर्हि कदाचित् ॥ तर्षा पिपासा जलं प्रति शिश्नो व्यवायं प्रति त्वक्
स्पर्शं प्रति उदरमन्नमात्रं प्रति ॥ श्रवणं शब्दं प्रति ॥ घ्राणो गंधं प्रति ॥ चपलदृक् रूपं प्रति क्वचित् क्वचि
त्स्वस्वविषयं ॥ प्रतिकर्मशक्तिः अन्यदपि कर्मेंद्रियं लुनंति त्रोटयंति ॥ ॥ २३ ॥ ॥ ॥
श्रीरामायनमः ॥ ॥ ॥ ॥ राम ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईश्वरोहिकरणाधिष्ठात्रीरग्न्यादिदेवताःवागादिभिःसहसृष्टवान्ताश्चतंप्रतिभोगार्थंशरीरमयाचन्त
सचताभ्योगोशरीरमश्वशरीरंयथाक्रममानीतवान्तनस्तादेवताःसोब्रवीत्यथायतनंचचक्षुरास्यांनेत्रस्मिन्दे

ते प्रविशतेतितदाहृताभ्यइत्यादि॥

तदेवंदेहोगुरुरित्यादित्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्वदेहस्यातिदुर्लभत्वंदर्शयन्नीश्वरनिष्ठांवि
धत्तेस्रष्टेतिद्वाभ्यांपुराणिशरीराणि॥ पुरुषंपुरुषदेहंब्रह्मणोवलोकायआपरोक्ष्यायधिषणाबुद्धिर्यस्मिन्
तंतदुक्तंनासौमं पौरुषीश्रियेतिष्ठ.तिष्ठपुरुषत्वेवाविस्तरामात्मेत्यादि॥ तथाताभ्योगामानयत्ताअब्रुवन्न
वैनोयमलमितिताभ्योश्वमानयत्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयत्ताअब्रुवन्सुकृतंबते
तेतिव॥२८॥तस्मात्बहूनांसंभवानांजन्मनामंतेमानुष्यमनित्यमप्यर्थदंपुरुषार्थप्रापकंदैवाल्लब्ध्वाश्र

सृष्ट्वापुराणिविविधान्यजयात्मशक्त्यावृक्षान्सरीसृपपशून्खगदंशमत्स्यान्॥ तैस्तैरतुष्ट
हृदयःपुरुषंविधायब्रह्मावलोकधिषणंमुदमापदेवः॥२८॥ लब्ध्वासुदुर्लभमिदंबहुसंभ
वांतेमानुष्यमर्थदमनित्यमपीहधीरः॥ तूर्णंयतेतनपतेदनुमृत्युयावन्निःश्रेयसायविषयः
खलुसर्वतःस्यात्॥२९॥ एवंसंजातवैराग्योविज्ञानालोकआत्मनि॥ विचरामिमहीमेतांमुक्त
संगोनहंकृतिः॥मू०॥ ॥

नुमृत्युअनुअनुनिरंतरंमृत्युर्वायस्यतत्॥यावन्नपतेत्तावदेवतस्मिंश्रीरेनिःश्रेयसाययतेतविषयःपुनःस
र्वतःपश्वादियोनिष्वपिस्यादेव॥२९॥तदेवंहेयोपादेयविवेकेबहुधानिरूप्येदानींयदुक्तंवर्तेकल्पःक
विंदद्धः॥इत्यादितत्रोत्तरमाह॥ एवमितिएवंबहुभ्योगुरुभ्यःशिक्षितेनविशिष्टंज्ञानमेवालोकःप्रदीपो
यस्यसः॥सम्पन्नंतंवाआत्मविशेषणंआत्मनिस्थितःएवंमहींविचरामि॥मू०॥ ॥ ॥ ःप्रदीपो

श्री
भा॰पु॰
ए॰टी॰
४४

ननु किं बहुभिर्गुरुभिः नहिष्येतके तु भगु प्रमनु ऐवैव हवोगुरवश्चास्थिताः तत्राह नह्येकस्मादिति बहुधासु
प्रपंचनिष्प्रपंचभेदाभेदादिभिः अयंभावः नैते परमार्थोपदेष्टागुरवः किंत्वन्वयव्यतिरेकाभ्यांश्चात्मन्यसं
भावनादिमात्रनिवर्तकाः ॥ एषां च बहुत्वं युक्तमेवेति ॥ तान प्रदं तु गुरुमेव वव्यतिमदभितं गुरुं शांतमु मेकं
पासीतेति उक्तं च ॥ तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं इति ॥ ३१ ॥ विप्रो दत्तात्रेयः योग हैमापुरुभ्यं यो
यदुहेहं याशुद्धमुक्तत्वात् ॥ यथागतं तथैव यदृच्छया याययावित्यर्थः ३२ भगवान्स्वीयं ब्राह्मविक्तुलमि

नह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपुष्कलं ॥ ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥ ३१ ॥ श्री
भगवानुवाच ॥ इत्युक्त्वा स यदुं विप्रः तमामंत्र्य गभीरधीः ॥ वंदितोऽभ्यर्थितो राज्ञा ययौ प्रीतो यथ
यागतम् ॥ ३२ ॥ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः ॥ सर्वसंगविनिर्मुक्तः समचित्तो बभ
भूव ह ॥ ३३ ॥ इति श्रीभागवते एकादशस्कंधे नवमोऽध्यायः ॥ ॥

तिश्चात्मनेनः पूर्वेषां पूर्वज इति ॥ अत्र संग्रह श्लोकाः ॥ कपोतमीनहरिणकुमारीगजपन्नगाः पतंगः
ऊरगः चाष्टौ हेयार्थं गुरवो मताः मधुहन्मधुकृतौ च पिंगला च वह्नयोऽस्त्वयः उपादेयार्थे विज्ञाने षो
डाः पृष्ठ्वगुरवो मताः ॥ तदेवान्तरभेदश्च तत्र तत्र स्फुटीकृतः ॥ अध्यायत्रितये चाष्टनवाष्टावीरिताः क्र
मात् ॥ ३३ ॥ इति श्रीभावार्थदीपिकायां एकादशस्कंधे नवमोऽध्यायः ॥ ९ ॥ ॥ ॥ ॥

राम॰
४४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वत्नविद्यानिगर्वो व्यालब्धसंभावनाभुवः ॥ उद्धवस्यात्मतत्त्वात्मसाधनोक्तिरतः परं ॥ दशमेदेहसंबंधात्संस
र्जितात्मनः स्वतः ॥ इत्येतद्दृश्यतामास्य मतांतरनिरासतः ॥ तदेवमन्वयव्यतिरेकाभ्यामात्मविवेकज्ञानस्यत
त्वज्ञानायरितआरभ्यसाधनान्युपदिशतिभगवान् मयेतिमयापंचरात्रादुक्तेषुस्वधर्मेषुअवहितः आश्रम
त्रः सन्नदविरोधेनवर्णाद्याचारमनुतिष्ठेत् ॥ १ ॥ कथमकामात्मतासंभवतितत्राह ॥ अन्वीक्षेतेतिस्वधर्मैर्वि
शुद्धचित्तः सन् देहिनांविषयेषुसत्यत्वाभिनिवेशान्वयेसर्वआरंभाः तेषांफलेवैपरीत्यंपश्येत् एवंफलवैप

श्रीभगवानुवाच ॥ मयोदितेष्ववहितः स्वधर्मेषु म[illegible]दाश्रयः ॥ वर्णाश्रमकुलाचारम
कामात्मा समाचरेत् ॥ १ ॥ अन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां ॥ गुणेषु तत्त्वध्यानेन स
र्वारंभविपर्ययं ॥ २ ॥ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः ॥ नानात्मकत्वाद्विफ
लः तथाभेदात्मधीर्गुणैः ॥ ३ ॥ निवृत्तं कर्म कुर्वीत प्रवृत्तं मत्परस्त्यजेत् ॥ जिज्ञासायां संप्रवृ
त्तो नाद्रियेत्कर्मचोदनां ॥ ४ ॥ ॥

रीत्यादकामः स्यात् ॥ २ ॥ किंचकाम्यविषयाणांमिथ्यात्वादपीत्याह ॥ सुप्तस्येतिविफलः अर्थशून्यः अ
त्रैवंप्रयोगः ॥ इंद्रियैर्बहिर्नानाबुद्धिः ॥ साविफलानानात्मकत्वादैंद्रियकत्वाद्वामनोजन्यस्वप्नमनो
रथवदिति ॥ ३ ॥ मोक्षार्थीनप्रवर्तेततत्रकाम्यनिषिद्धयोः ॥ नित्यनैमित्तिकेकुर्यात्त्यजेद्वायजिज्ञास
या[illegible]निस्सरतिः अतः प्रवृत्तंकाम्यंकर्मत्यजेन्निवृत्तंनित्यनैमित्तिकमेवकुर्यात् ॥ आत्मविचारेतुसम्यक
प्रवृत्तोनित्यकर्मचोदनामपिनाद्रियेतनित्यनैमित्तिकंसंकोच्यआदरेणजिज्ञासाकर्तव्या ॥ ४ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंतु यमान् अहिंसादीन् अभीक्ष्णमादरेण सेवेत ॥ शौचादीस्तु नियमान् क्वचित् यदा शक्तिः तदा यमस्ता
नाविरोधेन यमा द्वादश नियमाश्च केचिन् विशेषा ध्यायेवक्ष्यति किंच ॥ यमेष्वादरं परित्यज्य गुरुमुपासीतेत्या
ह ॥ मदभिज्ञमिति मदात्मकं मद्रूपं ॥ ५ ॥ गुरुसेवकस्य धर्मानाह ॥ अमानीतिदक्षः अनलसः निर्ममः जा
यादिषु ममतारहितः दृढसौहृदः असत्वरः अव्यग्रः अमोघवाक् व्यर्थालापरहितः एतान्येवाशि
ष्यस्य लक्षणानि ज्ञेयानि ॥ ६ ॥ ननु स्वजायादिषु कथं निर्ममः स्यात् तत्राह जायेति मैदासीन्य हेतुं विवे
कं दर्शयति ॥ आत्मनोर्थं प्रयोजनं सर्वत्र सममिव पश्यन् त्रिनिश्चयेभावः सर्वदेहेष्वात्मन एकत्वज्ञानात्

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित् ॥ मदभिज्ञं गुरुं शांतमुपासीत मदात्मकं ॥ ५ ॥
अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः ॥ असत्वरोर्थजिज्ञासुरनसूयुरमोघवाक् ॥ ६ ॥
जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु ॥ उदासीनः समं पश्यन्सर्वेष्वर्थमिवात्मनः ॥ ७ ॥ विल
क्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक् ॥ यथाग्निर्दारुणो दाह्याद्दाहकोन्यः प्रकाशकः
(८)

रि देहेस्मिन् स्वदेहे ॥ आत्मनोर्थः सुखादिसमएवकेन विशेषेणेतेष्वममत्वाभिनिवेशस्त्येवमुदासी
नः सन् गुरुं प्रपद्येतेति ॥ ७ ॥ अहो कोसौ देहव्यतिरिक्त आत्मा यस्यैक्यादर्थः ॥ सर्वेषु समः स्यात् तमाह ॥ (
विलक्षण इति स्थूलसूक्ष्मदेहद्वयादात्मान्यः यतो विलक्षणः द्वेधा वैलक्षण्यं दर्शयति ईक्षिता स्वदृगि
ति दृश्यात् द्रष्टा दिलक्षणः स्वप्रकाशश्च जडात् विलक्षणयोरन्यत्वे दृष्टांतः ॥ यथाग्निर्दाहकः प्रका
शकश्च दाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति ॥ ॥ ८ ॥ ॥ रामायनमः ॥ ॥ ।

ॐ

अनेनैव दृष्टांतेन नित्यत्वानादित्व विभुत्वैकत्वादयोपि सिद्धं तीत्याह ॥ निरोधीति यथा दारुषु वन्हिः प्रविष्टोग्नि
स्तत्कृत्वा त्राशणादीन् प्राप्नोति न तु स्वतो नाशादिमान् एवं देहगुणान् नित्यत्वादीन् देहान्यगोनित्यादिस्व
रूपोप्यात्मा न भवति ॥ ततश्चानित्यत्वादिभिरपि वैलक्षण्यादन्यत्वमिति भावः ॥ ९ ॥ नन्वग्नेर्दारुसंयोगान्नि
दृष्टमेभाक्तं वर्तते ॥ आत्मनस्त्वसंगत्वात्कथं देहेन तद्धर्मैर्वा संबंधः संबंधे वा कृतः । तन्निरासः तत्राह योसा
विति पुरुषस्येश्वरस्याधीने मायागुणैर्यो संसृतः ॥ अयं च स्थूलो देहो विरचितः । पुंसो जीवस्यायं संसा
रः तन्निबंधनः तदध्यासकृतः ॥ हि यस्मादेवं तस्मादात्मविद्यातन्निवर्तिकेत्याह ॥ आत्मनो विद्या विद्या

निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान् ॥ अनुप्रविष्ट आधत्त एवं देहगुणान्परः ॥९॥
योसौ गुणैर्विरचितो देहोयं पुरुषस्य हि ॥ संसारस्तन्निबंधोयं पुंसो विद्याछिदात्मनः ॥१०॥ त
स्माज्जिज्ञासयात्मानमात्मस्थं केवलं परम् ॥ संगम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमम् ॥ ११ ॥
आचार्योऽरणिराद्यः स्यादंतेवास्युत्तरारणिः ॥ तत्संधानं प्रवचनं विद्यासंधिः सुखावहः ॥
१२ ॥

नं तस्या छित्वा छेत्री आछिदिति वा पदच्छेदः ॥१०॥ यस्मादेवं तस्मात् जिज्ञासया विचारेणात्मस्थं आत्मनि
कार्यकारणसंघात एव स्थितं सम्यक् ज्ञात्वा प्राप्य तत एतस्मिन्देहादौ वस्तुबुद्धिं स्थूलसूक्ष्मक्रमेण निर
सेत् त्यजेत् ॥ ११ ॥ गुरोर्लब्धा विद्या विद्यातत्कार्यनिरसनेदमेतिस्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेण
निरूपयति आचार्य इति ॥ आद्यः उत्तरः अधरः तत्संधानं तयोर्मध्यमं मथनं काष्ठं प्रवचनं उपदेशः ॥
विद्याग्निसंधिः संधौ भवत्वग्निर्विद्या तथा च श्रुतिः आचार्यः पूर्वरूपं अंतेवासी उत्तररूपं विद्या संधिः प्र
वचनं संधानमिति ॥ १२ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ग॰
ए॰टी॰
४७

अस्मिन्सादृश्यमेवाह वैशारदीतिविशारदोतिनिपुणः तेनशिष्येणशास्त्रातेनगुरुणोपदिष्टावाअ
तिविशुद्धाबुद्धिः गुणकार्यरूपांमायांनिवर्त्तयतियदात्मकमेतद्विश्वंजीवस्यसंसृतिनिमित्तंतान्
गुणांश्चदग्ध्वाअसमित्निरिंधनःतस्मात्कार्येणकारणेनविषयाच्चव्यवधानाभावात्स्वात्मस्वरूपान
दरूपोभवतीति ॥ १३ ॥ एवंतावत्त्वंप्रकाशात्मानस्वरूपोनित्यएकएवात्माकर्तृत्वादयश्चधर्मास्तस्यदेहो
पाधिकाःतच्चतिविक्तंचसर्वमनित्यंमायामयंचअतःसर्वतोविरक्तःसन्नात्मतत्त्वेनेनम्यच्यत विलक्षणं
इत्युक्तंविलक्षणःस्थूलसूक्ष्मादित्यादिना ॥ तदेवंश्रुतिसमन्वयेननिर्णीतेप्यर्थेमतांतरविरोधेनसं

वैशारदीसातिविशुद्धबुद्धिर्धुनोतिमायांगुणसंप्रसूतां ॥ गुणांश्चसंदह्ययदात्ममेतत्स्व
यंचशाम्यत्यसमिद्यथाग्निः ॥ १३ ॥ अथैषांकर्मकर्तृणांभोक्तृणांसुखदुःखयोः ॥ नाना
त्वमथनित्यत्वंलोककालागमात्मनाम् ॥ १४ ॥

देहोमाभूदितितन्मतंनिराकर्तुमुद्भावयतिअथेतिअथमन्यसे ॥ एषांजीवात्मनांकर्मकर्तृणांसुखदु
दुःखयोर्भोक्तृणांचनानात्वमितिएवंहिजैमिनीयामन्यंतेअहंप्रत्ययवेद्यएवात्मासचप्रतिशरीरंभि
न्नःकर्ताभोक्तारूपश्चनतुनित्यरूपभूतोनिर्विकारएकःपरमात्मास्तीतियथाहुःअहंप्रत्ययविज्ञेयोत्ता
तव्यःसर्वदेवहीतितनध्यावैराग्यंचनसंभवति ॥ तथाहिभोगस्यानानामनित्यत्वाद्वावैराग्यंभवेत् ॥ भोग
कालस्यवातदुपायकर्मबोधकागमस्यवाभोक्तुरात्मनोवानत्वेतदस्तीत्याह ॥ अथनित्यत्वंलोकर
कालागमात्मनांमन्यसइति ॥ १४ ॥ रामायनमः ॥

राम॰
४७

न च भोग्यानां विच्छेदान्मायामयत्वाद्वा वैराग्यं स्यादित्याह ॥ सर्वभावानां स्वच्छंदनाशीनां संस्थास्थितिः ॥ उत्पत्ति-
कीभवत्वाह दृष्टेयानित्या ॥ तथा च वदंति ॥ न कदाचिदनीदृशं जगदिति ॥ अतस्तत्कर्तालोके कश्चिदीश्वरोपि नास्तीति भा-
वः ॥ किं च पश्यायपश्यावत ॥ न च मायामयीत्यर्थः ॥ न चात्मस्वरूपभूतं नित्यमेकं ज्ञानमस्तीत्याह ॥ तवदिति ॥ घटप-
टाद्याकारभेदेन धीर्जायते ॥ अतो नित्या भिद्यते च ॥ अयं भावो भिप्रायः ॥ नहि नित्यज्ञानरूप आत्मा अपि तु ज्ञानप-
रिणामवान् ॥ न च विकारित्वेनानित्यत्वप्रसंगः ॥ यथाह ॥ विक्रियात्मज्ञानरूपस्यानित्यत्वे विरोधितं इति ॥ अतोऽ-
कोशेन्द्रियादिरहितस्य परिणामासंभवात्तत्त्वेन न तत्त्वाग्रे रूपत्वात्स्वज्ञानिरेव श्रेयसे न निवृत्तिरिति ॥ १४ ॥

मध्ये सर्वभावानां संस्थानोत्पत्तिकीर्तना यथा ॥ तत्तदाकृतिभेदेन जायते भिद्यते च धीः ॥ १४ ॥ एवमप्यंग
सर्वेषां देहिनां देहयोगतः ॥ कालावयवतः संति भावा जन्मादयोऽसकृत् ॥ १५ ॥ अत्रापि कर्मणां कर्तुरस्वा-
तंत्र्यं च लक्ष्यते ॥ भोक्तुश्च दुःखसुखयोः को न्वर्थो विवशं भजेत् ॥ १६ ॥ न देहिनां सुखं किंचिद्विद्यते विदुषा-
मपि ॥ तथा च दुःखं मूढानां वृथाहंकरणं परं ॥ १७ ॥

तदेवं तावत् दुःखसंकीर्णत्वात् वैराग्योत्पादनाय प्रवृत्तिमार्गस्यानर्थहेतुत्वं प्रपंचयति ॥ एवमपीत्यादिना लोकानां
लोकपालानामित्यर्थः ॥ प्राक्तनेन ग्रंथेन अंगदेहजन्म कालावयवतः ॥ सर्वत्र सदादिरूपात् ॥ १५ ॥ अत्रापीति स्वातं-
त्र्ये सति दुःखं नेच्छेत् सुखभोगस्य वा संभवादित्यर्थः ॥ १६ ॥ ननु ये सम्यक् कर्म कर्तुं जानंति तेषां दुःखं न स्यात् ये तु न जानं-
ति त एव दुःखिनः स्युः इति चेत्तत्राह ॥ नेति ॥ विदुषामपि कुशलानां सुखं न विद्यते ॥ तथा मूढानामपि दुःखं न विद्यते ॥ अतो
यत्कर्मकौशलं तत्सुखिन इतरे दुःखिन इति तेषां केवलं वृथैवाहंकार इत्यर्थः ॥ १७ ॥

श्री भाग पदी ४८

अंगीकृत्याप्याह ॥ यदीति ॥ ते योगं उपायं न विदुर्येनासौ तान् मृत्युर्न प्रभवेत् ॥ १९ ॥ तथापि यावज्जीवं सुखं भविष्यती
ति चेत् तन्नेत्याह कोन्विति यतः ॥ अंतिके वर्तमानो मृत्युर्न तुष्टिं ददाति आघातं वधस्थानं प्रति ॥ २० ॥ एवमस्मिन् लोके
सुखं नास्तीत्युक्त्वा लोकांतरेपि नास्त्येवेत्याह ॥ श्रुतमिति श्रुतं स्वर्गादि तदपि दुष्टं स्पर्द्धा परसुखासहनं ॥ असूया पर
गुणेषु दोषाविष्करणं अत्ययो नाशः ॥ व्ययो पुण्यक्षयः तैर्दुष्टं यद्वा व्ययो नाशः अत्ययोन्यस्यातिशयः ॥ तत्र दृष्टांतद्वारा
दुःखमित्यर्थः ॥ किंच बहवोंतराया वैगुल्यादिरूपा विघ्ना यस्मिन् कामे सुखे तस्य भावः तत्वं तस्मात् ॥ कृषिर्यथाव

यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः ॥ तेप्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा ॥ १९ ॥ कोन्वर्थः सुख
यत्येनं कामो वा मृत्युरंतिके ॥ आघातं नीयमानस्य वध्यस्येव न तुष्टिदः ॥ २० ॥ श्रुतं च दृष्टवद्दुष्टं स्पर्द्धासू
यात्ययव्ययैः ॥ बह्वंतरायकामत्वात्कृषिवच्चापि निष्फलं ॥ २१ ॥ अंतरायैरविहितो यदि धर्मः स्वनुष्ठि
तः ॥ तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु ॥ २२ ॥ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञिकः ॥ भुंजी
त देववत्तत्र भोगान्दिव्यान्निजार्जितान् ॥ २३ ॥ स्वपुण्योपचिते शुभ्रे विमान उपगीयते ॥ गंधर्वैर्विहरन्म
ध्ये देवीनां हृद्यवेषधृक् ॥ २४ ॥ स्त्रीभिः कामगयानेन किंकिणीजालमालिना ॥ क्रीडन्न वेदात्मपातं
सुराक्रीडेषु निर्वृतः ॥ २५ ॥ ॥

द्विघ्नान्नश्यति ॥ बहु सुखत्वेन कृतमपि निःफलं ॥ २१ ॥ विघ्नं वैगुण्यपायभावमंगीकृत्यापि नाशदुःखं दुष्परि
हरमित्याह ॥ अंतरायैरिति पंचभिः निर्जितं साधितं ॥ २२ ॥ यज्ञैर्देवता इंद्रादिरूपा इष्ट्वा ॥ २३ ॥ स्वपुण्यैरुपचिते स
र्वभोगसंपन्ने देवीनां मध्ये विहरन् गंधर्वैरुपगीयते ॥ २४ ॥ कामेनेच्छया गच्छता विमानेन किंकिणीजालमा
लिना क्षुद्रघंटिकासमूहशोभिना सह स्त्रीभिः सुराक्रीडेषु नंदनादिषु क्रीडन्नात्मपातं न वेद ॥ २५ ॥ ॥

राम ४८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कालेन चालितः पातितः ॥२६॥ प्रवृत्तिर्हि द्विविधा विध्यनुसारेण काम्ये कर्मणि वा तदुल्लंघनेनाधर्म्ये वा तत्र का
म्यप्रवृत्तेर्गतिरुक्ता अधर्मप्रवृत्तेर्गतिमाह ॥ यदीति यदि चेत्सत्त्वयः ॥ अजितेन्द्रियत्वात्कामात्मा अतः कृपणः
अतो लुब्धो भोगतृष्णाकुलः ॥ अतः स्त्रैणः स्त्रीलंपटः ॥ तदर्थं विहिंसकः ॥२७॥ किंच तुच्छजनप्रलोभितः पशू
न्यष्टुं पशून विधिना हत्वा तमः स्थावरतां याति ॥२८॥ एवं कर्मसु प्रवृत्तस्य न सुखं न च निर्वृतिरित्युपसंह

तावत्स मोदते स्वर्गे यावत्पुण्यं समाप्यते ॥ क्षीणपुण्यः पतत्यर्वागनिच्छन्कालचालितः ॥२६॥ यद्य
धर्मरतः संगादसतां वाजितेन्द्रियः ॥ कामात्मा कृपणो लुब्धः स्त्रैणो भूतविहिंसकः ॥२७॥ पशूनवि
धिनालभ्य प्रेतभूतगणान्यजन् ॥ नरकानवशो जन्तुर्गत्वा यात्युल्बणं तमः ॥२८॥ कर्माणि दुःखोदर्का
णि कुर्वन्देहेन तैः पुनः ॥ देहमाभजते तत्र किं सुखं मर्त्यधर्मिणः ॥२९॥ लोकानां लोकपालानां मद्भ
यं कल्पजीविनां ॥ ब्रह्मणोपि भयं मत्तो द्विपरार्द्धपरायुषः ॥३०॥ ॥

रति किं सुखमस्तीति ॥२९॥ तथापि लोकानां नित्यत्वादमर्त्यधर्मत्वाच्च लोकपालानां सुखमस्तीति चेत्तत्राह ॥ लो
कानामिति द्विपरार्द्धं परमायुर्यस्य तस्य ब्रह्मणोपि ॥ तथा च श्रुतिः ॥ भीषास्माद्वातः पवते भीषोदेति सूर्यः
भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचम इति ॥ अतः प्रवृत्तिमार्गस्यैव मनर्थहेतुत्वाद्विरज्य ततो निवृत्ति
रेव युक्तेति तात्पर्यार्थः ॥३०॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी॰
४९

एतेनैव स्वयमीश्वरत्वात् विष्णोरेणेश्वरा आवश्यंगीकारः परित्यक्तः ॥ अन्यदपि प्रौढ्या पूर्वमंगीकृतं निराकु-
र्वन्ति चतुर्भिः ॥ तत्र यदुक्तं कर्तृभोक्तृरूपपरमात्मेति तन्निराकरोति ॥ गुणा इति गुणा इन्द्रियाणि कर्माणि सृज-
न्ति न त्वात्मा ॥ आत्मैवेन्द्रियाणि प्रवर्तयन् कर्माणि करोतीति चेत्तत्राह ॥ गुणा इति गुणाः सत्वादयः ॥ गुणानिन्द्रि-
याणि अनुसृजते प्रवर्तयति ॥ न त्वात्मा अतः कर्तृत्वं तावन्नास्ति भोक्तृत्वमप्यौपाधिकमित्याह ॥ जीवस्त्वि-
ति ॥ गुणसंयुक्त इन्द्रियादिसंयुक्तः ॥ ज्ञत इत्यत आह ॥ असौ तेष्वहंकारवानित्यर्थः ॥ ३० ॥ यच्चोक्तमात्मनो ना-

गुणाः सृजंति कर्माणि गुणोऽनुसृजते गुणान् ॥ जीवस्तु गुणसंयुक्तो भुंक्ते कर्मफलान्यसौ ॥ ३१ ॥
यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः ॥ नानात्वमात्मनो यावत्पारतंत्र्यं तदैव हि ॥ ३२ ॥ या-
वदस्यास्वतंत्रत्वं तावदीश्वरतो भयं ॥ य एतत्समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ॥ ३३ ॥ ॥

नानात्वं तदप्यौपाधिकमित्याह ॥ यावत्स्यादिति ॥ गुणानां वैषम्यं अहंकारादिकार्यरूपं न त्वात्मनः एक-
त्वेकस्यैव पारतंत्र्यमुक्तं कथं वा लोकपालादीनामपि मद्भयमित्युक्तं तत्राह ॥ नानात्वमिति ॥ ३२ ॥ यच्च स्व-
ष्ठ समभिप्रेतं प्रहसन्निरेव श्रेयसीति तत्राह ॥ य एतदिति ॥ एतत् गुणवैषम्यं तत्कृतं कर्म भोगं चेत्यर्थः ॥ उ-
पासीरन् सेवेरन् स्वर्लोकादीनामनित्यत्वात् ॥ शुचार्पिताः प्रेताः सन्तो मुह्यन्ति ॥ ३३ ॥ ॥ ॥

राम
४९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नकेवलमनित्यत्वमात्रंकिंतुमायामयत्वमपीत्याह । कालइति । स्वभावोदेवत्वादिपरिणामेहेतुः।धर्म
स्तज्ज्ञानकारणं गुणव्यतिकरेमायाक्षोभेसति मामेवप्राहुः॥ ननुमद्व्यतिरिक्ताः संतितेनिर्हेतुत्वेनैव
मुक्तिहेतुत्वात्श्रेयसीतिसिद्धं॥ ३४॥ एवंतावदेकएवात्मातस्यचगुणकार्यदेहसंबंधकृतःसंसारः
आत्मज्ञानाच्चमुक्तिरित्युक्तं विलक्षणःस्थूलसूक्ष्मादित्यादिनातदेवचमतांतरनिरासेनदृढीकृतेअथ
द्वैवमित्यादिना॥ तत्रशंकते गुणेष्विति॥ अयमर्थः॥ गुणेषुसत्सुमुक्तिःसत्स्वेववा। आद्येत्वात्मसाधनाभा

कालआत्मागमोलोकःस्वभावोधर्मएवच॥ इतिमांबहुधाप्राहुर्गुणव्यतिकरेसति॥ ३४॥ उद्धव
उवाच॥ गुणेषुवर्तमानोपिदेहजेष्वनपावृतः॥ गुणैर्नबध्यतेदेहीबध्यतेवाकथंविभो॥ ३५॥ क
थंवर्तेतविहरेत्कैर्वाज्ञायेतलक्षणैः॥ किंभुंजीतोतविसृजेच्छयीतासीतयातिवा॥ ३६॥ एतदच्युत
मेब्रूहिप्रश्नंप्रश्नविदांवर॥ नित्यमुक्तोनित्यबद्धएकएवेतिमेभ्रमः॥ ३७॥ इत्येकादशेदशमोध्यायः

वात्मयुक्तिः॥ द्वितीयेचगुणेषुवर्तमानोपितत्कार्यदेहजेषुकर्मसुसुखादिषुचकथंनबध्यतेतथापितै
राकाशवदनावृतत्वान्नबध्यतइतिचेत्तर्हिबंधोनसंभवतीत्याह॥ अनपावृतःकथंवबध्यतइतियद्विवसः
त्स्वेवतद्देहकारेणबध्यतेनत्विहस्थश्चमुच्यतेइतिमतं। तर्हितत्कथंज्ञातव्यमितिपृच्छति। बद्धोमुक्तोवा
कथंवर्तेत [illegible] इत्यादि॥ किंभुंजीतकथंभुंजीतेत्यर्थः॥ ३६॥ एतन्नद्विषयंप्रश्नंकिंवएकएवात्माऽनादि
लसर्वथाविद्याबद्धः॥ मुक्तेर्जन्यत्वेऽनित्यत्वप्रसंगान्नित्यमुक्तइत्यप्यंगीकार्यंस्यात्॥ तत्रमेभ्रमोभवतीत्या
हनित्यबद्धइति॥ ३७॥ इत्येकादशेदशमः॥ १०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा ग
ए टी
५०

एकादशेतुबद्धानांमुक्तानांचापिलक्षणं॥ साधूनांचतथाभक्तेर्लक्षणंहरिणेरितं॥ नित्यबद्धोनित्यमु
क्तएकएवेतिमेभ्रमइतियदुक्तं॥ तत्किंवस्तुतोविरोधात॥ प्रतीतितोवा॥ नाद्यः बंधमोक्षयोर्वास्तवत्वा
भावादित्याह॥ बद्धोमुक्तइति द्वाभ्यां आत्माबद्धोमुक्तश्चमेगुणतः॥ मदधीनसत्वादिगुणोपाधितः॥
नतुवस्तुतः॥ नन्वौपाधिकत्वेपितंडुलपाकादिवद्वास्तवत्वंकिंनस्यात् तत्राह॥ गुणस्यमायामूलत्वा
द्बंधनेनास्तिअतएवमोक्षश्चनास्तीति॥ ननुकथंसर्वशास्त्रविरुद्धमुच्यते तत्राह॥ इतिमेव्याख्येतिएवं

श्रीभगवानुवाच॥ बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः॥ गुणस्यमायामूलत्वान्नमे
मोक्षोनबंधनं॥१॥ शोकमोहौसुखंदुःखंदेहापत्तिश्चमायया॥ स्वप्नोयथात्मनःख्यातिः
संसृतिर्नतुवास्तवी॥२॥

मदुक्ततोनिर्णयः॥ अलमतिकुतर्कैरित्यर्थः॥ अथवैवमन्वयः॥ आत्माबद्धोमुक्तइतियाव्याख्याउक्तिः
सामेगुणतः मद्गुणपारतंत्र्यात्॥ अत्रदेहत्वेनगुणनियंतरिस्वस्मिंस्तद्व्यतिरेकमाह॥ अतएवनमेबं
धनंमोक्षोवेति॥ अस्पष्टमानं॥ एवंकारणभूतगुणानांमायामयत्वात्तत्कार्यसंसृतिमायेतिप्रपंचय
ति॥ शोकमोहाविति यथास्वप्नः॥ आत्मनःबुद्धेरेवख्यातिर्विवर्तः तद्वत्॥२॥ ॥

भा॰
५०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतोवस्तुविरोधस्तावन्नास्तिप्रतीतिसिद्धौपाधिकीयदतइत्याह॥ विद्याविद्येइतिनन्वेतेमोक्षबंधावाभ्यामिति
तनूशक्तीकुतः मेमाययाविनिर्मितेमायाहृदिनिरूपत्वात्॥ बंधमोक्षकरीत्येकवचनंद्विवचनार्थेनतुतत्कार्यत्वे:
बंधमोक्षयोरनादित्वनित्यत्वेनस्यातांनत्वाद्येअनादीअतोयावदविद्याप्रवर्ततेयावन्मित्यावद्बंधः॥ यदाविद्योदस्तदा
मित्तदामोक्षःस्फुरतीत्यर्थः॥ तथाचस्कंदपुराणे॥ बंधकोभवपाशेनभवपाशाच्चमोचकः॥ कैवल्यदःपरं
ब्रह्मविष्णुरेवसनातनइति॥ तथाशरीरिणामिति॥ षड्वचननिर्देशाद्विषयभेदेनाविरोधउक्तइति॥३॥ भ्रांतिं
निवर्तयन्बंधमोक्षव्यवस्थामुपपादयति॥ एकस्यैवेति॥ तर्हिकिमात्माभेदाज्जीवापिबंधः नहीत्याह॥ अस्य

विद्याविद्येममतनूविद्ध्युद्धवशरीरिणां॥ मोक्षबंधकरीआद्येमाययामेविनिर्मिते॥३॥ एकस्यैव
ममांशस्यजीवस्यैवमहामते॥ बंधोस्याविद्ययानादिर्विद्ययाचतथेतरः॥४॥ ॥

जीवस्यैवेति॥ नन्वात्माभेदेजीवोनामकोन्योऽस्तियस्यकथंचबंधमोक्षसुखदुःखादिव्यवस्थातत्राह॥ मम
मांशस्यअयंभावः॥ यथैकस्यापिचंद्रादेर्जलाद्युपाधिनाबिंबप्रतिबिंबरूपोभेदः॥ यथाचतत्रजलकंपनात्कंपा
दयः॥ प्रतिबिंबस्यैवयथाच॥ तत्रप्रतिबिंबानामप्युपाधिभेदेनभेदादेकस्मिन्॥ उदककुंभभंगेनतत्प्रतिबिंब
स्यैवाविवेकोनान्यगतस्यतथाविद्यायांप्रतिबिंबितस्यममांशस्यजीवस्यैवतत्कृतोबंधः तस्यचोपाधितो
भेदाद्व्यवस्थेतितथाचाहुः॥ यथैकस्मिन्घटाकाशेरजोधूमादिभिर्युते॥ नसर्वेसंप्रयुज्यंतेतद्वज्जीवाःसुख
त्वादिभिरिति॥ एतच्चातिरहस्यंस्वबुद्ध्यानिश्चेतव्यमितिसंबोधयतिहेमहामतेइतरोमोक्षः॥४॥ ॥ ॥

तदेवं बन्धमोक्षावुपपाद्य कथं वर्तेतेत्यादि ॥ वैलक्षण्यप्रश्नस्योत्तरमाह ॥ अथेति तत्र वैलक्षण्यं द्विविधं जीवे-
श्वरयोरेकं ॥ जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह ॥ विरुद्धधर्मिणोरिति सार्द्धद्वयेन ॥ शोकानन्दध-
र्मवतोः एकस्मिन् धर्मिणि शरीरे ॥ नियम्यनियन्तृत्वेन स्थितयोः ॥ ५ ॥ तदेव कथयति सुपर्णाविति द्वाभ्यां पक्षि-
णाविव देहाश्रयभूतौ सदृशौ चिद्रूपत्वात् ॥ सखायौ अवियोगादेकमत्याच्च यदृच्छया निरुक्त्या मा-
यया निर्मिते वृक्षे देहः ॥ ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रतीति श्रुतेः ॥ ऊर्ध्वमूलमधःशाखम-
श्वत्थं प्राहुरव्ययमिति स्मृतेश्च तस्मिन् कृतं नीडं निकेतनं हृदयरूपं याभ्यां तौ तयोर्मध्ये एको जीवः ॥ पि

अथ बद्धस्य मुक्तस्य वैलक्षण्यं वदामि ते ॥ विरुद्धधर्मिणोस्तात स्थितयोरेकधर्मिणि ॥ ५ ॥ सुप-
र्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ॥ एकस्तयोः खादति पिप्पलान्नमन्यो निर-
न्नोऽपि बलेन भूयान् ॥ ६ ॥ आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः ॥ योऽविद्यया
युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥ ७ ॥

प्पलान्नं पिप्पलस्य वृक्षस्य देहस्य तस्मिन्नदनीयं कर्मफलमित्यर्थः ॥ खादति भक्षयति अन्यः ईश्वरः निरन्नः अ-
भोक्तापि निजानन्दतृप्तत्वात् बलेन तेजसा विशिष्टतया भूयान् अधिकः श्रुतिश्च ॥ द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति श्रुतिः ॥ बलाधिक्यमेवाह
आत्मानमिति ॥ अतः योऽविद्यया युक् युक्तः स तु नित्यबद्धः ॥ अनादिबद्धः यस्तु विद्याप्रधानः स तु नित्य-
मुक्तः मायाया अनावरकत्वात् ॥ आश्रयत्वामोहकत्वाच्च ॥ ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इदानीं बद्धमुक्तजीवानामेव मिथो वैलक्षण्यमाह ॥ देहस्थोपीति द्वाभ्यां ॥ विद्वान्मुक्तः संस्कारवशेन
देहस्थोपि देहस्थो न भवति ॥ यथा स्वप्नादुत्थितः स्मर्यमाणे स्वप्नदेहे स्थितोपि तत्रस्थो न भवति तद्वत्
सुखदुःखाद्यभावात् ॥ तद्वन्न यथा बद्धः तिः ॥ अदेहस्थोपि कुमतिः ॥ अविद्वान् देहस्थः तन्निमित्तसुखदुः-
खभाक् ॥ यथा स्वप्नदेहागतदृष्टिः ॥ ८ ॥ अत्र हेतुत्वेन वैलक्षण्यांतरमाह द्वाभ्यां ॥ इंद्रियैरिंद्रियार्थेषु गृह्य-
माणेष्वपि यस्तु विद्वान् सः नाहं कुर्यात् ॥ अहं करोमीति मतिं न कुर्यादित्यर्थः ॥ कुतः गुणैर्गुणेषु गृह्य-

देहस्थोपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः ॥ अदेहस्थोपि देहस्थः कुमतिः स्वप्नदृग्यथा ॥ ८ ॥
इंद्रियैरिंद्रियार्थेषु गुणैरपि गुणेषु च ॥ गृह्यमाणेष्वहंकुर्यान्न विद्वान्यस्त्वविक्रियः ॥ ९ ॥
दैवाधीने शरीरेस्मिन् गुणभाव्येन कर्मणा ॥ वर्तमानोऽबुधस्तत्र कर्तास्मीति निबध्यते ॥ १० ॥

माणेषु अत एव अविक्रियः ॥ रागादिशून्यः ॥ तदुक्तं गीतासु ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभाग-
योः ॥ गुणा गुणेषु वर्तंत इति मत्वा न सज्जत इति ॥ ९ ॥ अबुधस्तु एवं कर्माधीनेस्मिन् शरीरे वर्तमानः
गुणैरिंद्रियैर्भाव्येन कर्मणा तत्र देहादौ निबध्यते ॥ कुतः कर्तास्मीत्य अहंकारेण तदुक्तं तत्रैव ॥ प्रकृ-
तेः क्रियमाणानि गुणैः कर्माणि सर्वशः ॥ अहंकारविमूढात्मा कर्ताहमिति मन्यत इति ॥ १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ ११
टी॰
५२

ने

पते त्रिभिः श्लोकैः कथं वर्तेतस्य प्रश्नस्य स्तु तत्र तु स्वभाग्यो निरभिमानस्य देहे वर्तेतेत्युत्तरमुत्तरश्लोके
भवति वैलक्षण्यानरवदन् । किं भुंजीते त्यादि प्रश्नोत्तरमाह एवमिति त्रिभिः । अन्यगात्मैवकर्मसाव भ्राग
नीमेवं विरक्तो विद्वान् ॥ तथा विद्वानिव शयनासनादिषु न बध्यते । ऊतः तत्र तत्र विषयेषु गुणानींद्रि
याणि आदयन् । भोजयन् तत्साक्षित्वेन वर्तमानः न तु स्वयमदन् । एतदेव ऊतः तत्राह । प्रकृतिस्थोपीः

एवंविरक्तः शयनआसनाटनमज्जने । दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ॥१॥ नतथा
बध्यते विद्वांस्तत्र तत्रादयन् गुणान् । प्रकृतिस्थोप्यसंसक्तो यथा खं सवितानिलः ॥२॥ वैशा
रद्येक्षयासंग शितयाछिन्नसंशयः । प्रतिबुद्ध इव स्वप्नान्नानात्वाद्विनिवर्तते ॥३॥ यस्यस्युः
वीतसंकल्पाः प्राणेंद्रियमनोधियां । वृत्तयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः ॥४॥

तिसाहेन ॥ यथा खं सर्वत्रास्थितमपि न सज्जते यथा सविता जले प्रतिबिंबितोऽपि यथानिलः सर्वत्रसं
चरन्नपि तद्वत् ॥२॥ असंगेन वैराग्येण शितया तीक्ष्णया छिन्नाः संशया असंभावनादयो यस्य सः ॥ ना
नात्वात् देहादिप्रपंचात् ॥३॥ कथं विद्वदेदिनस्यात्त्वत्वेन वैलक्षण्यातरमाह ॥ यस्य स्युरिति तद्गुणै
र्देहगुणैः संकल्पशून्याभिः प्राणादिवृत्तिभिर्विद्वान्मुक्तः स्यादित्यर्थः ॥४॥

राम॰
५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं तावद्दृढमुमुक्षोः स्वसंवेद्यमेव वैलक्षण्यमुक्तं ॥ इदानीं केर्वा ज्ञायेत लक्षणैरित्यपेक्षायां परैरपि ज्ञेयं
वैलक्षण्यमाह ॥ यस्मान्नेति त्रिभिः ॥ हिंस्रैर्दुर्जनैरन्यैर्वा प्राणिभिः ॥ यस्मान्नोद्विजते । यदृच्छया येन केना
पि क्वचित् किंचित् ॥ अर्च्यते वा सः बुधश्चेत् तत्र न व्याप्रियते नाति विक्रियत इत्यर्थः ॥ तदुक्तं याज्ञवल्क्येन (
यः कंटकैर्विनुदति चंदनैर्यश्च लिंपति ॥ अक्रुद्धोऽपरितुष्टश्च समस्तस्य च तस्य चेति २५ ॥ किंच ॥ साध्वसाधु
वा कुर्वतो वदतो वा जनान् न स्तुवीत न च निंदेत ॥ यो लौकिकव्यवहारे विमुखः समदृक् इत्यर्थः ॥ २६ अपि वा

यस्मान्नाद्विंस्यते हिंस्रैर्येन किंचिद्यदृच्छया ॥ अर्च्यते वा क्वचित्तत्र न व्याप्रियते बुधः ॥ २५ ॥ न स्तु
वीत न निंदेत कुर्वतः साध्वसाधु वा ॥ वदतो गुणदोषाभ्यां वर्जितः समदृङ्मुनिः ॥ २६ ॥ न कुर्यान्न
वदेत्किंचिन्न ध्यायेत्साध्वसाधु वा ॥ आत्मारामोऽनया वृत्त्या विचरेज्जडवन्मुनिः ॥ २७ ॥ शब्दब्रह्मणि
निष्णातो न निष्णायात्परे यदि ॥ श्रमस्तस्य श्रमफलो ह्यधेनुमिव रक्षतः ॥ २८ ॥ ॥ राम ॥ ॥

कुर्यादिति यो दैहिकेपि कर्मण्युदासीनः समदृक् इतरो बद्ध इत्यर्थः ॥ २७ ॥ एतान्येव सर्वाणि मुमुक्षोः साधना
नि ज्ञानस्थानि ॥ यस्तु केवलं शाब्दब्रह्मण्येव मितः पांडित्यमात्रप्रधानस्तैः साधनैः न दर्शनिष्ठो भवेत्
तं निंदति शब्दब्रह्मणि निष्णातः पारंगतोऽपि परे ब्रह्मणि न निष्णायात् ध्यानाद्यभियोगं न कुर्यात्तस्य फलास्तु श्र
मः श्रमैकफलः न तु पुरुषार्थपर्यवसायी अधेनुं विरप्रसूताम् ॥ २८ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग॰
ए॰टी॰
५२

एतदेवान्यार्थेनिर्दिशनेः प्रपंचयतिगामितिद्वाभ्यांदुग्धइतिदोहः पयः दुग्धोदोहोनोत्तरत्रदोहोनास्तियस्याः तांअप्रसू
त्वांअसतींभार्यांकामम्अन्यासक्तांदेहंपराधीनंप्रतिक्षणंदुःखहेतुंअसत्प्रजांदुष्टांदुष्टसाधनशून्यांपुत्रंअतीर्थी
कृतंअनागतेपात्रेदत्तंवित्तंदुःखाद्दुःखीतिदुःखिता पादकंअंगदेहेदुःखवृद्धः ॥ त्वाअनंतरंदुःखमेवयस्यसःरक्षति ॥१९
मयाहीनांवाचमित्युक्तं विवृणोतियस्मिन्नमेजगतः पोषकंचरित्रंनस्यात् किंतत् अस्यविश्वस्यस्थित्या
दिरूपंतद्धेतुरित्यर्थः ॥ लीलावतारेषुईप्सितंजगतः प्रेमास्पदंश्रीरामकृष्णादिजन्मवानस्यात्तांनिष्फ

गांदुग्धदोहामसतींचभार्यांदेहंपराधीनमसत्प्रजांच ॥ वित्तंत्वतीर्थीकृतमंगवाचंहीनांमया
रक्षतिदुःखदुःखी ॥१९॥ यस्मिन्नमेपावनमंगकर्मस्थित्युद्भवप्राणनिरोधमस्य ॥ लीलावतारे
प्सितजन्मवास्याद्वंध्यांगिरंतांबिभृयान्नधीरः ॥२०॥ एवंजिज्ञासयापोह्यनानात्वभ्रममात्मनि ॥ उपा
रमेतविरजंमनोमय्यर्प्यसर्वगे ॥२१॥ यद्यनीशोधारयितुंमनोब्रह्मणिनिश्चलं ॥ मयिसर्वाणिक
र्माणिनिरपेक्षःसमाचर ॥२२॥ श्रद्धालुर्मेकथाःशृण्वन्सुभद्रालोकपावनीः ॥ गायन्ननुस्मरन्क
र्मजन्मचाभिनयन्मुहुः ॥२३॥ ॥

लांगिरंधीरोधीमान्नधारयेत् ॥२०॥ उक्तंज्ञानमार्गमुपसंहरति ॥ एवंनिश्चित्यविचारेणआत्मनिनानात्वभ्र
मंदेहाद्यध्यासंनिरस्यनिर्मलेमनोमयिसर्वगेपरिपूर्णेसम्यक्संधार्यउपारमेतननकिंचिद्विचिन्तयेत् ॥ न
शास्त्रपांडित्यमात्रेणेत्यर्थः ॥२१॥ यद्यनीशः ॥ असमर्थःतर्हिआस्तामिदंमद्भक्त्यैवकृतार्थोभविष्यसि
इत्याहमयीति ॥२२॥ मदर्पणेनकर्मभिर्विशुद्धसत्त्वस्यानंतरंगांभक्तिमाह ॥ श्रद्धालुरितित्रिभिःयत्र
स्वयमनुकुर्वन् ॥२३॥ ॥

राम॰
५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आचरन्त सेवमानाः ॥२४॥ ततश्चानेन प्रकारेण मयि सत्संगेन लब्धया भक्त्या स भक्तः मां उपासिता ध्याता भवति ॥
स च ध्यानशीलः सद्भिर्दर्शितं वै निश्चितं सुखेनैव मे पदं स्वरूपं प्राप्नोति ॥२५॥ सत्संगलब्धया भक्त्येत्युक्तं तत्र सतां
भक्तेश्च विशेषं पृच्छति ॥ साधुरिति साधवः स्वस्वमतिपरिकल्पिताः सन्ति बहवः तत्र कीदृशाः संमतः भक्तिर
पि बहुविधा लोके कीदृशी पुनस्त्वय्युपयुज्येत ॥ सद्भिश्च नारदादिभिरादृता एतच्च कथ्यतां ॥२६॥ इदं चाति
गुह्यं त्वयैव वक्तव्यमित्यैश्वर्यमाविष्करोति ॥ हे पुरुषाध्यक्षेत्यादिना ब्रह्मादिनियंतः ॥२७॥ अत्र हेतुः त्वमिति

मदर्थे धर्मकामार्थानाचरन्मदपाश्रयः ॥ लभते निश्चलां भक्तिं मय्युद्धव सनातने ॥२४॥ सत्सं
गलब्धया भक्त्या मयि मां स उपासिता ॥ स वै मे दर्शितं सद्भिरंजसा विंदते पदम् ॥२५॥ उद्धव उवाच ॥
साधुस्तवोत्तमश्लोक मतः कीदृग्विधः प्रभो ॥ भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता ॥२६॥ ए
तन्मे पुरुषाध्यक्ष लोकाध्यक्ष जगत्प्रभो ॥ प्रणतायानुरक्ताय प्रपन्नाय च कथ्यताम् ॥२७॥ त्वं ब्रह्म
परमं व्योम पुरुषः प्रकृतेः परः ॥ अवतीर्णोसि भगवन्स्वेच्छोपात्तपृथग्वपुः ॥२८॥ श्रीभगवानुवाच ॥
कृपालुरकृतद्रोहस्तितिक्षुः सर्वदेहिनां ॥ सत्यसारोनवद्यात्मा समः सर्वोपकारकः ॥२९॥ ॥

व्योमवदसंगो यतः प्रकृतेः परः स्वेच्छामिच्छया उपात्तं पृथक् परिमितं वपुर्येन सः ॥२८॥ तत्र त्रिंशल्लक्षणैः
साधुं निरूपयति कृपालुरिति पंचभिः कृपालुः परदुःखासहिष्णुः सर्वदेहिनां केषांचिदपि अकृतद्रोहः ॥
तितिक्षुः क्षमावान् सत्यसारः सत्यसारम् स्थिरं बलं वा वीर्यं यस्य सः अनवद्यात्मा असूयादिरहितः सुख
दुःखयोः समः यथाशक्ति सर्वेषामुपकारकः ॥२९ श्रीरामाय नमः ॥ ॥ राम ॥ ॥ ॐ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ ए॰ टी॰ ५४

कामैरक्षुभितचित्तः दांतः संयतबाह्येंद्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनी
हः दृष्टक्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः
मुनिर्मननशीलः ॥ ३० ॥ अप्रमत्तः सावधानः गंभीरात्मा निर्विकारः ॥ धृतिमान् विपद्यप्यकृपणः जितषड्गुणः
क्षु[illegible]त्पिपासे शोकमोहौ जरामृत्यू षडूर्मयः एते जिता येन सः अमानी निर्मानः अन्येभ्यो मानदः कल्यः
परबोधने दक्षः मैत्रः अवंचकः कारुणिकः करुणयैव प्रवर्तमानः न दृष्टलोभेन कविः सम्यक् ज्ञानी ॥ ३१ ॥
तदेवाज्ञायेत्यादिना कथयति मया वेदरूपेणादिष्टानपि स्वधर्मान् संत्यज्य यो मां भजेत सोपि एवं पूर्वोक्तवत्

कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः । अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः ॥ ३०
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः । अमानी मानदः कल्यो मैत्रः कारुणिकः कविः
॥ ३१ ॥ आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान् । धर्मान् संत्यज्य यः सर्वान् मां भजेत स सत्त
मः ॥ ३२ ॥ ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः ॥ भजंत्यनन्यभावेन ते मे भक्ततमा म
ताः ॥ ३३ ॥

सत्तमः किमत्र ज्ञानाज्ञानास्तिक्याद्वा अधर्माचरणे वा धर्मत्यागः न धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान् विपक्षे दो
षांश्च आज्ञाय ज्ञात्वापि यो मद्ध्यानविक्षेपतया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान् संत्यजत्य यद्वा
भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यजत्य अथवा विहितकादशीव्रतमासिकादिषु पवासानिवेद्यश्राद्धादयो ये भ
क्तिविरुद्धा धर्मास्तान् संत्यज्येत्यर्थः ॥ ३२ ॥ किंच यावान् देशकालापरिछिन्नः यश्च सर्वात्मा यादृशः सच्चिदा
नंदादिरूपः तं मां ज्ञात्वा अज्ञात्वापि यद्वा विशेषतः पुनः पुनर्ज्ञात्वा एकांतभावेन ये भजंतीति ॥ ३३ ॥

राम॰ ५४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

साधुलक्षणमुक्तं भक्तेर्लिंगान्माह मल्लिंगेत्यष्टभिः १॥

लिंगानि प्रतिमादीनि ॥ ३४ ॥ सर्वस्य लब्धस्य समर्पणं ॥ ३५ ॥ पर्वाणि जन्माष्टम्यादीनि तदनुमोदनेन तत्र संतोषः
३६ ॥ बलिविधानं पुष्पोपहारादिसमर्पणं सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः ॥ ३७ ॥ उद्याना-
दिकरणे सामर्थ्ये सति स्वतः ॥ असति वान्यैः संभूय मिलित्वा उद्यमः ॥ उद्यानं पुष्पप्रधानं उपवनं फलप्रधानं वनमा-
क्रीडं क्रीडास्थानं ॥ ३८ ॥ संमार्जनं रजसोपाकरणं उपलेपः ॥ गोमयोदकादिभिः ॥ आलेपनं सेकस्तैरेव प्रोक्षणं
मंडलवर्तनं सर्वतोभद्रादिकरणं मद्गृहे मम ॥ ३९ ॥ स्वयमन्येन वा निवेदितं स्वीकुर्यात् ॥ एतच्च साधारणस्याव-

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं ॥ परिचर्या स्तुतिः प्रह्वगुणकर्मानुकीर्तनं ॥ ३४ ॥ मत्कथाश्र-
वणे श्रद्धा मदनुध्यानमेव च ॥ सर्वलाभोपहरणं दास्येनात्मनिवेदनं ॥ ३५ ॥ मज्जन्मकर्मकथनं मम
पर्वानुमोदनं ॥ गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः ॥ ३६ ॥ यात्रा बलिविधानं च सर्ववार्षिकपर्वसु
वैदिकी तांत्रिकी दीक्षा मदीयव्रतधारणं ॥ ३७ ॥ ममार्चास्थापने श्रद्धा स्वतः संभूय चोद्यमः ॥ उद्यानो-
पवनाक्रीडपुरमंदिरकर्मणि ॥ ३८ ॥ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः ॥ गृहशुश्रूषणं मह्यं
दासवद्यदमायया ॥ ३९ ॥ अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं ॥ अपि दीपावलोकं मे नोपयुंज्या-
न्निवेदितं ॥ ४० ॥ षट्त्रिंशोऽसोपवासेऽस्तु यत्कल्पपरिकीर्तितं ॥ विष्णोर्नैवेद्यसिक्थेन पुण्यं तद्भुंजतां कलौ ॥ ४ ॥

टीकाश्लोकोयं १

हरेः

रविशये राग प्राप्तविषयं वा भक्त्या तत्याज्यमेव ॥ ३४ ॥ हरिदिने पक्वेनान्नमनैवेद्यमुदरे तस्थौ ॥ पादोदकं च निर्मा-
ल्यं मस्तके यस्य सोऽच्युत इति वचनात् ॥ यद्वा अन्यस्मै निवेदितं मां नोपयुंज्यात् ॥ मह्यं न निवेदयेत् ॥ विष्णोर्निवे-
दितान्नेन यष्टव्यं देवतान्तरं ॥ पितृभ्यश्चापि तद्देयं तदानन्त्याय कल्पते ॥ पितृशेषं तु यो दद्याद्धरये परमात्मने
रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥ इत्यादिवचनेभ्यः ॥ ४० ॥॥

यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते ॥ ४१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इदानीमेकादशपूजाधिष्ठानान्याह ॥ सूर्य इति ॥ २१

श्री। भाग। टी। ५५

हे भद्र अधिष्ठानभेदेन पूजाविधानान्याह त्रिभिः ॥ ४२ ॥ त्रय्या विद्यया सूक्तैरुपस्थानादिना अग्र्ये गोषु यवसादिना
तृणादिना ॥ ४३ ॥ बंधुसत्कृत्या बंधुसन्मानेन ॥ हृदि खे हृदयाकाशे मुख्यधिया प्राण इष्टेत्यर्थः ॥ न तथा

सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलं ॥ भूरात्मा सर्व
भूतानि भद्र पूजापदानि मे ॥ ४२ ॥ सूर्ये तु विद्यया त्रय्या हवि
षाग्नौ यजेत मां ॥ आतिथ्येन तु विप्राग्र्ये गोष्वंग यव
सादिना ॥ ४३ ॥ वैष्णवे बंधुसत्कृत्या हृदि खे ध्याननिष्ठया
वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ॥ ४४ ॥ स्थंडि
ले मंत्रहृदयैर्भोगैरात्मानमात्मनि ॥ क्षेत्रज्ञं सर्वभूतेषु स
मत्वेन यजेत मां ॥ ४५ ॥ ॥

पाद्यार्घ्यादौ

वतोयं तोयादिभिर्द्रव्यैस्तर्पणादिना एवं वायौ चेति ॥ ४४ ॥ स्थंडिलेषु विष्णुं मंत्रहृदयैः ॥ रहस्यमंत्रन्यासैः ॥ [illegible]
[illegible] ॥ ४५ ॥ ॥

राम। ५५

सर्वाधिष्ठानेषु ध्येयमाह ॥ धिष्ण्येष्विति अनेन प्रकारेण ॥ एषु धिष्ण्येषु ॥४६॥ उक्ताया भक्तेः फलमाह ॥ इष्टा
पूर्तेनेति मद्भक्तिं दृढां भक्तिं ॥ अस्या भक्तेरंतरंगं साधनमाह ॥ इत्थं मत्स्मृतिः साधुसेवया भवति ॥ यद्वा सतः
पूर्तेनेति ... मत्स्मृतिर्भक्तिमतः पुंसः साधुसेवया महत्तज्ज्ञानं भवतीत्यर्थः ॥४७॥ ज्ञानभक्तिमार्गौ उक्तौ तत्र ज्ञा
नमार्गादपि भक्तिमार्गः श्रेष्ठ इत्याह ॥ प्रायेणेति सत्संगेन यो भक्तियोगः तेन विनोपायः ॥ संसारतरणे

धिष्ण्येष्वेष्विति मद्रूपं शंखचक्रगदांबुजैः ॥ युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ॥४६॥ इष्टा
पूर्तेन मामेवं यो यजेत समाहितः ॥ लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ॥४७॥ प्रायेण भक्ति
योगेन सत्संगेन विनोद्धव ॥ नोपायो विद्यते सध्र्यङ् प्रायणं हि सतामहं ॥४८॥ अथैतत्परमं गु
ह्यं शृण्वतो यदुनंदन ॥ सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ॥४९॥ इति श्री एकादशे
एकादशः ॥ ॥

न विद्यते सत्संगे नैवात्र हेतुमाह ॥ हि यस्मात् सम्यक् सतामहं प्रायणं प्रकृष्टमयनमाश्रयः ॥ अतः सत्से
[illegible]नवगाह इत्यर्थः ॥४८॥ इदानीं सांख्ययोगादीनि साधनांतरसव्यपेक्षाणि सव्यभिचाराणि च सः
त्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचारी चेति वर्णयितुमाह ॥ एतद्वक्ष्यामीति परमं गुह्यं अतः सुगो ॥ ॥
प्यमित्यर्थः ॥४९॥ इत्येकादशे एकादशः ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्वादशे साधुसंगस्य महिमा वर्णितः पुरा ॥ कर्मानुष्ठानतत्त्यागव्यवस्था च ततः परं ॥ न रोधयति न वशीकरोति योगः ॥ आसनप्राणायामादिः सांख्यं तत्त्वानां विवेकः ॥ धर्मः सामान्यतोऽहिंसादिः ॥ स्वाध्यायो वेदजपः ॥ तपः कृच्छ्रादि त्यागः संन्यासः ॥ इष्टापूर्तं इष्टं च पूर्तं च तत्रेष्टमग्निहोत्रादि पूर्तं कूपारामादि निर्माणं दक्षिणाशब्देन सामान्यतो दानं लक्ष्यते ॥ १ ॥ व्रतानि एकादश्युपवासादीनि यज्ञः देवपूजा छन्दांसि रहस्यमंत्राः ॥ अवरुंधे वशीकरोति ॥ २ ॥ यातुधाना राक्षसाः ॥ ३ ॥ ४ ॥ त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः

श्रीभगवानुवाच ॥ न रोधयति मां योगो न सांख्यं धर्म उद्धव ॥ न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ॥ १ ॥ व्रतानि यज्ञश्छंदांसि तीर्थानि नियमा यमाः ॥ यथावरुंधे सत्संगः सर्वसंगापहो हि मां ॥ २ ॥ सत्संगेन हि दैतेया यातुधाना मृगाः खगाः ॥ गंधर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः ॥ ३ ॥ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः ॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगे युगे ॥ ४ ॥ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः ॥ ५ ॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः ॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ॥ ६ ॥ ते नाधीतश्रुतिगणा नोपासितमहत्तमाः ॥ अव्रतातप्ततपसो मत्संगान्मामुपागताः ॥ ७ ॥

५ ॥ ऋक्षो जांबवान् ॥ गृध्रो जटायुः वणिक्पथः ॥ तुलाधारः व्याधः धर्मव्याधः यज्ञपत्न्यः दीक्षितभार्याः ॥ ६ ॥ तेषां सत्संगव्यतिरिक्तसाधनांतराभावमाह ॥ ते इति न अधीताः श्रुतिगणा यैः तदर्थं च न उपासिता महत्तमाः ॥ ते तथा किंच अव्रता ॥ अतप्ततपसः ॥ न व्रतानि येषां न तप्तानि तपांसि यैः ॥ ते च ते च तथा सत्संगात् इति सिद्धिः सत्संगो नाम येषां संगः स्याभिप्रेत्याह यद्वा स्वसंगस्यापि सत्संगत्वं विवक्ष्यते स्वस्यापि सत्त्वात् यद्वा मदीय

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदहन्नादीनां भवंतु नाम कथंचित्साधनं तत्र गोपीप्रभृतीनां तु नान्यदस्तीत्याह॥ केवलेनेति सत्संग
लब्धेन केवलेनैव भावेन प्रीत्या नगाः॥ यमलार्जुनादयः नागाः कालियादयः॥ यद्वा तदानीं तत्रत्यवृक्ष
गुल्मादीनामपि भगवति भावोऽस्तीति गम्यते॥ तदुक्तं भागवतेऽव॥ अहो अमी देववरामरार्चितं पादांबुजं
ते सुमनःफलार्हणं॥ नमंत्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतमित्यादि॥ सिद्धाः कृ
तार्थाः संतः अंजसा प्रापुः॥८॥ तत्प्राप्तेर्दुर्लभतामाह॥ यमिति योगादिभिः कृतप्रयत्नोऽपि यं न प्राप्नुयात्॥ न
मामीयुरिति पूर्वेणान्वयः॥ अत्र च प्रथमं या गोप्यः पश्चाद्या वा श्रीकृष्णेन सह संगताः ते संतः॥ सत्सं

केवलेन हि भावेन गोप्यो गावो नगा मृगाः॥ येऽन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा॥८
यं न योगेन सांख्येन दानव्रततपोध्वरैः॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि॥९॥ रा
मेण सार्द्धं मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः॥ विगाढभावेन न मे वियोगतीव्राध
योऽन्यं ददृशुः सुखाय॥१०॥ तास्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण क्षणार्द्धव
त्ताः पुनरंग तासां हीना मया कल्पसमा बभूवुः॥११॥ ॥

गोऽन्येषां सत्संगात्तेन च तेषां भक्तिरिति ज्ञातव्यं॥९॥ गोपीनां भावं प्रपंचयति रामेणेति द्वाभ्यां॥ श्वाफल्कि
ना अक्रूरेण मयि प्रणीते सति मे मत्तोऽन्यं सुखाय न ददृशुः ऊत॥ वियोगेन तीव्रो दुःसह आधिर्यासां ताः
अत्र हेतुः मयि विगाढेनातिदृढेन भावेन प्रेम्णा अनुरक्तानि संसक्तानि चित्तानि यासां ताः॥१०॥ तीव्रा
धित्वं व्यनक्ति॥ तास्ता इति मया सह या एव क्षपा रात्रयः क्षणार्द्धवन्नीताः ता एव पुनः मया हीनाः॥ तासां
कल्पसमा बभूवुः॥ कथंभूताः ताः वाचामगोचरा इत्यर्थः॥११॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ ए॰ टी॰ ५२

किंचएवंनीत्वायथस्त्वामोहमिषेणसमाधिंप्राप्ताइत्याह॥ ताइतिमयिअनुषंगेनआसक्त्याबद्धाधियो
याभिस्ताः॥ स्वमात्मानंस्वदेहंअदःदूरस्थंइदंसन्निहितंतंचनाविंदन्॥ यद्वास्वंपतिपुत्रादिआत्मानं
महंकारास्पदंअदःपरलोकंइदंइमंलोकंचनाविंदन्निति॥ यथामुनयः॥ समाधौनामरूपेणविदुःतद्व
त॥ किंअब्धितोयेनद्यइवमयिप्रविष्टाइत्यन्वयः॥१२॥ एवंताअबलाः केवलंमत्कामाः॥ अस्वरूपविदः
स्वरूपंतनजानंतितथापिमत्संगात्परंब्रह्मजारबुद्धिविषयमपिब्रह्मस्वरूपमेवमांपरंमप्रापुरित्यर्थः

ताऽनाविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदस्तथेदं॥ यथासमाधौमुनयोऽब्धितोयेन
द्यःप्रविष्टाइवनामरूपे॥१२॥ मत्कामारमणंजारमस्वरूपविदोऽबलाः॥ ब्रह्ममांपरमंप्रापुःसं
गाच्छतसहस्रशः॥१३॥ तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां॥ प्रवृत्तिंचनिवृत्तिंचश्रोत
व्यंश्रुतमेवच॥१४॥ मामेकमेवशरणमात्मानंसर्वदेहिनां॥ याहिसर्वात्मभावेनमयास्याह्य
कुतोभयः॥१५॥ उद्धवउवाच॥ संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर॥ ननिवर्ततआत्मस्थोये
नभ्राम्यतिमेमनः॥१६॥॥

१३॥ यस्मादेवंभूतोमत्संगप्रभावः॥ तस्मात्त्वंचोदनांश्रुतिंप्रतिचोदनांस्मृतिंच॥ यद्वाविधिंचनिषेधंचउ
त्सृज्यपरित्यज्यमांशरणंयाहि॥ मयैवअकुतोभयःस्याः॥ अत्रचपूर्वंतावन्मयोदितेष्ववहितःस्वधर्मे
ष्वित्यादिनाकर्मकर्तव्यमित्युक्तं॥ इदानींतुसर्वंत्यक्त्वाशरणंयाहीत्युच्यतेतत्रकिमात्मनः कर्तव्यमि
तिवेत्यात्मस्थः॥ आत्मविषयःसंशयोननिवर्तते॥ यद्वाकर्मकार्यंत्याज्यंवेत्यात्मस्थः हृदिस्थःसंश
योननिवर्ततेतरतिएवछति॥ संशयइतियेनसंशयेन॥१६॥॥

ममतास्पदम् ५२

लिना २

राम॰ ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उक्तंसएवइत्यष्टभिः॥ अयंभावः॥ ईश्वरस्तावत्स्वमाययाप्रागात्मप्रपंचात्मनाभाति॥ तत्प्रपंचाध्यासाच्चजीवात्मना
मनाद्यविद्ययाकर्तृत्वादि ततोविधिप्रतिषेधाधिकारः॥ तदानींसत्वशुद्ध्यर्थंकर्माणिकुर्वितस्ततःसत्वेचशुद्धे
पुनःकर्मजाड्यपरिहारायभक्तिविदेव कर्मादरंपरित्यज्यदृढविश्वासेनभजेदित्युक्तं॥ ज्ञातायांतुविद्यायां
नकिंचित्कर्तव्यमस्तीति तत्रतावदीश्वरान्नादादींद्रियद्वाराजीवसंसृतिकारणभूतप्रपंचोद्गममाह॥ सार्द्धैः
स्त्रिभिः॥ सएषः अपरोक्षः जीवयतीतिजीवः परमेश्वरः॥ अपरोक्षत्वेहेतुः॥ विवरेषुआधारादिचक्रेषुप्रसूतिः॥
विवरप्रसूतिरभिव्यक्तिर्यस्यसः॥ तामेवाभिव्यक्तिमाह॥ घोषेणेति॥ घोषेणपराख्येननादवताप्राणेनसहगुहां

श्रीभगवानुवाच॥ सएषजीवोविवरप्रसूतिः प्राणेनघोषेणगुहां
प्रविष्टः॥ मनोमयंसूक्ष्ममुपेत्यरूपंमात्रास्वरोवर्णइतिस्थविष्ठः॥ १७॥

गुदे / हृत्सं / नाभौ / कंठदेशे / उरसि

आधारचक्रंप्रविष्टःसन्॥ मनोमयंसूक्ष्मरूपंपश्यंत्याख्यंमध्यमाख्यंचमणिपूरचक्रेविशुद्धिचक्रेचउपेत्यप्राप्य
वक्त्रेमात्राह्रस्वादिःस्वरउदात्तादिःवर्णःअकारादिरित्येवंवैखर्याख्यः॥ स्थविष्ठःअतिस्थूलोनानावेदशा
स्त्रात्मकोभवति॥ तथाचश्रुतिः॥ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः॥ गुहात्रीणि
निहितानेंगयंतितुरीयंवाचोमनुष्यावदंति अभियुक्तश्लोकश्च॥ यासामित्रावरुणसदनादुच्चरंतीत्रिषष्टिंव
र्णानंतःप्रकटकरणैःप्राणसंगात्प्रसूते॥ तांपश्यंतीप्रथममुदितांमध्यमांबुद्धिसंस्थां॥ वाचंवक्त्रेकरणविश

दांवैखरींचप्रपद्यइति॥ १८॥

श्री॰
भा॰ग॰
एटी॰
५८

अव्यक्तस्य सतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टान्तः यथेति । यथाग्निः खेऽव्यक्तोऽस्मद्रूपः दारु
ण्यधिकं मथ्यमानः अनिलसहायः सन् । अणुः सूक्ष्मविस्फुलिंगादिरूपो भवति । पुनः प्रकृष्टो जातो हवि
षा संवर्द्धते । तथैवेयं वाणी ममाभिव्यक्तिः ॥१८॥ उक्तां वाग्वृत्तिमुपसंहरन्नितरेन्द्रियवृत्तीरतिदिश
ति । एवं गदिः गदनं भाषणं मे व्यक्तिरित्युपसंहारः । कर्म हस्तयोः शिल्पं गतिः ॥ पादयोर्विसर्गः पायूपस्थ
योः । इति कर्मेन्द्रियाणां घ्राणं घ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणं इति ज्ञानेन्द्रि
याणां संकल्पो मनसः विज्ञानं बुद्धिचित्तयोः । अभिमानोऽहंकारस्य सूत्रं प्रधानस्य सत्त्वरजस्तमसां विका

यथानलः खेऽनिलबंधुरूष्मा बलेन दारुण्यधिमथ्यमानः ॥ अणुः प्रजातो हविषा समिध्यते
तथैवमे व्यक्तिरियं हि वाणी ॥१८॥ एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च
संकल्पविज्ञानमथाभिमानः सूत्रं रजः सत्त्वतमोविकारः ।१९ अयं हि जीवस्त्रिवृदब्जयोनिर
व्यक्त एको वयसा स आद्यः विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् ॥२०॥

रोऽपि दैवादिरिति विविधः प्रपंचः मे व्यक्तिरिति पूर्वेणान्वयः ॥१९॥ तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वरात्प्रपंचो
भिन्नोऽस्तीत्याह ॥ अयमिति अयं जीवः ॥ ईश्वरः आद्यः अव्यक्तः एक एव वयसा कालेन विश्लिष्टा विभक्ताः वागादीन्द्रि
यरूपाः शक्तयो यस्य यद्वा विशेषेण श्लिष्टा आलिंगिता माया शक्तिर्येन सः बहुप्रकार इवाभाति यतः स एवायं
त्रिवृत् त्रिगुणात्मा अयं । अब्जयोनिः लोकपद्मस्य कारणभूतः एकस्य बहुधाभाने दृष्टान्तः योनिं क्षेत्रं प्रतिपद्य प्राप्य
बीजानि यद्वदिति ।२०॥ तस्मात्तन्मायया विलसितं स्यात् तदाश्रयमिदं जगत् ॥ न ततः पृथगिति सदृष्टान्तमा
ह यस्मिन्निदमिति ॥२१॥ ॥ ।राम ॥

राम॰
५८

तंतुवितानेसंस्थासंस्थितिर्यस्यसः पटोयथातथायस्मिन्निदंविश्वमोतंदीर्घतंतुषुपटइवप्रोतंतिर्यक्तं
तुमिवएवंभूतंसमष्टिव्यष्ट्यात्मकंविश्वमविद्यात्मनाव्यक्तंवृत्तत्तद्रूपंजीवस्यकर्तृत्वादिसंसारहेतुः ॥ अनं
तरंविवेकज्ञानेनकर्मादिसर्वंत्याज्यमित्युक्तंतस्याशयेनाह यएषइतिसार्द्धैः त्रिभिः पुराणः अनादिः कर्मा
त्मकः । प्रवृत्तिस्वभावः पुष्पफलेभोगापवर्गौकर्मैतत्फलेवाप्रसूतेजनयति ॥२१॥ वृत्तद्रूपकंप्रपंचयति
द्वेपुण्यपापेअस्यबीजेसचशतमूलः शतमपरिमितावासनामूलानियस्य ॥ त्रयोगुणाः नालानिप्रकां

यस्मिन्निदंप्रोतमशेषमोतंपटोयथातंतुवितानसंस्थः ॥ यएषसंसारतरुःपुराणः कर्मात्म
कः पुष्पफलेप्रसूते ॥२१॥ द्वेअस्यबीजेशतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः ॥ दशै
कशाखोद्विसुपर्णनीडस्त्रिवल्कलोद्विफलोर्कंप्रविष्टः ॥ २२ ॥ ॥

डाः ॥ यस्यपंचभूतानिस्कंधाः ॥ यस्यपंचरसाःशब्दादयः विषयाः तेषांप्रसूतिर्यस्मादेकादशेंद्रियाणि
शाखायस्यद्वयोःसुपर्णयोर्जीवपरमात्मनोर्नीडंयस्मिन् ॥ त्रीणिवल्कलानित्वचोवातपित्तश्लेष्मा
णोयस्यद्वेफलेसुखदुःखेयस्यसः ॥ अर्कंप्रविष्टः ॥ सूर्यमंडलपर्यंतंव्याप्तस्तंनिर्भिद्यगतस्यसंसारा
भावात् ॥ २२ ॥ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
५९

तत्फलंभोक्तुंनार्हं ॥ गृध्यंतीतिगृध्राः ॥ कामिनः ग्रामेचरागृहस्थाः ॥ अरसत्वहेतस्यएकंफलंदुःखमदं
ति ॥ परिणामतः स्वर्गादेरपिदुःखस्वरूपत्वात् ॥ हंसाविवेकिनः अरण्यवासिनः संन्यासिनएकंफलं

अदंतिचैकंफलमस्यगृध्राग्रामेचराएकमरण्यवासाः
हंसायएकंबहुरूपमिज्यैर्मायामयंवेदसवेदवेदम् ॥ २३

सुखमदंति ॥ एकंपरमात्मानंमायामयंएवंबहुरूपमिज्यैः यज्ञैर्गुरुभिः कृत्वा योवेदसवेदंतत्त्वार्थं
वेद ॥ २३ ॥ ॥ रामायनमः ॥ ॥ ॥ ॥

राम
५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्रैवं कृतकृत्यः सन्सर्वसाधनं त्यजेत्याह ॥ एकांतभक्त्या शितेन कुठारेण तीक्ष्णेन ज्ञानेन तत्रतावाहृयो
जीवोपाधिं त्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्वा परमात्मानं च संपाद्य प्राप्याथास्त्रं साधनं त्यजेदिति स
मन्वयः ॥२४॥ इत्येकादशे द्वादशः ॥१२॥ त्रयोदशे तु सत्त्वस्य वृद्ध्या विद्योदयक्रमः ॥ हंसेतिहासतश्चि
त्तगुणविश्लेषवर्णनं ॥ विद्याकुठारेण जीवाशयं संवृश्च्य साधनं त्यजेदित्युक्तं ॥ तत्र तमआदिगुणत्रयप्रति
बंधे सति कथं विद्योत्पत्तिरित्याशंक्य ॥ तन्निवृत्त्या विद्योत्पत्तिप्रकारमाह सत्त्वमिति सप्तभिः ॥ तत्र यथानंदा

एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः ॥ विवृश्च्य जीवाशयमप्रमत्तः संपाद्य चा
त्मानमथ त्यजास्त्रं ॥२४॥ इत्येकादशे द्वादशोऽध्यायः ॥ श्रीभगवानुवाच ॥ सत्त्वं रजस्तम इ
ति गुणा बुद्धेर्न चात्मनः ॥ सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि ॥१॥ सत्त्वाद्धर्मो भवेद्वृद्धा
त्पुंसो मद्भक्तिलक्षणः ॥ सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्तते ॥२॥

दिवदात्मधर्मा गुणाः स्युः ॥ नहि तत्त्वरूपत्वात्तेषां गुणानां निवृत्तिः न स्यात् न त्वेतदस्तीत्याह बुद्धेः प्रकृते
रेव गुणाः न त्वात्मन इति ॥ अतः सत्त्वेन सत्त्ववृद्ध्या अन्यतमौ हन्यात् ॥ रजस्तमोवृद्धी जयेदित्यर्थः ॥ सत्त्वं च म
दृद्ध्यादि हन्ति रूपमुपशमात्मकत्वेन सत्त्वेनैव हन्यात् ॥१॥ ननु गुणत्रयस्य ज्ञानोपरस्परोपमर्दरूपत्वात्
कथं च सत्त्वस्यैव तत्र हन्तृत्वेन नियमेन हन्तव्यास्तत्राह ॥ मद्भक्तिलक्षणयतितो धर्मः स भक्तिरूपमेव वा
सत्त्वमेव कथं वर्धते तत्राह ॥ सात्त्विकानां पदार्थानामुपासया सेवया सत्त्ववृद्धं भवतीत्यर्थः ॥२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सत्त्वं यथोरजस्तमसी हन्यात् ॥ कुतः न विद्यते उत्तमो यस्मात् स सत्त्वोत्तमः ॥ यतः सत्त्वाद्वृद्धिः सत्त्ववृद्धिर्यस्मात् ॥
कारणं सत् ॥ यस्य सः ॥ अत एव तत्कार्यो यो धर्मः प्रतिबंधो नास्तीत्याह ॥ यस्मिन्नुभयस्मिन् हते ॥ तन्मूलौ रजस्त-
मसी रागद्वेषादिना प्रमादालस्यादिना च मूलं यस्य सः ॥ ३ ॥ सात्त्विकोपासनया सत्त्वं वर्धत इत्युक्तं ॥ तानेव सत्त्व-
वृद्धिहेतून् दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह ॥ आगम इति आगमः शास्त्रमपः आपः क्वचिदाग-
मोर्थ इति पाठः ॥ आगमो धीतो वेदः ॥ अर्थो न्यायोपार्जितं वित्तं प्रजाः सत्पुत्राः ॥ देशः कृष्णमृगसंचारिभूमिः

धर्मो रजस्तमो हन्यात्सत्त्ववृद्धिरनुत्तमः ॥ आशु नश्यति तन्मूलो ह्यधर्म उभये हते ॥ ३ ॥ आगमो
ऽपः प्रजा देशः कालः कर्म च जन्म च ॥ ध्यानं मंत्रोऽथ संस्कारो दशैते गुणहेतवः ॥ ४ ॥ तत्तत्सात्त्विक-
मेवैषां यद्यद्वृद्धाः प्रचक्षते ॥ निंदंति तामसं तत्तद्राजसं तदुपेक्षितम् ॥ ५ ॥ ॥

कालो वसंतादिः ॥ कर्म आश्रमादिविहितं जन्म उभयकुलविशुद्धं ध्यानं देवताविषयं ॥ मंत्रो गायत्र्यादिः संस्कारो
गर्भाधानादि ॥ गुणहेतवः सत्त्वोत्पत्तिहेतवः ॥ ४ ॥ एतेषामपि त्रैविध्यं वृद्धानुष्ठानपरंपरया ज्ञातव्यमित्याह ॥ तस्मा-
दिति ॥ एषु सात्त्विकादिनिर्णयमाह ॥ एषामेव मध्ये प्रचक्षते प्रशंसंति यद्यन्निंदंति तत्तत् ॥ यत्तूभयैरुपेक्षि-
तं न स्तुतं न च निंदितं तद्राजसं ॥ ५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वं च णवादिकं न काम्य द्वंद्वान् संस्कारमात्मनः शोधकं नन्तुके वले देहस्य हादीना ॥४॥

सात्त्विकान्येवेति निवृत्तशास्त्राण्येव सेवेत न प्रवृत्तिपाषंडशास्त्राणि तीर्थं पापप्रवर्गे थोदकस्तुरायाः प्रजाजनाः निवृत्तान् जनान् न प्रवृत्तिरूपाचारान् विविक्तदेशं न रथ्याच्युतदेशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न प्रदोषनिशीथादीन् कर्म च नित्यं न काम्याभिचारादीनि जन्म च वैष्णवशैवदीक्षालक्षणं न शाक्तदक्षदीक्षा रूपं ध्यानं श्रीविष्णोर्गुरोर्वा न कामिनां विद्धि धीमन् ननु तत्त्वज्ञानं महावाक्यश्रवणादेवोत्पद्यते किं तत्र सत्त्ववृद्ध्याधर्मेण वा ‍ तत्राह यावत्स्मृतिः ॥ आत्मापरोक्ष्यं यावद्बुद्धेर्वद्वयकारणभूतगुणपोहः तावत्पर्यन्तं ज्ञानं भवतीत्यर्थः ॥ ५ ॥ ननु गुणव्यतिकराज्जातो देहः कथं स्वाश्रयभूतान् गुणान् स्वत एवोत्पन्नया वि

सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये ॥ ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनम् ॥ ६ ॥ वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनम् ॥ एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ॥ ॥ ७ ॥

यथापोहस्वयमभ्युपरमेत ॥ तत्राह ॥ वेणूनां संघर्षणाज्जातोऽग्निर्वह्निर्यतः स्वत एवोत्पन्नाभिः ज्वालाभिः तद्वनं स्वयमेव दग्ध्वा स्वयमेव शाम्यति ॥ एवं देहोपि भूतक्रियः गुणक्रियारहितः तत्क्रियः इति पाठे तस्याशेषविवाक्रियाव्यापारः यत उत्पन्नस्तदेव एवं निर्दहन्नेवंभूतो व्यापारो यस्य सः ॥ ७ ॥ ननु नियतेंद्रियतया सात्त्विकयात्तत्सेवयायामियानस्ति पुरुषार्थः यतः सात्त्विकस्य अल्पसेवयैव मनः संतोषो जायते ॥ तथा च राज्ञां दीनश्वाह्वादीन्विषयान्परेऽधः खं जानंतोऽपि तान् ॥ कथं सेवंत इति पुनर्भगवंतमीश्वरं विदंति मर्त्या इति प्रश्नं पृच्छति विदंतीति ॥ ॥ ८ ॥ राम ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री। भाग। ए.टी। ६१

यथा भर्त्स्यमानोपि खरो यथा पदा ताड्यमानोपि खरीमनुधावति श्वा च यथा निर्लज्जो हंतुमानीतोपि तद्भूमि
ष्ठाभिनिवेशेन भुंजत इति सहेतुकमाह इदमेव एवं भोग्यमिति सविकल्पः स्यात् ततश्चाहो रूपमदो
भाव इति गुणध्यानाद्दुःसहः कामः स्यात् ॥ १० ॥ ततो विषयान्भोक्तुं कर्माणि करोति ॥ ११ ॥ मिथ्याभिनिवेशेन भुंजत इ
ति सहेतुकमाह ॥ अहमिति त्रिभिः ॥ प्रमत्तस्याविवेकस्य जनस्य देहादावहमिति बुद्धिर्मिथ्यैव हृदि यथावदुपस
र्पति ॥ ततो हृदस्थं वैकारिकं सत्वं प्रधानमपि मनः प्रति घोरं दुःखात्मकं रज उत्सर्पति मनो व्याप्नोतीत्यर्थः ॥ ९ ॥

विदंति मर्त्याः प्रायेण विषयान्पदमापदां ॥ तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ॥ ८ ॥ श्रीभग
वानुवाच ॥ अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि ॥ उत्सर्पति रजो घोरं ततो वैकारिकं मनः ॥ ९
रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ॥ ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः ॥ १० ॥ क
रोति कामवशगः कर्माण्यविजितेंद्रियः ॥ दुःखोदर्कानि संपश्यन् रजोवेगेन मोहितः ॥ ११ ॥ रजस्त
मोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः ॥ अतंद्रितो मनो युंजन्दोषदृष्टिर्न सज्जते ॥ १२ ॥ अप्रमत्तो नियुं
स्मो जीत मनो मय्यर्पयन्शनैः ॥ अनिर्विण्णो यथाकालं जितश्वासो जितासनः ॥ १३ ॥ एतावान्योग आ
दिष्टो मच्छिष्यैः सनकादिभिः ॥ सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा ॥ १४ ॥

विवेकस्यापि दुःखनिवृत्तिः स्यादित्याशंक्याह ॥ यदपि यद्यपि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वा
न् विवेकी पुनर्मनो निरुंधन्न सज्जते ॥ १२ ॥ विषयदोषदृष्ट्यापि मनोनिरोधासमर्थो ... तन्निरोधोपा
यमाह अनिर्विण्णः अनलसः यथाकालं त्रिषवणं मयि परमानंदरूपे अर्पयन् दध्यात् ॥ १३ ॥ विषयैः संघ
र्षितस्य मनसः तद्वियोगे नेश्वरनिष्ठत्वमसंभावितं मन्यमानं प्रति तन्निरूपणायेतिहासमनुप्रतिपादयिष्यन् ता
वानिति यथावन्मय्यावेश्यते इत्येतावानित्यर्थः मच्छिष्यैरित्युक्तः तेषामतिज्ञायसमीनेन रूपे निरूपणा

राम। ६१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यदेति ॥ तं कालं तदेतद्रूपं च वेदितुमिच्छामि तत्कथयेति ॥ १५ ॥ मानसाः पुत्राः सूक्ष्मं दुर्ज्ञेयां एकांतिकीं ग
तिं परां काष्ठां ॥ १६ ॥ तदेवाह गुणेष्विति विषयेषु स्वभावतो रागादिवशाच्चेतः ॥ प्रविशति ते चानुभूता विषया

उद्धव उवाच ॥ यदा त्वं सनकादिभ्यो येन रूपेण केशव ॥ योगमादिष्टवानेतद्रूपमिच्छामि वे
दितुम् ॥ १५ ॥ श्रीभगवानुवाच ॥ पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः ॥ पप्रच्छुः पित
रं सूक्ष्मां योगस्यैकांतिकीं गतिम् ॥ १६ ॥ सनका ऊचुः ॥ गुणेष्वाविशते चेतो गुणाश्चेतसि च प्र
भो कथमन्योन्यसंत्यागो मुमुक्षोरतितीर्षतः ॥ १७ ॥ रामायनमः ॥

२५

वासनारूपेण चेतसि प्रविशंति अतितीर्षोर्विषयानतिक्रमितुमिच्छोः ॥ १७ ॥ रामायनमः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ ए॰ टी॰ ८२

एवमपिमहानदेवोपिस्वयंभूरपिभूतानांस्रष्टापिध्यायमानोप्रश्नबीजंविचारयन्नपिप्रश्नस्यबीजंयदु
त्तानारयंप्रश्नः तन्नाविदत ॥ यतः कर्मविद्धिप्रधीः ॥ १८ ॥ प्रश्नस्यपारमन्तरं अभिप्रायोवातस्यतितीर्
षयाजिज्ञासयाहंहंसरूपेणेतियथाहंसोनीरक्षीरंविवेचयतिपृथक्कर्तुंशक्तः ॥ एवमहंगुणेभ्य

श्रीभगवानुवाच ॥ एवंपृष्टोमहानदेवः स्वयंभूर्भूतभावनः ॥ ध्यायमानः प्रश्नबीजंनाभ्य
पद्यतकर्मधीः ॥ १८ ॥ समामचिंतयद्देवः प्रश्नपारतितीर्षया ॥ तस्याहंहंसरूपेणसका
शमगमंतदा ॥ १९ ॥ दृष्ट्वामांतउपव्रज्यकृत्वापादाभिवंदनम् ॥ ब्रह्माणमग्रतः कृत्वापप्र
च्छुःकोभवानिति ॥ २० ॥ इत्यहंमुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा ॥ यदवोचमहंतेभ्य
स्तदुद्धवनिबोधमे ॥ २१ ॥ ॥

त्वजिज्ञासुभि रि
तियोनपितंहंसरूपेणगतोस्मीति ॥ १९ ॥ इत्यहंमुनिभिः पृष्टस्तिपृथक्वाक्यं ॥ यदवोचमिति
पृथक्त्वतोस्मच्छब्दाहृत्तिरदोषः तेभ्योयदवोचंतन्मेवचनंनिबोध ॥ ॥ २१ ॥ ॥ राम ॥ राम॰ ८२

देहादिविविक्तात्मत्वानेसतितत्रिष्टस्यरागाद्यसंभवात्स्वयमेवविषयचेतसोविश्लेषोभवतीतिवक्तुं
प्रश्नंवदन्नमिषेणैवतावदात्मानात्मविवेकमाह।वस्तुनइतित्रिभिःश्लोकैः किमात्मनोयंप्रश्नःत
दुपाधेर्भूतसंघस्यवायद्यात्मनस्तर्हितस्यवस्तुनःपरमार्थरूपस्यअनानात्वेसतिहेविप्राःवःयुष्मा
भिःकृतःप्रश्नईदृशःवक्तृषुनिर्धारणाद्रूपःकथंघटेतवक्तुरन्तरयापातवामेममकआश्रयः॥अवि
प्रापे आत्मनिकेजातिगुणादिविशेषमाश्रित्योत्तरंवक्ष्यामीत्यर्थः॥२२॥भूतसंघविषयत्वेपिअ

वस्तुनोयद्यनानात्वेआत्मनःप्रश्नईदृशः॥ कथंघटेतवोविप्रावक्तुर्वामेकआश्रयः॥
२२॥ पंचात्मकेषुभूतेषुसमानेषुचवस्तुतः॥ कोभवानितिवःप्रश्नोवाचारंभोह्यनर्थ
कः॥ २३॥ मनसावचसादृष्ट्यागृह्यतेन्यैरपीन्द्रियैः अहमेवनमत्तोन्यदितिबुध्यध्व
मंजसा॥ २४॥ ॥ रामायनमः॥ ॥

यंवःप्रश्नःवाचारंभः वाङ्मात्रेणारब्धः यतोअनर्थकः अतःभूतेषुदेवमनुष्यादिदेहेषुपंच
भूतात्मकेषुअतःसमानेषुअभिन्नेषुपुनश्चवस्तुतःपरमकारणात्मनाअभिन्नेषुवाचारंभणंविका
रोनामधेयंमृत्तिकेत्येवसत्यमितिश्रुतेः॥२३॥तत्रपंचात्मकत्वंप्रत्यक्षादिसिद्धमेवेतिपरमका
रणाभेदमेवोपपादयतिमनसेतिमनआदिभिर्यद्गृह्यतेतदहमेवेत्यर्थः॥अंजसातत्वविचारे
णेत्यर्थः॥एतेनैवसर्वात्मकोहमित्यंजसाप्युत्तरमुक्तंभवति॥ ॥ ॥२४॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं प्रश्नाविंशतिमिषेणैवात्मस्वरूपं सामान्यतो निरूप्य ब्रह्मणोपि दुः परिहारं यत्पृष्टं तत्रोत्तरमाह गुणे ष्वित्यादिना यावदध्यायसमाप्तिः अयमभिप्रायः यदि कर्तृभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं बुद्ध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेत् ॥ तत्तस्तद्वियोगे न घटेत तस्य तु स्वरूपमहं ब्रह्मैव विन्नाध्यासेन तत्तद्भावतया विषयैः संग्रथितं अतस्तस्य ब्रह्मत्वभावनया विषयाणां च मिथ्यात्वानुसंधानेन सर्वतो निर्विण्णः श्रीभगवन्तं भजतो भवत्येव परिपूर्णस्वरूपावस्थानमिति हे प्रजाः पुत्रकाः स्यं गुणेषु चेतश्चाविशति गुणाश्च चेतसि एवं गुणाश्चेतश्चोभयं ग्रथितं मदात्मनो ब्रह्म स्वरूपस्य जीवस्य

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः ॥ जीवस्य देह उभयं गुणाश्चेतो मदात्मनः २५
गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ॥ गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् २६
जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः
२७

स्य देहः अध्यास उपाधिर्न तु स्वरूपं ॥२५॥ तस्मादभीक्ष्णं पौनः पुण्येन पुनः पुनर्गुणसेवया तत्संस्कारेण गुणेष्वाविशच्चित्तं तेच पुनर्वासनारूपेण चित्ते प्रकर्षेण भवन्तीति तथा तेगुणाश्चित्तं चैवमुभयं मद्रूपः सन् त्यजेत् ॥ ननु जाग्रदाद्यवस्थावतः कथं कूटस्थब्रह्मरूपता तत्राह जाग्रत् जागरः स्वप्नः स्वप्नः सुषुप्तं निवृत्तिरेता वृत्तयः ताश्च न स्वाभाविक्यः ॥ किं तु सत्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततमिति वक्ष्यमाणक्रमेण गुणतः एव जीवस्तु विलक्षणस्तदवस्थारहित एव निश्चितः कुतः तासां साक्षित्वेन ॥ ॥ २७ ॥ रामाय नमः ॥ ॥

चे

राम॰ ८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननु तर्हि कथमहं जागर्मीत्यादि प्रतीतिस्तत्राह ॥ यर्हीति यस्मात् सम्यक् सृतिः सरणमनयेति संसृतिर्बु
द्धिः तया बंधोयमात्मनो गुणवृत्तीर्ददाति । तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात् । तद
दा गुणचेतसां गुणानां चेतसश्चान्योन्यं त्यागो भवति ॥२८॥ कथं संसृत्या बंधः कथं च तं जह्यात् । तत्
राह ॥ अहंकारेण कृतं बंधमात्मनः अर्थविपर्ययं आनंदावरणेनानर्थहेतुं विद्वान् जानन् निर्विद्य च
विमेतदिति तत्त्वात्तुर्ये स्थितो भूत्वा संसारचिंतां संसारो बुद्धिस्तस्मिंश्चिंता अभिमानं तत्कृतां भोग

यर्हि संसृतिबंधोयमात्मनो गुणवृत्तिदः ॥ मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां
२८ ॥ अहंकारकृतं बंधमात्मनोर्थविपर्ययम् ॥ विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितः
त्यजेत् ॥२९॥ यावन्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः ॥ जागर्त्यपि स्वपन्नज्ञः स्वप्ने जा
गरणं यथा ॥३०॥ असत्वादात्मनोन्येषां भावानां तत्कृता भिदा । गतयो हेतवश्चास्य मृ
षा स्वप्नदृशो यथा ॥३१॥ ॥ रामायनमः ॥ ॥

चिंतां च त्यजेत् ॥२९॥ यावदेवं न त्यजेत् तावत् स्वकर्मत्यागादि सर्वं व्यर्थमित्याह ॥ यावदिति ॥ यद्य
पि जागर्ति कर्मादिषु तथापि स्वपन्निवाज्ञान्यप्रपन्नेव भवति यतः तत्र सम्यक् दर्शी अतस्तज्जागरणस्य
स्वप्नवद्दृष्टांतः स्वप्न इति ॥३०॥ ननु कथं वेदप्रदितवर्णाश्रमकर्मादिनानार्थधीर्निवर्तेत तत्राह ।
असत्वादिति ॥ भावानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादि फलानि हेत
वः कर्माणि वास्यात्मनो मृषा अविद्यावद्विषयो वेद इति भावः ॥ ॥३१॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा॰
ए॰टी॰
८४

युक्तिभिरित्युक्तं तामेव युक्तिमाह ॥ य इति ॥ अर्थाननुक्षणलयान्देहादीन्समस्तकरणैः चक्षुरादिभिः ॥
भुंक्ते कथंभूतान् ॥ अनुक्षणधर्मिणः क्षणिकत्वं तारुण्यादिधर्मवतः ॥ यश्च स्वप्ने हृदि जागरदृ
ष्टिसदृक्षान्वासनामयान्भुंक्ते यश्च सुषुप्ते तानुपसंहरति स एकः कुतः त्रिगुणवृत्तिरेकस्यावस्था
यत्र दृष्टानन्तजाग्रदवस्थासु सर्वेंद्रियाणि पश्यंति स्वप्ने मनः सुषुप्तिं तत्संस्कारविशेषा बुद्धिः क
थमात्मा तद्द्रष्टा तत्राह इंद्रियेशः न त्विंद्रियेष्वपि विविक्तेजस प्राज्ञाभिन्नाः कुतः स्मृत्या प्रतिसं
धानेन सर्वावस्थास्वन्वयात् ॥ यः स्वप्नमद्राक्षं यश्च तदनंतरं न किंचिदवेदिषं स एव एतर्हि जा स्व५

यो जागरे बहिरनुक्षणधर्मिणोर्थान्भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् ॥ स्वप्ने सु
षुप्त उपसंहरते स एकः ॥ स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिंद्रियेशः ॥ २७ ॥ एवं विमृश्य गु
णतो मनसस्त्र्यवस्था मन्मायया मयि कृता इति निश्चितार्थाः ॥ संछिद्य हार्दमनुमा
नसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिम् ॥ ॥ २८ ॥ ॥

गुणमीति उपाधिभेदेन विश्वादिव्यवहार इति भावः एतेन बालयुवाद्यवस्थास्वपि प्रतिसंधानेनात्मै
क्यं द्रष्टव्यम् ॥ २७ ॥ ततः किमत आह ॥ एवमिति गुणतो या एता मनसस्त्र्यवस्थास्ता मद्विषया मयि
कृताः न तत्त्वतः संतीति निश्चित आत्मरूपोर्थो यैस्ते यूयमखिलसंशयानामाधिमाधीयतेस्मिन्निति
त्याधिरहंकारः तं संछिद्य हार्दं हृदि स्थितं मां भजत केन छित्वा तदाह अनुमानैः सद्युक्तिभिः स
तामुपदेशैः श्रुतिभिश्च तीक्ष्णेन ज्ञानखड्गेन ॥ ॥ २८ ॥ ॥

रामः
८४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अनुमानानि दर्शयति ॥ ईहेतेति इदं जगद्विभ्रममीहेत तत्र हेतवः ॥ मनोविजृंभितत्वात् दृष्टत्वात् विनाशित्वा
त्स्वप्नवत् भ्रांतिचंचलत्वाच्च अलातचक्रवत् ॥ ननु भ्रमोपि निर्विषयः कथं स्यात्तत्राह ॥ विज्ञानमिति निरामन
तस्मात् त्रिधा यो यं त्रिगुणप्रविगुणमहत्कृतो विकल्पो भेदः समायेति ॥ २४ ॥ तस्मात्तेतो दृश्याद्दृष्टिं प्रतिनिवर्त्य निः
तृष्णत्वानुभवो भवेत् ॥ तन्नैष्कल्याच्च निःस्पृहत्वात्तल्लीनो निरीहश्च भवेत् ॥ मनोवाक्कायव्यापाररहित इत्यर्थः
ननु देहवतः सर्वथा देहेन दृष्टिप्रतिनिवर्तनायोगात्मनः संसारः स्यादेवं तत्राह संदृश्यत इति क्वचिदावश्यकाहा

ईहेत विभ्रममिदं जगतो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं ॥ विज्ञानमेकमुरुधेव विभा
ति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥ २४ ॥ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भ
वेन्निजसुखानुभवो निरीहः ॥ संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपा
तात् ॥ २५ ॥ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं ॥ दैवादुपेतमथ
दैववशादपेतं वासो यथा परिकृतं मदिरामदांधः ॥ २६ ॥

तर्हि पुनः यद्यपीदं संदृश्यते तथापि पूर्वमवस्तुबुद्ध्या त्यक्तं तत्पुनर्मोहाय न भवेदेव किं तु देहपातपर्यंतं स्मृ
तिरिव स्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ॥ २५ ॥ एतदेवोपपादयति देहमिति ॥ आसनादुत्थितं उ
त्थाय तत्रैव वा स्थितं ततः क्वचिद्दैवात् उपेतं निर्गतं पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते कुतो न्यत् यतो न देहेन स्व
रूपमध्यगमत् ॥ ज्ञातवान् ॥ तं देहं यतः कारणादिति वा परिकृतं परिहितं वासो गतं स्थितं वा यथा न वेत्ति
तद्वत् ॥ २६ ॥ ॥ राम ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ ए॰टी॰ ८५

नन्वव्ययः परिपात्य वा नोपि पुरस्ताद्पैति मत्तेभिन्नं दृष्टिमेकं न पश्यति । तर्हि पतनदेवन्नेमाह । देहोप्यौतिदैववशेन गच्छन्नुत्वारंभकं कर्मयावदस्ति तावत्पर्यंतं प्रतिसमीक्षत एव [illegible] सासुः प्राणेंद्रियसहितः नन्वतर्हि तस्मिन्कदाचन ज्ञेनापिनेत्याह तमिति । स्वाप्नस्वप्नवत्प्रथिरूढः प्राप्तः समाधिपर्यंतो योगो येन अतएव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन सः ॥ तथा च श्रुतिः ॥ तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति उक्तार्थं तेषां विश्वासार्थं स्वस्वरूपमाह मयेति सांख्यमात्मानात्मविवेकः । योगोष्टांगः तयोर्गुह्यं

॥ मू॰ ॥

देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः ॥ तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ॥ ३७ ॥ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया ॥ ३८ ॥ अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः ॥ परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ॥ ३९ ॥ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं ॥ सुहृदं प्रियमात्मानं साम्यासंगादयोगुणाः ॥ ४० ॥ इति मे छिन्नसंदेहा मुनयः सनकादयः ॥ सभाजयि
न॰ २ त्वा परया भक्त्यागृणत संस्तवैः ॥ ४१ ॥ तैरहं पूजितः सम्यक्संस्तुतः परमर्षिभिः ॥ प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ॥ ४२ ॥ इत्येकादशे त्रयोदशः ॥ १३ ॥

रहस्यं यत्तेविस्मृतं युष्मद्धर्मं विवक्षयेत्यनेनतथमंत्रपृष्टपदिष्टवान्दर्शितेक्तता इति ज्ञेयं अतएव यज्ञेन हंसस्वरूपेण ब्राह्मणेभ्य आगत्य माधवेत्यनुवादो भविष्यति ॥ ३८ ॥ अतं प्रतीयमानो यमः सत्यमनुष्ठीयमानो धर्मः तेजः प्रभावः एतेषां परमाश्रयं ॥ ३९ ॥ किंच मामिति कथंभूता अगुणाः गुणपरिणामरूपा न भवंति किंतु
तिन्या २
स्वरूपाः ॥ ४० ॥ सेमयाअदएष्वमोतहुतुः ॥ ४१ ॥ प्रतीयायप्रत्यागतोस्मि ॥ ४२ ॥ इत्येकादशे त्रयोदशः ॥ १३ ॥
राम॰ ८५

उत्पत्तिस्थानमित्यर्थः ॥ २५

वचतुर्दशे परं श्रेयो भक्तिरेव नचेतरत ॥ इत्येतद्वर्ण्यते ध्यानयोगश्च सहसाधनैः ॥ एवं तावद्भगवता भक्त्यासोत्
रसुक्तः अन्ये त्वन्ये साधनानि वदंति ॥ तत्र विशेषनिर्धारणाय पृच्छति वदंतीति श्रेयांसि श्रेयःसाधनानि किं वि
कल्पेन प्राधान्यं उताहो किंवा एकस्यैव मुख्यता शापत्तोत्स्या नेकारणं भवतेति न अपेक्षितः न सपेक्षता यस्मिन्स
अहैतुकः ॥ अयमर्थः ॥ भवता यो भक्तियोग उक्तः ॥ अन्ये च यानि श्रेयःसाधनानि वदंति किं तेषां सा तत्फलसाध
नत्वेन प्राधान्यमेव सर्वेषां उत अंगांगित्वं प्राधान्येन अपि किं विकल्पेन सर्वेषां तुल्यफलत्वं यद्वा कश्चिद्विशे

उद्धव उवाच ॥ वदंति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः ॥ तेषां विकल्पप्राधान्यमुताहो एकमुख्य
ता ॥ ॥ भवतोदाहृतः स्वामिन्भक्तियोगोनपेक्षितः ॥ निरस्य सर्वतः संगं येन त्वय्याविशेन्मनः ॥२॥
श्रीभगवानुवाच ॥ कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता ॥ मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदा
त्मकः ॥३॥ तेन प्रोक्ता स्वपुत्राय मनवे पूर्वजाय सा ॥ ततो भृग्वादयोगृह्णन्सप्त ब्रह्ममहर्षयः ॥४॥
तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः ॥ मनुष्याः सिद्धगंधर्वाः सविद्याधरचारणाः ॥५॥

[12]

षः इति ॥ तत्र भक्तिरेव महाफलत्वेन ॥ मुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुरुषस्थानीयस्वर्गादिफलबुद्धि
भिः ॥ प्राणिभिः प्राधान्येन परिकल्पितानि तुच्छफलानि विवेकं प्रकृत्यनुसारेण बहुधा वेदार्थप्रतिपत्ति
माह ॥ कालेनेति सप्तभिः ॥ मदात्मकः मत्सेवात्मादिज्ञेयेन सः ॥३॥ भृग्वादयः भृगुश्च मरीचिरत्रिरंगिरसौ पुल
स्त्यः पुलहः क्रतुरित्येते वै सप्त ब्रह्मर्षयः प्रजापतयश्च ते च ते च महर्षयश्च ॥४॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भाग॰
एकी॰
६६ स्या

किंदेवाः कश्मस्वेददौर्गंध्यादिराहित्येन किं देवा मनुष्या वेति संशयकृतयः ॥ देहास्पदभूता ॥ द्वीपांतरमनुष्याः
एवं किन्नराः किंचिन्नरा इव मुखतः शरीरतो वा किंपुरुषाः किंचित्पुरुषा इव वनरादयः ॥ प्रकृतयः वासनाः बहु
ऊतः रजःसत्त्वतमांसि ॥ भुवः जन्मस्थानानि यासां ताः ॥ भूतानि सुरदेवामनुष्यादीनि चित्रा वाचः वेदा व्या
नविषयाः ॥ एवमित्युक्तोपसंहारः केषांचिदध्ययनादि ॥ आम्नायानामप्युपदेशपारंपर्येण अपरेषां इमत
यः वेदविरुद्धार्थमतयः तत्र कृतीनां मायागुणमूलत्वं मायामोहितधियः ॥ अनेकांतं नानाविधं ॥ ५ ॥ तदे

किंदेवाः किन्नरा नागा रक्षःकिंपुरुषादयः ॥ बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः ॥ ६ ॥ याभि
र्भूतानि भिद्यंते भूतानां मतयस्तथा ॥ यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि ॥ ७ ॥ एवं प्रकृति
वैचित्र्याद्भिद्यंते मतयो नृणां ॥ पारंपर्येण केषांचित्पाषंडमतयोऽपरे ॥ ८ ॥ मन्मायामोहितधियः
पुरुषाः पुरुषर्षभ ॥ श्रेयो वदंत्यनेकांतं यथाकर्म यथारुचि ॥ ९ ॥ धर्ममेके यशश्चान्ये कामं सत्यं
दमं शमं ॥ अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं ॥ केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान् ॥ १० ॥

वाह ॥ धर्ममिति सार्धेन ॥ धर्मं केचन मीमांसकाः ॥ तदुक्तं ॥ मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ॥ नित्यनैमि
त्तिके कुर्यात्प्रत्यवायजिहासयेत्यादि यशः काव्यालंकारकृतः ॥ यथाह ॥ यावत्कीर्तिर्मनुष्यस्य पुण्या लोके
ऽनुगीयते ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते इति कामं वात्स्यायनादयः ॥ सत्यं शमं दमं च योगशास्त्र
कृतः ॥ अन्ये हि शास्त्रवादिनो दंडनीतिकृतो वै प्रसिद्धं ऐश्वर्यमेव स्वार्थं पुरुषा वदंति ॥ अतः सामाद्युपाय
एवैश्वर्यसाधनमिति तेषां मतं त्यागं भोजनं च लोकायतिकाः बौद्धाः यज्ञं तपो दानं यज्ञो देवतानाम्

राम
६६

तेषां तुच्छफलत्वमाह॥ आद्यंतवंत इति॥ ११॥ एषां लोकाः एतैः साध्यानि फलानि तमोनिष्ठा मोहावसानाः॥
भोगकालेपि स्पर्धादिभिः॥ शुचार्पिताः व्याप्ताः॥ भक्तसुखस्य त्वमाह॥ मयीति॥ यावत्समाधि हृदि सम्यङ्मया पर
मानंदरूपेण आत्मना स्वरूपत्वेन स्फुरता॥१२॥ किंच अन्येषां तत्र लोकादि परिच्छिन्नं सुखं तत्तु भक्तस्य
परिपूर्णमित्याह॥ अकिंचनस्येति॥१३॥ सुखस्य परिपूर्णतामेवाह॥ न पारमेष्ठ्यमिति॥१४॥ रसाधिपत्यं

आद्यंतवंत एवैषां लोकाः कर्मविनिर्मिताः। दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः॥
मय्यर्पितात्मनः सभ्य निरपेक्षस्य सर्वतः॥ मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां॥१२॥ अ
किंचनस्य दांतस्य शांतस्य समचेतसः॥ मया संतुष्टमनसः सर्वाः सुखमया दिशः॥१३॥ न पारमे
ष्ठ्यं न महेंद्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यं॥ न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति म
द्विनान्यत्॥१४॥ न तथा मे प्रियतम आत्मयोनिर्न शंकरः॥ न च संकर्षणो न श्रीर्नैवात्मा च यथा
भवान्॥१५॥ निरपेक्षं मुनिं शांतं निर्वैरं समदर्शनं॥ अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः
१६

पातालादिस्वाम्यं अपुनर्भवं मोक्षमपि॥ मद्विना मां हित्वा अन्यन्नेच्छति॥ अहमेव तस्य प्रेष्ठ इत्यर्थः॥१४॥
ममापि स एव प्रेष्ठ इत्याह॥ न तथेति द्वाभ्यां॥ आत्मयोनिर्ब्रह्मा पुत्रोपि शंकरो मत्स्वरूपभूतोपि संकर्षणः
भ्रातापि श्रीर्भार्यापि आत्मा मूर्तिरपि॥ यथा भक्त इति वक्तव्ये ति हर्षेणाह भवानिति॥१५॥ पूयेयमहं तत्र वर्ति
अंघ्रिरेणावनिपतितायामिति भावेनेत्यर्थः॥१६॥

किंच मद्भक्तानां स्वतएव तावदेवंभूतसुखमिति वा को वक्तुं समर्थः ॥ यदनंतं तत्त्वसंवेद्यं निरूपममित्याह निष्किंचना इति
महांतो निरहंमानाः ॥ अनालब्धधियः अस्पृष्टचित्ताः निःकिंचनत्वादीनां यद्येवं हेतुहेतुमद्भावः ॥ एवंभूता म-
म मदीयाः ॥ यत्सुखं जुषंति सेवंते तत्सुखं त एव विदुः लभंते नान्ये कुतः नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते
निरपेक्षाः ॥ तैरेव लभ्यं न तु मोक्षापेक्षैरपीत्यर्थः ॥ यद्वा एवंभूताः संतो ये मामित्यर्थः जुषंते प्रीणंति तत्प-
वयत्नैरपेक्ष्यं न हि दुर्नीत्यदूर्थः ॥१७॥ अपिच आस्तां तावदुत्तमभक्तकथा यतः प्राकृतोपि भक्तः कृतार्थ इ-

निष्किंचना मय्यनुरक्तचेतसः शांता महांतोखिलजीववत्सलाः ॥ कामैरनालब्धधियो जुषंति
यत्नैरपेक्ष्यं न विदुः सुखं मम ॥१७॥ बाध्यमानोपि मद्भक्तो विषयैरजितेंद्रियः ॥ प्रायः प्रगल्भया
भक्त्या विषयैर्नाभिभूयते ॥१८॥ यथाग्निः सुसमिद्धार्चिः करोत्येधांसि भस्मसात् ॥ तथा मद्विषया
भक्तिरुद्धवैनांसि कृत्स्नशः ॥१९॥ न साधयति मां योगो न सांख्यं धर्म उद्धव ॥ न स्वाध्यायस्तपस्त्यागो
यथा भक्तिर्ममोर्जिता ॥२०॥ भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां ॥ भक्तिः पुनाति मन्निष्ठा
श्वपाकानपि संभवात् ॥२१॥ धर्मः सत्यदयोपेतो विद्या वा तपसान्विता ॥ मद्भक्त्यापेतमात्मानं न स-
म्यक् प्रपुनाति हि ॥२२॥

वेत्याह ॥ बाध्यमान इति द्वाभ्यां ॥ विषयैराकृष्यमाणोपि प्रगल्भया समर्थया ॥१८॥ पाकाय संप्रज्वलितोग्निः
रिंधांसि यथा काष्ठानि भस्मीकरोति ॥ तथा रागादिनापि कथंचिन्मद्विषया सती भक्तिः समस्तपापानीति भग-
वानपि स्वभक्तिमहिमाश्चर्येण संबोधयति ॥ अहो उद्धव विस्मयं शृणु भवति अतन एवंभूतं श्रेयो नान्यदस्ती-
त्याह ॥ न साधयतीति द्वाभ्यां ॥२०॥ श्रद्धया या भक्तिस्तया संभवात् दोषादपीत्यर्थः ॥२१॥ भक्त्यभावे त्वसा-
धनं व्यर्थमित्याह द्वाभ्यां धर्म इति ॥२२॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भक्तिर्गम्यते १॥ कृष्णमा

रोमहर्षादिकंविनाकथंभक्त्याचविनाऽऽशयःशुद्ध्येदिति॥२३॥किंचभक्तिःस्वाश्रयंशोधयतीतिकिंवक्तव्यं
यतोगद्गदवागादिलक्षणोमद्भक्तियुक्तोलोकंसर्वंपुनातीत्याहवागिति॥२४॥अपिचभक्त्यैवात्मशुद्धिर्नान्य
तइतिसदृष्टांतमाह॥यथेतियथाग्निनाध्मातंतापितमेवहेमस्ववर्णभ्रंशमलंजहातिनक्षालनादिभिःस्वं
निजंरूपंचभजतेकर्मानुशयंकर्मवासनांमांभजतेमद्रूपतामापद्यते॥२५॥ननुब्रह्मविदाप्नोतिपरंतनमेव

कथंविनारोमहर्षंद्रवताचेतसाविना॥विनानंदाश्रुकलयाशुद्ध्येद्भक्त्याविनाशयः॥२३॥वाग्
गद्गदाद्रवतेयस्यचित्तंरुदत्यभीक्ष्णंहसतिक्वचिच्च॥विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनं
पुनाति॥२४॥यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभजतेस्वरूपं॥आत्माचकर्मानुशयंविधू
यमद्भक्तियोगेनभजत्यथोमां॥२५॥यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः
तथातथापश्यतिवस्तुसूक्ष्मंचक्षुर्यथैवांजनसंप्रयुक्तं॥२६॥विषयान्ध्यायतश्चित्तंविषयेषुविष
ज्जते मामनुस्मरतश्चित्तंमय्येवप्रविलीयते॥२७॥ ॥

विदित्वातिमृत्युमेतीत्यादिश्रुतिभ्योज्ञानादेवाविद्यानिवृत्त्यापिवगम्यते॥कुतोभक्तियोगेनेत्युच्यतेत्राह॥यथा
यथेति आत्माचित्तंपरिमृज्यतेशोध्यतेमत्पुण्यकथानांश्रवणैरभिधानैश्चभक्तेर्देवावाँएष्यामित्यर्थः॥२६ तत्त्वापायेज्ञानंन२
किंचतानेनामचित्तस्यमदाकारपरिणामः॥भक्ततःस्वभावतएवभवतिनचयत्नान्तरमपेक्षितइतिसदृ
ष्टांतमाहविषयानिति॥२७॥ ॥
स्वचमां

श्री॰
भाग॰
टी॰
८८

यस्मादन्यत्सार्थं न तत्फलं च स्वप्नमनोरथवदसदभिध्यानमतो वै तस्मात्तद्विहाय मय्येव मनः ॥ समाहितं कु
र्विति प्रकरणार्थमुपसंहरति तस्मादिति ॥ मद्भावभावितं मद्ध्यानेनैव भजनेनैव शोधितं ॥ २८ ॥ विशेषतो वा
त्स्यायनाद्युक्तकामसमार्गः ॥ परित्याज्या इत्याह ॥ स्त्रीणामिति आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते वि
जने ॥ २९ ॥ एतदुपपादयति ॥ न तथेति ॥ पुंसः पुंसो यथा तत्संगिसंगतः क्लेशो भवेत् यथा च बंधो यथा योषित्संग

तस्मादसदभिध्यानं यथा स्वप्नमनोरथं ॥ हित्वा मयि समाधत्स्व मनो मद्भावभावितं ॥ २८ ॥ स्त्री
णां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् ॥ क्षेमे विविक्त आसीनश्चिंतयन्मामतंद्रितः ॥ २९ ॥ न त
थास्य भवेत्क्लेशो बंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ॥ ३० ॥ उद्धव
उवाच ॥ यथा त्वामरविंदाक्ष यादृशं वा यदात्मकं ॥ ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हसि ॥ ३१ ॥

गाद्यथान्यसंगतो न भवेदिति ॥ ३० ॥ मां चिंतयेदित्युक्तं तदुक्तं तस्य कारं पृच्छति ॥ यथेति ध्यानं नामप्रश्नः यादृ
शमिति ध्येयविशेषणप्रश्नः ॥ यदात्मकमिति ॥ यस्य तानि विशेषणानि तत्स्वरूपप्रश्नः ॥ एतन्मे ध्यानं वक्तुम
र्हसीति पाठः तत्रायमर्थः ॥ मुमुक्षुस्त्वां यथा ध्यायेत् तन्मे वक्तुमर्हसीति जिज्ञासोः तथा यमेव प्रकारेण तदा
त्ममेव पुरुषार्थः नन्वध्यानेन कृत्यमसीति तद्रुक्तं ॥ तथापि पृष्टं ग्रंथेत्यादि त्वं वक्तुमर्हसीति पाठस्तु सुगमः

११

राम
८८

तत्र ध्यानांगत्वेनासनप्राणायामप्रकारमाह सम इति चतुर्भिः ॥ समेनात्युच्छ्रितेनातिनीचे आसने समकायः स
न्यथासुखमासीनः इति नानि स्वस्तिकादिनियम इत्युक्तं नासाग्रनिरीक्षणं च चित्तस्थैर्याय ॥ अंतर्लक्ष्यो बहि
र्दृष्टिः स्थिरचित्तः सुसंयतः ॥ इति योगशास्त्रोक्तेः ॥ ३२ ॥ विपर्ययेण रेचकपूरककुंभकक्रमेणापि यद्वामनाया पी३
पूरितं दक्षिणया त्यजेत् ॥ तया वा पूरितं वामयैवं विपर्ययेण ॥ यथोक्तं योगे ॥ इडया पूरयेद्वायुं त्यजेत्पिंगल
या ततः इति निर्जितेंद्रियः इति प्रत्याहार उक्तः ॥ ३३ ॥ प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति तत्र श्रेष्ठ

श्रीभगवानुवाच ॥ समआसनआसीनः समकायो यथासुखं ॥ हस्तावुत्संगआदाय स्वनासाग्र
कृतेक्षणः ॥ ३२ ॥ प्राणस्य शोधयेन्मार्गं पूरकुंभकरेचकैः ॥ विपर्ययेणापि शनैरभ्यसेन्निर्जितेंद्रि
यः ॥ ३३ ॥ हृद्यविच्छिन्नमोंकारं घंटानादं बिसोर्णवत् ॥ प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं ॥ ३४
एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत् ॥ दशकृत्वस्त्रिषवणं मासादर्वाक् जितानिलः ॥ ३५ ॥

त्वात्प्रणवगर्भमाह ॥ हृदीति द्वाभ्यां मूलाधारादारभ्य अविच्छिन्नं संतं घंटानादवद्दीर्घमोंकारं हृदि संस्थितं
प्राणेनोदीर्य ऊर्ध्वं द्वादशांगुलपर्यंतं नीत्वा कथंभूतं बिसोर्णावत् कमलनालतंतुवत् ॥ तत्र मात्रातीतं स्वरं पंच
दशं बिंदुं संवेशयेत् ॥ अयमर्थः पुनरित्यस्य ओंकारस्य बिंदुं शिरस्कं कुर्यादित्यर्थः ॥ यद्वा मूलाधारादारभ्य मूर्धांत
पर्यंतं बिसतंतुवत्सूक्ष्मम् अविच्छिन्नं संतं हृदि मनसि प्राणेनोदीर्याभिव्यज्य अयमर्थः पुनस्तमोंकारं घंटानादव
त्संस्वरं उदात्तं नादं स्थिरीकुर्यादिति ॥ ३४ ॥ मासादर्वाक् जितानिलो भवति ॥ ३५ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री। भाग। पटी। ६९

एवं ध्यानाङ्गमुक्त्वाथाह शाभिस्त्रयोविंशतिः ध्येयं प्रीवमाह ॥ हृत्पुण्डरीकमिति सार्थेन ग्रन्थेन स्वदेहान्तर्वर्ति ऊर्ध्वनालमधोमुखं मुकुलितं कदलीपुष्पसङ्काशं पद्मं सन्निहितं परीतं ध्यात्वा तदूर्ध्वं न्यसेत् चिन्तयेत् ॥३६॥ सविशेषणं ध्यानमाह ॥ वह्निमध्य इति षड्भिः ध्यानमङ्गलं ध्यानस्य शुभं विषयं समं सममनूनपादवयवं दीर्घाश्च

हृत्पुण्डरीकमन्तःस्थमूर्ध्वनालमधोमुखं ॥ ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकं ॥ कर्णिकायां
न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं ॥ [illegible] ॥३६॥ वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गलं
समं प्रशान्तं सुमुखं दीर्घचारुचतुर्भुजं ॥ ३७ ॥ सुचारुसुन्दरग्रीवं सुकपोलं शुचिस्मितं ॥ समान-
कर्णविन्यस्तस्फुरन्मकरकुण्डलं ॥ ३८ ॥ हेमाम्बरं घनश्यामं श्रीवत्सश्रीनिकेतनं ॥ शङ्खचक्रग-
दापद्मवनमालाविभूषणं ॥ ३९ ॥ नूपुरैर्विलसत्पादं कौस्तुभप्रभयायुतं ॥ द्युमत्किरीटकटक-
कटिसूत्राङ्गदायुतं ॥ ४० ॥ सर्वाङ्गसुन्दरं हृद्यं प्रसादसुमुखेक्षणं ॥ सुकुमारमभिध्यायेत्सर्वाङ्गेषु
मनो दधत् ॥ ४१ ॥ ॥

दीर्घाश्च चत्वारो भुजा यस्मिंस्तत् ॥ ३७ ॥ श्रीवत्सं श्रियो निकेतनं वक्षसि दक्षिणस्थामतस्तन्मध्ये पुष्कसिस्त्र ॥ ३८ ॥ सुचारु प्रविरस्य समानयोः कर्णयोर्विन्यस्ते स्फुरती मकरकारे कुण्डले यस्मिंस्तत् ॥ ३८ ॥ द्युमद्भिः किरीटादिभिः आसमन्तात् युतं अलङ्कृतं ॥ ४० ॥ प्रसादेन शोभनं सुखमीक्षणं च यस्मिंस्तत् सुकुमारमतिकोमलं ॥ ४१ ॥

राम। ६९

सविशेषणं ध्यानमुपसंहरति॥ इंद्रियाणीति॥ प्रकर्षेण नयेत्॥ सर्वतः सर्वांगयुक्तं यावद् ॥ शुस्मितस्यात्र व्रतेन सविशेषणमुक्तायदात्मकं स्मितस्यात्र व तया शनैर्विशेषणत्यागेन ध्यानमेव समाधिपर्यंतमाह॥ तदिति त्रिभिः॥ एकत्र अन्यान्यंगानि न चिंतयेत्॥ ४३॥ एकत्रेति यदुक्तं तदेवांगं दर्शयति सुस्मितमिति व्योम्नि सर्वकारणरूपे॥ ४४॥ तच्च कारणत्वमपि त्यक्त्वा मदारोहः॥ मयि शुद्धे ब्रह्मण्यारूढः सन्॥ न किंचिद्ध्यात्

एवं मध्यानसंयुक्तो योगी भवति मानवः॥ १

इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः॥ ४२॥ बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत्॥ ४३॥ नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं॥ तत्र लब्धपदं चित्तमाकृष्य व्योम्नि धारयेत्॥ तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत्॥ एवं समाहितमतिर्मामेवात्मानमात्मनि॥ ४५॥ विचष्टे मयि सर्वात्मन् ज्योतिर्ज्योतिषि संयुतं॥ ४५॥ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः॥ संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः॥ ४६॥ इत्येकादशे चतुर्दशः॥ १४॥

ध्येयविभागमपि चिंतयेत्॥ मामेवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योतिर्ज्योतिषि संयुतमेवेत्यन्वयः॥ ४५॥ एवंभूतस्य समाधिपर्यंतस्य ध्यानस्य फलमाह॥ ध्यानेनेति॥ मनो युंजतः समाधिसंयुतः द्रव्यज्ञानक्रियाभ्रमः॥ अधिभूताधिदैवाध्यात्मरूपः॥ द्रष्टृदृश्यदर्शनरूपो वा भ्रमः॥ निर्वाणं शांतिं सम्यग्यास्यतीति॥ ४६॥ इत्येकादशे चतुर्दशः॥ ॥

श्री॰ भा॰ ग॰ ए॰ ७०

ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः ॥ श्रीविष्णुपदसंप्राप्तावंतरायतया मताः ॥ एवं मनो युंजतो योगिः
नोनंतरमाविर्भवंत्यः ॥ सिद्धयोप्यंतरायप्राया एव अतस्ताः परिहृत्य परमेश्वरपर एव भवेदिति वक्तुं सिद्धीरा
ह जितेंद्रियस्येति युक्तस्य स्थिरचित्तस्य इंद्रियाधिष्ठात्रधिदैवं इंद्रियमध्यात्मं विषयोधिभूतं ॥१॥ त्विदि
ति वितर्के का स्वित् किंनामकं कथं स्वित् कीदृशी वा धारणया कतीति प्रश्नांतरे वा शब्दः। त्वमेवैतज्जानासि नान्य
इत्याशयेनाह। योगिनामिति धारणाश्च अष्टादश त्वनुषंगः ॥ योगपारगैरिति त्रिकालज्ञत्वादिलक्षणसिद्धे
रन्येपि जानंतीति भावः ॥ अष्टमेव प्रधानं मुख्यं स्वभावतः ॥ आश्रयो यासां ताः ॥ मत्सारूप्यप्राप्तेषु किंचिन्नाः

श्रीभगवानुवाच ॥ जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः ॥ मयि धारयतश्चेत उपतिष्ठंति सि
द्धयः ॥१॥ उद्धव उवाच ॥ कया धारणया कास्वित्कथं वा सिद्धिरच्युत ॥ कति वा सिद्धयो ब्रूहि योगिनां
सिद्धिदो भवान् ॥२॥ श्रीभगवानुवाच ॥ सिद्धयोष्टादश प्रोक्ता धारणा योगपारगैः । तासामष्टौ म
त्प्रधाना दशैव गुणहेतवः ॥३॥ अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः ॥ प्राकाम्यं श्रुतदृष्टेषु
शक्तिप्रेरणमीशिता ॥४॥ गुणेष्वसंगो वशिता यत्कामस्तदवस्यति । एता मे सिद्धयः सौम्य अष्टावौत्प
त्तिकीर्मताः ५ ॥

भवंतीति भावः । गुणहेतवः सत्वोत्कर्षहेतुकाः ॥३॥ ताः स्वरूपेणोपदिशति ॥ अणिमेति सार्धैः पंचभिः । अणि
मा महिमा लघिमा च मूर्तेर्देहस्य तिस्रः सिद्धयः प्राप्तिर्नाम सिद्धिः । सर्वप्राणिभूतैरिंद्रियैः तदधिष्ठातृदेवतारूपेण संबंधः प्राकाम्यं श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि
नामैश्वर्यं सिद्धिः । शक्तीनां मायायास्तदंशभूतानां प्रेरणं तदैश्वर्यमाया अन्येषु तदंशानां प्रेरणमीशिता नाम सिद्धिः
४ ॥ विषयभोगेष्वसंगो वशिता सिद्धिः । यद्यत्सुखं कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीति सिद्धिः
औत्पत्तिकाः स्वाभाविका निरतिशयाश्चेत्यर्थः ॥५॥

सर्वप्राणिनामिंद्रियैः सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थः श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपि ॥ ३ ॥

यत्कामः २

प्राकाश्यं २
प्राकाम्यं २

रास॰ ७१

गुणोद्देतसिद्धीराह ॥ अनूर्मिमत्वं क्षुत्पिपासादिराहित्यं दूरश्रवणं दर्शनं चेति देहसिद्धी ॥ मनोवेगेन देहस्य गतिः कामि
तरूपप्राप्तिः ॥ परकायप्रवेशः ॥ ६ ॥ स्वेच्छामृत्युः अप्सरोभिः सह देवानां याः क्रीडास्तासामनुदर्शनं प्राप्तिः संकल्
ल्पानुरूपाप्राप्तिः अप्रतिहताज्ञा सर्वत्राप्रतिहतगतिर्यस्याः साज्ञा तावेता योगदृशा ॥ ७ ॥ इदानीं क्षुद्रासिद्धीरुपचाह
त्रिकालज्ञत्वमिति ॥ अद्वंद्वं शीतोष्णाद्यभिभावः ॥ अग्न्यादीनां संस्तंभनम् ॥ ८ ॥ तत्त्वधारणाभिः सह विशेषतो
निरूपयति यथेति यावत्समाप्तिः ॥ ९ ॥ भूतसूक्ष्मोपाधौ मयि मनो धारयन् तन्मात्रं भूतसूक्ष्माकारं उपास्ते यः

अनूर्मिमत्वं देहे ऽस्मिन् दूरश्रवणदर्शनम् ॥ मनोजवः कामरूपं परकायप्रवेशनं ॥ ६ ॥ स्वच्छंदमृ
त्युर्देवानां सहक्रीडानुदर्शनम् ॥ यथासंकल्पसंसिद्धिराज्ञाप्रतिहतागतिः ॥ ७ ॥ त्रि कालज्ञत्वम
द्वंद्वं परचित्ताद्यभिज्ञता ॥ अग्न्यर्काम्बुविषादीनां प्रतिष्टंभोपराजयः ॥ ८ ॥ एताश्चोद्देशतः प्रोक्ता योगधा
रणसिद्धयः ॥ यया धारणया या स्याद्यथा वा स्यान्निबोध मे ॥ ९ ॥ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारय
न्मनः ॥ अणिमानमवाप्नोति तन्मात्रोपासको मम ॥ १० ॥ महत्यात्मन्मयि परे यथासंस्थं मनो दधत्
महिमानमवाप्नोति भूतानां च पृथक्पृथक् ॥ ११ ॥ परमाणुमये चित्तं भूतानां मयि रंजयन् ॥ काल
सूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् ॥ १२ ॥ त्रि २

प्रधाने

स तन्मात्रोपासकः मम मदीयमणिमानं ॥ १० ॥ ज्ञानशक्तिमहत्तत्त्वोपाधौ मयि ॥ यथासंस्थं महत्तत्त्वाकारं
भूतानां चेति ॥ आकाशादिभूतोपाधौ च मयि मनो धारयन् ॥ तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ॥ ११ ॥ वाय्वादि
भूतानां ये परमाणवस्तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी कालसूक्ष्मार्थतां कालपरमाणुः पार्थिव
पतामिनिलचतुर्विवरणं तदुक्तं ॥ स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति ॥ १२ ॥ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वैकारिकाहंकारोपाधौमयि ॥ अखिलमेकाग्रंआत्मत्वमधिष्ठातृत्वं ॥ अत्रहेतुर्मन्मनाः मयिमनोधारणात्
प्रभावादेवभवतिना अन्यहेतुरनुसंधेय इतिभावः ॥ एवंमहदारण्णानुभावेन मयोगबलमाश्रयइतिआदि
षुद्रष्टव्यम् ॥ क्रियाशक्तिप्रधानेमहत्तत्त्वमेवसूत्रंतदुपाधौमयिसमेपारमेष्ठ्यंसर्वोत्कृष्टप्राकाम्यंविंदतेक
थंभूतस्यअव्यक्तात्जन्मयस्यतस्यसूत्रस्यतदुपाधेर्ममेत्यर्थः ॥ १५ ॥ अधीश्वरेत्रिगुणमायानियंतरि

धारयन्मय्यहंतत्त्वेमनोवैकारिकेखिलम् ॥ सर्वेंद्रियाणामात्मत्वंप्रा
प्तिंप्राप्नोतिमन्मनाः ॥ १४ ॥ महत्यात्मनियःसूत्रेधारयन्मयिमानसम्
प्राकाम्यंपारमेष्ठ्यंमेविंदतेऽव्यक्तजन्मनः ॥ १५ ॥ विष्णौत्र्यधीश्वरेचित्तं
धारयेत्कालविग्रहे ॥ सईशित्वमवाप्नोतिक्षेत्रक्षेत्रज्ञचोदनाम् ॥ १६ ॥ ॥

अतएवकालविग्रहे ॥ आकलयितृरूपे ॥ अंतर्यामिणिईशित्वंविशिनष्टिक्षेत्रज्ञानांजीवानांक्षेत्रा
णांशरीराणांतदुपाधीनांचोदनांप्रेरणं नतुवि स्वस्रष्टादिकर्तृत्वलक्षणमित्यर्थः ॥ ॥ १६ ॥ रामः
श्रीरामायनमः ॥ ॐनमः कमलदलविपुलनयनाभिरामायश्रीरामचंद्रायनमोनमः ॥ ॥ रामजे ॥ ॥

तुरीयाख्ये विराड्हिरण्यगर्भसूत्रकारणं चेश्वपाथयः ॥ ईशस्य त्रिभिर्हीनं तुरीयं तत्पदं विदुरिति चैवं ल
क्षणे ॥ ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ॥ ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ तद्वति भगवद्
ब्रह्मशालिने ॥ ७ ॥ स्वयं परमानंदरूपे सर्वोपि कामस्तत्र देशभूतो वसीयते समाप्यते ॥ ८ ॥ अतः परं गुणहे

नारायणे तुरीयाख्ये भगवच्छब्दशालिने ॥ मनो मय्यादधद्योगी मद्धर्मैर्वशतामियात् ॥ ७ ॥
निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः ॥ परमानंदमाप्नोति यत्र कामोवसीयते ॥ ८ ॥ श्वेत
द्वीपपतौ चित्तं शुद्धे धर्ममये मयि ॥ धारयन्श्वेततां याति षड्र्मिरहितो नरः ॥ १९ ॥ मय्याकाशा
त्मनि प्राणे मनसा घोषमुद्वहन ॥ तत्रोपलब्धा भूतानां हंसो वाचः शृणोत्यसौ ॥ २० ॥ ॥

तुकाः सिद्धीराह ॥ शुद्धे सत्वात्मके श्वेततां शुद्धरूपतां ॥ १९ ॥ आकाशात्मा यः प्राणः समष्टिरूपं सा
रूपे मयि मनसा घोषं नादं चिंतयन् ॥ असौ हंसो जीवः तत्र आकाश उपलब्धा ताता सन् ॥ तत्रस्थाः वि
विधा वाचः शृणोति यद्वा तत्राकाशे उपलब्धा अभिव्यक्ता या भूतानां वचि तां हरतः शृणोतीति २०
राम ॥ ॥ राम ॥ राम ॥ ॥

दूरश्रवणमुक्त्वा दूर
दर्शनमाह ॥ ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भाग
वती॰
७२

त्वष्टा आदित्यः। तस्मिन्नुपविविक्षिते॥ चक्षुः संयोज्य च चक्षुषि संयोज्य ततो भयसंयोगे मां ध्यायन् विश्वंसूक्ष्मदृक्ततः
पश्यति॥२१॥ मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य या मद्धारणा क्रियते तस्याः प्रभावेन यत्र
मनो याति तत्रात्मा देहो यातीत्यर्थः॥ यदा मनःकर्तृ आत्मानं वायुना सह देहं च मयि संयोज्य यत्र याति ततः

चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि। मां तत्र मनसा ध्यायन् विश्वं
पश्यति सूक्ष्मदृक्॥२१॥ मनो मयि सुसंयोज्य देहं तदनुवायुना
मद्धारणानुभावेन तत्रात्मा यत्र वै मनः॥२२॥ यदा मन उपादाय
यद्यद्रूपं बुभूषति। तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः॥२३॥

तत्र देहो यातीति॥२२॥ मनः उपादाय उपादानकारणं कृत्वा यद्यद्देवादिरूपं भवितुमिच्छति तत्तन्मनो
रूपं मनसो भीष्टं रूपं योगी भवेत्॥ कुतो यतो मद्योगबलं यो हं अचिन्त्यशक्तिः नानाकारस्तस्मिन्मनसो यो
गो धारणा तस्य बलं प्रभावः॥ स एवाश्रयः कारणं॥२३॥ यिमर

राम॰
७२

सर्वकारणभूतेन नियम्य पवनं परब्रह्माणम् ऊर्ध्वरंध्रे समारोप्य नीत्वा तनुमुत्सृजेत्पिंडमित्यर्थः ५॥

यत्र प्रविविक्षति तत्रात्मानं चिंतयेत् ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानं लिंगशरीरोपाधिः वायु
भूतः आत्मवायोभूतः प्रविशति तेन मार्गेणेत्यर्थः ॥ षडंघ्रिवत् भृंगो यथा पुष्पात्पुष्पांतरमनायासेन प्र
विशति तद्वत् पिंडं हित्वेत्युक्तं भवति ॥२३॥ पिंडं हित्वेत्युक्तं तत्प्रकारं कथयन् स्वचक्रं स्मरन्नाह ॥ प्राप्या
पार्ष्णिना गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं ब्रह्मरंध्रेण मूर्धद्वारेण ॥ ब्रह्मेत्युपलक्षणं ब्रह्मवान्य
द्वाप्रपदितं स्थानं मनसा ॥२४॥ मत्स्वमनस्मृतिं तत्पश्यद्धंसत्वं विचिंतयेत् ॥ तदास्याद्भूतनयः सतो

परकायं विशाम्यह ॥ आत्मानं तत्र भावयेत् ॥ पिंडं हित्वा विशेत्प्राणो वायुभूतं षडंघ्रिवत् ॥२३॥
पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्धसु ॥ आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं ॥२४॥
विहरिष्यन्सुराक्रीडे मत्स्थं सत्त्वं विभावयेत् ॥ विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुरस्त्रियः ॥२५॥
यदा संकल्पयेद्बुद्ध्या यथा वा मत्परः पुमान् ॥ मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते ॥२६॥ यो
वै मद्भावमापन्न ईशितुर्वशितुः पुमान् ॥ कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम ॥२७॥ मद्भ
क्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः ॥ तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता ॥२८॥

गाभूताः ॥२५॥ यदा वा अत्रकालेपि यद्यच्चेति पाठे ॥ यथा च येन केनापि प्रकारेण बुद्ध्या संकल्पयेत् ॥ य
था कामं मत्परो मयि विश्वासवान् भवति तथा तदनुरूपं सर्वं प्राप्नोतीत्यर्थः ॥ किं कुर्वन् सत्ये सत्यसंक
ल्पे मयि मनो युंजन् ॥२६॥ मदविशिष्टपृथक्त्वादेममेत्यर्थः ॥ ईशितुः सर्वनियंतुः वशितुः स्वतंत्रस्य ॥ मत्
भावस्वभावप्राप्तः ॥ एतान्गुणान्हेतवः ॥२७॥ अतः परं धारणाविद इति त्रिकालतेश्वरधारणास
हिता त्रैकालिकी त्रिकालवस्तुविषया स्वजन्ममृत्युभ्यामुपबृंहिता तत्सहिता ॥ अनयैव परचित्ताय
भिज्ञतापि व्याख्याता ॥२८॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सर्वभूतहृदि संस्थं ममात्मानं सर्वसाक्षिणं ध्यायेदानंतया चित्रं परिपश्यति ।

श्री
भा॰ गु॰
पा॰ टी॰
७२

उदासीने मय्यपि परे प्रकृतेर्गुणवत्रिषु चिन्मये धारयेच्चेतो हंहैर्ने नाभिभूयते ॥ ११ ॥ वृ॰

अग्न्यादिसर्वोपद्रवान्भूतो भवानित्येवंभूतयोगमयं तैर्नाभिभूयते ॥ अत्र हेतुर्मद्योगेति यादसामुदकं यथाभि
घातकं न भवति तथा तस्य वपुषोग्न्यादय इत्यर्थः ॥ अनयैवाऽहंकृतापि व्याख्याता ॥ ३३ ॥ मद्विभूतीर्ममावता
रान् ध्वजादिभिः सह ॥ ३४ ॥ उपसंहरति उपासकस्येति ॥ पूर्वमुक्ता धारणाभिः ॥ ३५ ॥ यद्वा किं नानाधारणा
प्रयासेन एकयैव सर्वाः सिद्धयो भवंतीत्याह ॥ जितेंद्रियस्येति मद्धारणां नारायणतुरीयाख्येत्यत्रोक्ता ।
यां सुदुर्लभा स्यात्सा का न काचिदित्यर्थः ॥ ३६ ॥ यद्यप्येवं तथापि न प्रार्थ्या इत्याह ॥ अंतरायानिति ॥ ३७ ॥

अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः ॥ मद्योगशांतचित्तस्य यादसामुदकं यथा ॥ ३३ ॥ मद्विभू
तीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः ॥ ध्वजातपत्रव्यजनैः स भवेदपराजितः ॥ ३४ ॥ उपास
कस्य मामेवं योगधारणया मुनेः ॥ सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः ॥ ३५ ॥ जितेंद्रियस्य
दांतस्य [illegible] जितश्वासात्मनो मुनेः ॥ मद्धारणां धारयतः का सा सिद्धिः सु
दुर्लभा ॥ ३६ ॥ अंतरायान्वदंत्येता युंजतो योगमुत्तमम् ॥ मया संपद्यमानस्य कालक्षपणहेत
वः ॥ ३७ ॥ जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः ॥ योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजे
त् ॥ ३८ ॥ सर्वासामपि सिद्धीनां हेतुः पतिरहं प्रभो ॥ अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां
॥ ३९ ॥

तस्मादहैतुकीयमेव धारणा का[illegible] येनान्याः ॥ काम्या इति जन्मेति जन्मनैव काश्चित्सिद्धयो भवंति य
था देवानां यथा च यादसामुदस्तंभः ॥ पक्ष्यादीनां विचरणादि तद्वदौषधादिभिः तत्तल्लैः जन्मौषधितपोमंत्रयोग
जाः सिद्धय इति ॥ योगेन मद्धारणामित्युक्तेन योगगतिं मत्सालोक्यादिरूपां ॥ ३८ ॥ ऊतरश्यन आह सर्वासा
मित्यर्थे सप्रभवोपपादनं हेतुः कारणं पतिः पालयिता चेति किंचन केवलं सिद्धीनामेव प्रभुः अपितु मो
क्षादीनामपीत्याह ॥ अहमिति योगो मोक्षः सांख्यं तत्साधनं ज्ञानं धर्मस्य तदुपदेष्टॄणां ब्रह्मवादिनां च ॥ ३९ ॥

राम॰
७२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ऊतस्तत्राह ॥ अहमिति ॥ सर्वदेहिनां जीवानामात्मा यतः अंतः अंतर्यामी ॥ एषोंतरात्मामृत इति श्रुतेः ॥ न
हि किंमंतर्वर्तित्वात्परिछिन्नः किंतु बहिः न बाह्यस्य व्यापक इत्यर्थः ॥ तत्र हेतुः अनावृतः एतत्सदृष्टांतमाह ॥ भूतेषु च
तद्विधेषु महाभूतानि यथा बहिरंतश्च भवंति स्वयमपि तथेत्यर्थः ॥ २६ ॥ इत्येकादशे पंचदशः ॥ १५ ॥ षोडशे
तद्देशादाविर्भावयुक्ता विभूतयः ॥ ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः ॥ १ ॥ अंतश्चिंतनेन यद्ध्यानमयाकामं
कृतात्मनो ॥ अतस्तद्योग्यताप्राप्त्यै विभूत्यादिनिरूपणं ॥ २ ॥ एवं तावत्तु बाह्याधर्मश्रेष्ठो प्रश्नानिरूपिताः बाह्यत
संभवेत्तावत्समस्मादि चतुष्टये ॥ वंधमुक्त्योर्निर्धारे सद्गत्योश्च ततः परं ॥ द्वादशेनंतरं कर्मकृतित्याग व्यव
स्थितौ ॥ हंसेतिहासतो योगनिष्ठायां च त्रयोदशे ॥ श्रेयःसाधननिर्धारे ध्याने चैव चतुर्दशे ॥ धारणासिद्धिभेदे
च प्रसंगेन निरूप्यते ॥ उद्धवप्रश्नतोदत्तमुत्तरं हरिणोचितं ॥ षोडशे भूतिविस्तारे दशयोर्वर्णाश्रमवते ॥ ज्ञाना

अहमात्मांतरो बाह्यो नावृतः सर्वदेहिनां ॥ यथा भूतानि भूतेषु बहिरंतः स्वयं तथा ॥ २६ ॥ इत्येकादशे भ [right margin: दिं ॥]
गवदुद्धवसंवादे पंचदशः ॥ उद्धव ॥ त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतं ॥ सर्वेषामपि भावानां त्राणस्थित्यप्य द्भि

रिनिर्णये वा नोयमादीनां च निर्णये ॥ योगविद्याधिकारे च विंशे च तदनंतरे ॥ तत्त्वसंख्याविवादे च पुं[illegible] प्रकृ
त्योर्विवेचने ॥ जन्ममृत्युप्रकारे च द्वाविंशे तदनंतरं ॥ परापवर्ग[illegible]हनेश्च त्रिभिस्तदनंतरैः ॥ सप्तविंशे क्रि
संसारासंभवे प्रश्ने तन्मध्ये दत्तमुत्तरं ॥ तदप्राप्त्या पुनः प्रश्ने भक्तियोगोपसंहृतिः ॥ एवं प्रश्नोत्तराण्यत्र क्रमे
णैतानि विंशतिः ॥ अहमात्मांतरो बाह्यो नावृतः सर्वदेहिनां ॥ यथाभूतानि भूतेषु बहिरंतः स्वयं तथेत्युक्तं ॥ तत्र
च भूतानि यथा क्वचित्केन चित् गुणविशेषेणोद्रिक्तानि वर्तंते ॥ एवं विभुत्वसामान्यरूपेणैव तथात्मपि[illegible] कश्चित् व
र्त्तत इति विभूतीः ॥ प्रष्टुं प्रथमं तावदुक्तमेव सर्वात्मत्वमु[illegible]पपादयन्ननुवदति त्वं ब्रह्मेति ॥ अपावृतं निरावरणं
स्वतंत्रं वा अत एव सर्वेषामपि त्राणं रक्षणं स्थितिर्जीवनं त्राणस्थितिसहिताव प्ययोद्भवौ यस्मात्स्त्वमुपा
दानकारणमित्यर्थः ॥ १ ॥ ॥ ५ ॥ यायोगप्रश्ने लड्डपवर्णनं ॥ अष्टाविंशे ततः प्रोक्ता ज्ञानयोगोपसंहृतिः ॥ ५ ॥ ॥

[left margin: ल ६४]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अत्रसदाचारंप्रमाणमाह ॥ यथातथ्येनयथार्थत्वेनसर्वभूतकारणंत्वांब्राह्मणावेदतात्पर्यविदः ॥ १ ॥ एवंकार-
णत्वेनसर्वात्मत्वमनुयाविभूतीःपृच्छति ॥ येष्वितिउपासीनःसेवमानः ॥ २ ॥ दुर्ज्ञेयत्वमेवाह ॥ गूढः ॥ अस्पृष्टःभू-
तानांप्राणिनामंते ॥ अत्रहेतुः ॥ भूतानामात्माअंतर्यामी ॥ अत्रापिहेतुः ॥ हेभूतभावनेतितेत्वया ॥ ४ ॥ ताएव

उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः ॥ उपासतेत्वांभगवन्याथातथ्येनब्राह्मणाः ॥ २ ॥ येषुये
षुचभावेषुभक्त्यात्वांपरमर्षयः ॥ उपासीनाःप्रपद्यंतेसंसिद्धिंतद्वदस्वमे ॥ ३ ॥ गूढश्चर
सिभूतात्माभूतानांभूतभावन ॥ नत्वांपश्यंतिभूतानिपश्यंतंमोहितानिते ॥ ४ ॥ याः
काश्चभूमौदिविवैरसायांविभूतयोदिक्षुमहाविभूते ॥ तामह्यमाख्याह्य
नुभावितास्तैर्नमामितेतीर्थपदांघ्रियुग्मम् ॥ ५ ॥ ॥ राम ॥ ॥

साकल्येनपृच्छति ॥ हेमहाविभूते ॥ याःकाश्चिद्भूम्यादिषुतेविभूतयः ॥ रसायांरसातलेअनु
भाविताःत्वयैव ॥ केनचिच्छक्तिविशेषेणसंयोजिता ॥ तीर्थानांपदंत्वंतदंघ्रिपद्मंच ॥ ५ ॥
राम ॥ ॥ ॥ रामायनमोनमः ॥ ॥ रामायनमः
ॐनमःकमलदलविपुलनयनाभिरामायश्रीरामचंद्राय
नमोनमः ॥ ॥ राम ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नरावतारभूतार्जुनप्रश्नसंवादित्वात्तवायं प्रश्नः साधीयानिति तावदनुमोदते ॥ एवमिति त्रिभिः प्रश्नं प्रष्टवान् सप
त्नैर्योद्धुमिच्छता विनशने कुरुक्षेत्रे ॥ ६ ॥ युयुत्सोर्विभूतिप्रश्नैकः प्रसंगः तमाह ज्ञात्वेति ॥ लौकिकः प्राकृतमतिः
सन् ॥ ७ ॥ स च यदा ततो ज्ञातिवधान्निवृत्तः तदा मया प्रतिबोधितः सन् ॥ यथा त्वमपि भाषसे एवं संग्राममध्ये मा
मभ्यभाषत ॥ तद्वदेव तथापि कथयिष्यामीति भावः ॥ ८ ॥ ता विभूतीः कथयति अहमिति ॥ अस्मच्छब्दसमा
नाधिकरणाः प्रथमान्ताः द्वितीयान्ताश्च ॥ सर्वविभूतयस्तास्ताश्चाध्यासनार्थं कथ्यन्ते ॥ षष्ठीपंचमीविभक्तिः

श्रीभगवानुवाच ॥ एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर ॥ युयुत्सुना विनशने सपत्नैरर्जुनेन वै ॥ ६ ॥ ज्ञा
त्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकं ॥ ततो निवृत्तो हन्ताहं हतोयमिति लौकिकः ॥ ७ ॥ स तदा पुरुष
व्याघ्रो युक्त्या मे प्रतिबोधितः ॥ अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि ॥ ८ ॥ अहमात्मोद्धवामीषां भू
तानां सुहृदीश्वरः ॥ अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥ ९ ॥ अहं गतिर्गतिमतां कालः कल
यतामहं ॥ गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः ॥ १० ॥ गुणिनामप्यहं सूत्रं महतां च महान
हं ॥ सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ॥ ११ ॥ हिरण्यगर्भो वेदानां मंत्राणां प्रणवस्त्रिवृत् ॥ अक्ष
राणामकारोस्मि पदानि छंदसामहं ॥ १२ ॥ इंद्रोहं सर्वदेवानां वसूनामस्मि हव्यवाट् ॥ आदित्यानाम
हं विष्णू रुद्राणां नीललोहितः ॥ १३ ॥

क्व. विनिर्धारणे [illegible] संबंधे च तथा विषयस्यायोगस्थेषु षष्ठ्या ॥ ततश्चामीषां भूतानामात्मेति सुहृदिति ईश्वर इति
च सामान्येनाहमुपास्य इत्यर्थः ॥ एवं सर्वत्र तेषां स्थित्युद्भवाप्यया तद्धेतुरित्यर्थः ॥ ९ ॥ विशेषतो विभूतीराह
कलयतां वशीकर्तॄणां मध्ये ॥ गुणानां मध्ये गुणिषु धर्मिषु औत्पत्तिकः स्वाभाविको यो गुणः सोहं ॥ १० ॥ सूत्रं प्रथ
मकार्यं महान् महत्तत्त्वं सूक्ष्मोपाधित्वाद्दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वं ॥ बुद्धेर्गुणेनात्मगुणेन चैव बालाग्रमात्रो ह्य
वरोपि हि दृष्ट इति श्रुतेः ॥ ११ ॥ वेदानां सर्ववेदी तेषामध्यापकः पदानि त्रिपदा गायत्र्यादयः ॥ १२ ॥ ॥ ॥

सत्वादीनां साम्यमव्याकृतं ३॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हविर्धानीकाममधेनु: ॥ २४ ॥ २५ नक्षत्राणामहं शशी नांप्रभुं सोमं ॥ यक्षरक्षसां प्रभुं वैश्रवणमित्यर्थः ॥ २६ ॥ यादसां प्रभुं ॥
तपतां प्रतापवतां द्युमतां दीप्तिमतां च मध्ये ॥ २७ ॥ संयमतां दंडयतामित्यर्थः ॥ २८ ॥ शृंगिणां दंष्ट्रिणां च मध्ये तेषां प्र
भुर्वा ॥ तपः संन्यासः प्रथमो ब्राह्मणः ॥ २९ ॥ स्रोतसां प्रवाहानां वा सरसां स्थिरोदकाश्रयानां ॥ ३० ॥ स्थिराणां नि

ब्रह्मर्षीणां भृगुरहं राजर्षीणामहं मनुः ॥ देवर्षीणां नारदोहं हविर्धान्यस्मि धेनुषु ॥ १४ ॥ सिद्धेश्वराणां कपि
लः सुपर्णोहं पतत्रिणाम् ॥ प्रजापतीनां दक्षोहं पितॄणामहमर्यमा ॥ १५ ॥ मां विद्धि दैत्यानां प्रह्लादः
मसुरेश्वरम् ॥ सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां ॥ १६ ॥ ऐरावतं गजेंद्राणां यादसां वरुणं प्रभुम् ॥
तपतां द्युमतां सूर्यं मनुष्याणां च भूपतिं ॥ १७ ॥ उच्चैःश्रवास्तुरंगाणां धातूनामस्मि कांचनं ॥ यमः सं
यमतां चाहं सर्पाणामस्मि वासुकिः ॥ १८ ॥ नागेंद्राणामनंतोहं मृगेंद्रः शृंगिदंष्ट्रिणां ॥ आश्रमाणा
महं तुर्यो वर्णानां प्रथमो नृप ॥ १९ ॥ तीर्थानां स्रोतसां गंगा समुद्रः सरसामहं ॥ आयुधानां धनुरहं
त्रिपुरघ्नो धनुष्मतां ॥ २० ॥ स्थिराणामस्म्यहं मेरुर्गहनानां हिमालयः ॥ वनस्पतीनामश्वत्थ ओषधीना
महं यवः ॥ २१ ॥ पुरोधसां वसिष्ठोहं ब्रह्मिष्ठानां बृहस्पतिः ॥ स्कंदोहं सर्वसेनान्यामग्रण्यां भगवानजः ॥
२२ ॥ यज्ञानां ब्रह्मयज्ञोहं व्रतानामविहिंसनं ॥ वाय्वग्न्यर्कांबुवागात्मा शुचीनामप्यहं शुचिः ॥ २३ ॥ ॥

वासस्थानानां दुर्गमानाम् ॥ २१ ॥ ब्रह्मिष्ठानां वेदार्थनिष्ठानां ॥ सेनान्यां चमूपतीनां अग्रण्यां सन्मार्गप्र
वर्तकानां अजो ब्रह्मा ॥ २२ ॥ शुचीनां शोधकामपि मार्जनतक्षणवर्षणादीनां वाय्वादिरूपः शोधको
हम् ॥ २३ ॥ ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ ॥

योगानामष्टांगयोगानां मध्ये आत्मसंरोधः समाधिरहं ॥ मंत्रो नीतिः कौशलानां विवेकादीनां गुणानां मध्ये आ
न्वीक्षिकी ॥ आत्मनामात्मविवेकविद्या [illegible] आख्यातिः अन्यथाख्यातिः शून्यख्यातिः असत्ख्यातिरनिर्व
चनीयख्यातिवादिनां ॥ एवमिदमेवं चेति यो द्वंद्वो विकल्पः सो ऽहमित्यर्थः ॥ २४ ॥ कुमारः सनत्कुमारः ॥ २५ ॥
संन्यासो भूताभयदानं क्षेमाणामभयस्थानानां मध्ये ऽबहिर्मतिः अंतर्निष्ठा ॥ सूनृतं प्रियवचनं मौनं वचन ॥
हि प्रियभाषणे मौनेनैव पुरुषस्याभिप्रायो ज्ञायते ॥ अजः प्रजापतिः यस्य देहार्धाभ्यां मिथुनमभूत् ॥ स एवं
मिथुने ऽर्धो ह वा एष आत्मनो यत्पत्नीति श्रुतेः ॥ २६ ॥ अनिमिषाम प्रमत्तानां मधुमाधवौ वसंत इत्यर्थः

योगानामात्मसंरोधो मंत्रो ऽस्मि विजिगीषतां ॥ आन्वीक्षिकी कौशलानां विकल्पः ख्यातिवादिनां ॥ २४ ॥
स्त्रीणां तु शतरूपाहं पुंसां स्वायंभुवो मनुः ॥ नारायणो मुनीनां च कुमारो ब्रह्मचारिणां ॥ २५ ॥ धर्माणा
मस्मि संन्यासः क्षेमाणामबहिर्मतिः ॥ गुह्यानां सूनृतं मौनं मिथुनानामजस्त्वहं ॥ २६ ॥ संवत्सरो
स्म्यनिमिषामृतूनां मधुमाधवौ ॥ मासानां मार्गशीर्षोहं नक्षत्राणां तथाभिजित् ॥ २७ ॥ अहं युगा
नां च कृतं धीराणां देवलो ऽसितः ॥ द्वैपायनो ऽस्मि व्यासानां कवीनां काव्य आत्मवान् ॥ २८ ॥ वासुदे
वो भगवतां त्वं तु भागवतेष्वहं ॥ किंपुरुषाणां हनुमान् विद्याध्राणां सुदर्शनः ॥ २९ ॥ रत्नानां पद्मरागो
स्मि पद्मकोशाः सुपेशसाम् ॥ कुशो ऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहम् ॥ ३० ॥

अभिजित् उत्तराषाढाचतुर्थः पादः तथा श्रवणप्रथमपादः तथा च श्रुतिः ॥ अभिजिन्नाम नक्षत्रं उपरिष्टाद
षाढानां अवस्तात् श्रवणस्येत्यादि ॥ २७ ॥ कृतं कृतयुगं देवलः असितः मुनीनां व्यासानां वेदविभागकर्तॄणां
कवीनां विदुषां काव्यः शुक्रः ॥ २८ ॥ भगवतां उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं ॥ वेत्ति विद्यामविद्यां च स
वाच्यो भगवानिति एवं लक्षणानां ॥ २९ ॥ सुपेशसां सुंदराणां पेशलानां कोमलानां ॥ दर्भजातीनां काशदूर्वादी
नां हविःषु च पुरोडाशादिषु हुतेषु च ॥ ॥ ३० ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री. भा. ए. टी. ७९ लक्ष्मीः धनादिसंपत् ॥ ३१ ॥ बलवतां ओजश्च सहश्च सात्वतां भागवतानां भक्त्या कृतं कर्माहमित्यर्थः ॥ तेषामेव नवव्यू
हानां ॥ वासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माण इति याः नवमूर्तयः तासां
मध्ये वासुदेवाख्या ॥ ३२ ॥ गंधर्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः गंधमात्रं भुवि कृते ॥ ३३ ॥ परमः मधुरः प
राख्यः स्वादुः ॥ ३४ ॥ अर्जुनः पार्थः ॥ भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः ॥ ३५ ॥ गत्यादयः पंच कर्मेंद्रियव्यापा
राः स्पर्शादयो ज्ञानेंद्रियव्यापाराः ॥ तत्र लक्षणं दर्शनं सर्वेंद्रियाणामिंद्रियं तत्तत्स्वरूपेण ग्रहणशक्तिरूपमहं ३९
न दैवं तत्र तत्र निर्धारणेन तत्तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति ॥ पृथि

व्यवसायिनामहं लक्ष्मीः कितवानां छलग्रहः ॥ तितिक्षास्मि तितिक्षूणां सत्त्वं सत्त्ववतामहं ॥ ३१ ॥ ओजः
सहो बलवतां कर्माहं विद्धि सात्वतां ॥ सात्वतां नवमूर्तीनामादिमूर्तिरहं परा ॥ ३२ ॥ विश्वावसुः पूर्वचि
त्तिर्गंधर्वाप्सरसामहं ॥ भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ॥ ३३ ॥ अपां रसश्च परमस्तेजिष्ठानां वि
भावसुः ॥ प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः ३४ ब्रह्मण्यानां बलिरहं वीराणामहमर्जुनः
भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ॥ ३५ ॥ गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणं ॥ आस्वा
दश्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियम् ॥ ३६ ॥ पृथिवी वायुराकाशमापो ज्योतिरहं महान् ॥ विकारः पुरु
॥ षोऽव्यक्तं रजः सत्त्वं तमः परम् ॥ ३७ ॥ अहमेतत्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ॥ ३७ ॥

वीति सार्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि ॥ अहमहंकारः महान्महत्तत्त्वं एताः सप्त प्रकृति
विकृतयः ॥ विकारः पंच महाभूतानि एकादशेंद्रियाणि चेत्येवं षोडशसंख्याकः ॥ पुरुषो जीवः ॥ अव्यक्तं प्रकृतिः
एवं पंचविंशतितत्त्वानि तदुक्तम् ॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ॥ षोडशकश्च विका श्र ३
रो न प्रकृतिर्न विकृतिः पुरुषः ॥ रजः सत्त्वं तम इति प्रकृतेर्गुणाश्च ॥ परं ब्रह्म च तदेतत्सर्वमहमेव ॥ किंच ए
तत्प्रसंख्यानं एतेषां परिगणनं एतेषां लक्षणतो ज्ञानं तत्फलं तत्त्वविनिश्चयश्च अहमेव ॥ ॥ ३७ ॥ ॥ ॥ ॥

राम. ७९

एतदेव संक्षिप्याह मयेति ॥ जीवेश्वररूपयोर्द्वयोर्हि विधाभावः ॥ यस्य गुणगुणिरूपः यस्य देहदेहवत्तद्रूपः स सर्वो
पि मया विना मद्व्यतिरेकेण नास्ति ॥ अहमेव सर्वमित्यर्थः ॥ ३८ ॥ ननु सामान्यतः किमेवं संक्षिप्य कथयसि पूर्व
वत् ॥ निर्धारणसंबंधाभ्यां विशेषतः सर्वाः कथयेति चेत्तत्राह ॥ संख्यानं पृथिव्यादिपरमाणूनां कालेन महता
न तु पि मयैव क्रियते हन्त्वाव त्वं शक्यते ॥ तथा मे विभूतीनां संख्यानं कर्तुं न शक्यते ॥ ऊत इत्यत आह ॥ सृजतो
ण्डानीति ॥ यदा मया सृज्यमानानां ब्रह्माण्डानामेव तावत्संख्या नास्ति ॥ तदा ऊत स्रष्टृतानां विभूतीनां संख्येत्यर्थः ॥

मयेश्वरेण जीवेन गुणेन गुणिना विना ॥ सर्वात्मनापि सर्वेण न भावो विद्यते क्वचित् ॥ ३८ ॥ संख्या
नं परमाणूनां कालेन क्रियते मया ॥ न तथा मे विभूतीनां सृजतोण्डानि कोटिशः ॥ ३९ ॥ तेजः श्रीः की
र्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः ॥ वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंशकः ॥ ४० ॥ एतास्ते कीर्तिताः
सर्वाः संक्षेपेण विभूतयः ॥ मनोविकारा एवैते यथा वाचाभिधीयते ॥ ४१ ॥ वाचं यच्छ मनो यच्छ प्राणान्
यच्छेन्द्रियाणि च आत्मानमात्मना यच्छ न भूयः कल्पसेध्वने ॥ ४२ ॥ ॥

३९ ॥ तथापि विशेषत एव सर्वाः संक्षेपतः ॥ कथयामीत्याह ॥ तेजः प्रभावः श्रीः संपत् ॥ सौभगं मनोनयनाह्लादक
त्वं भगः भाग्यं वीर्यं बलं अंशकः विभूतिः ॥ ४० ॥ एते च विभूतिभेदा मयि चित्तभावनाया कथिताः ॥ अतो नात्याती
वाभिनिवेशः कर्तव्यः इत्याह ॥ मनोविकारा एव न तु परमार्थतः ॥ यथा किंचित्खपुष्पादिवाचारम्भणेणाभिधीय
ते इति तद्वत् ॥ ४१ ॥ तस्माद्वागादीन्नियच्छ ॥ आत्मानं बुद्धिमात्मना सत्त्वसंपन्नया नयैव नियच्छ अध्वने संसारमा

गीता ॥२॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मत्परायणः मदाश्रय एव भूत्वा वागादीनि संगृह्णन् विमुच्यते तथैव मद्भावयुक्तया बुद्ध्या सर्वत्र मामेव पश्यन्

श्री भा० ए० टी० ११

असंयमनेऽप्रणीत चित्ते दोषमाह ॥ यस्त्विति ॥ असंयच्छन् न संयच्छति ॥ ४५ ॥ परिसमाप्यते कृतकृत्यो भवतीत्यर्थः ॥ ४६ ॥ इति श्रीएकादशेऽष्टादशः ॥ १८ ॥ ततः सप्रदर्शेएऐ स्वधर्मभक्तिलक्षणे ॥ हंसोक्तं धर्ममनादृत्य ब्रह्मचर्यादिग्रहस्थयोः ॥ कर्मादिविद्विसावना मित्यत्र भक्त्याकृतं कर्मेमोत्तसाधनं मद्विभूतिरिमुक्तं भक्तिसाधनत्वेच कर्मणं मयोदितेषु वाहितः स्वधर्मेषु ष्वित्यादिना तत्र तत्रोक्तं ॥ न च कर्मानुष्ठानात् ज्ञानं भक्तिर्दृश्यते तत्र एव च्छति ॥ यस्त्वयेति सप्तभिः ॥ पूर्वकल्पादौ वद्भक्तिलक्षणः तत्प्रापकस्तत्साधनमित्यर्थः ॥ वर्णाश्रमहीना

यो वै वाङ्मनसी सम्यगसंयच्छन् धिया यतिः ॥ तस्य व्रतं तपो दानं स्रवत्यामघटांबुवत् ॥ ४५ ॥
तस्माद्वचो मनः प्राणान्नियच्छेन्मत्परायणः ॥ मद्भक्तियुक्तया [illegible] बुद्ध्या ततः परिसमाप्यते ॥ ४६ ॥ इति श्रीभागवते एकादशे महाविभूतिर्नामेऽष्टादशोऽध्यायः ॥ १८ ॥ उद्धव उवाच ॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः ॥ वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि ॥ १ ॥ यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् ॥ स्वधर्मेणारविंदाक्ष तन्ममाख्यातुमर्हसि ॥ २ ॥ पुरा किल महाबाहो धर्मं परमकं प्रभो ॥ यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव ॥ ३ ॥ स इदानीं सुमहता कालेनामित्रकर्षण ॥ न प्रायो भविता मर्त्यलोके प्रागनुशासितः ॥ ४ ॥

नामपि द्विपदां नराणां ॥ १ ॥ यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण ॥ २ ॥ ननु संप्रदायादेव ज्ञायते किं पुनर्वर्णनेनेत्यत्राह ॥ पुरेति ॥ परमकं परमश्रासौ कं सुखं च तद्रूपं च तत् ॥ यो हंसरूपेणाथ मां पुत्रकं एवं न तद्योगमात्र जानीत मागतं यत्तेयुष्मद्धर्मं विवक्षये पृक्तवान् ॥ ३ ॥ प्रागनुशासितोऽपि न भविता न भविष्यति ॥ ४ ॥ श्रीरामायनमः ॥ राम ॥ ॥ राम

नभ्य यः हंसा...या तीत्यर्थः ५१

राम ७७

येवदंतिवाल्लणयेचकर्त्तारोमहांतोयेचपालयंतितदात्रियास्तेषांमध्येस्वधर्मस्य१

अत्रदेहेन्माहवक्तेतिद्वाभ्यां।।तेषुब्रह्मण्याःकलाःवेदाद्याः।।५।।६।।तत्तस्मात् नःअस्माकंमनुष्याणांमध्येय
स्ययथाविधीयते।।७।।धर्म्यःधर्मादनपेतःनैःश्रेयसकरः।।अतःमेमत्तःतंधर्मंनिबोध।।८।।तत्रादौमहद्रू
पासनालक्षणएवमुख्योधर्मआसीत्।।आचारलक्षणस्तुपश्चात्।।९ हंसःसर्वेवमनुष्यितोभक्तिहेतुरिति
वर्णंपितमाह।।आदाविति कल्पादौयत्कृतयुगंतस्मिन्।।तेचतदामामुपासतएवकेवलंनान्यत्कुर्वंतीति १

वक्ताकर्त्ताविताानान्योधर्मस्याच्युततेभुवि।।सभायामपिवैरिंच्यांयत्रमूर्त्तिधराःकलाः।।५।।क
र्त्राविवाप्रवक्त्राचभवतामधुसूदन।।त्यक्तेमहीतलेदेवविनष्टंकःप्रवक्ष्यति।।६।।तत्त्वंनःसर्वध
र्मज्ञधर्मस्त्वद्भक्तिलक्षणः।।यथायस्यविधीयेततथावर्णयमेप्रभो।।७।।श्रीशुकउवाच।।इत्थंस्वभृ
त्यमुख्येनपृष्टःसभगवान्हरिः।।प्रीतःक्षेमायमर्त्यानांधर्मानाहसनातनान्।।८।।श्रीभगवा
नुवाच।।धर्म्यएषतवप्रश्नोनैःश्रेयसकरोनृणां।।वर्णाश्रमाचारवतांतमुद्धवनिबोधमे।।९।।आ
दौकृतयुगेवर्णोनृणांहंसइतिस्मृतः।।कृतकृत्याःप्रजाजात्यातस्मात्कृतयुगंविदुः।।१०।।वेदः
प्रणवएवाग्रेधर्मोहंवृषरूपधृक्।।उपासतेतपोनिष्ठाहंसंमांमुक्तकिल्बिषाः।।११।। ।।

तिवक्ते कृतयुगनाममनिरुक्तिमाह।।कृतकृत्याइतिजात्याजन्मनैव।।१०।।किंचविपर्ययकाभावादपितदानीं
नान्यत्कर्मास्तीत्याह।।वेदइति।।धर्मस्त्वममेनोविषयःसोहमेववृषरूपधृक्।।वतद्ध्यानंनक्रियाविशेषोयः
तादिः।।अतस्तपोनिष्ठाः।।मनसश्चेंद्रियाणांचह्यैकाग्र्यंपरमंतप।इतिवचनादेकाग्रतयाहंसंशुद्धंमांध्या
यंतीत्यर्थः।।११।। ।।

श्री॰
भा॰ग॰
ए॰टी॰
७८

पश्चात्त्रेताप्रवेशे वैराजरूपस्य प्राणान्निमित्तान्हृदयाकाशात्तस्यास्त्रय्याः सकाशात्होत्राध्वर्यवौ
द्गात्रैः त्रिवृत् त्रिरूपः यज्ञो हं वै विस्फुरितिश्रुतेः ॥ ११ ॥ वर्णानामाश्रमाणां च धर्मान्वक्तुं तेषामुत्पत्तिमाह द्वाभ्या
विप्रेति ॥ आत्माचारः स्वधर्म एव लक्षणं ज्ञापको येषां ॥ १२ ॥ मम वैराजरूपस्य हृदः वक्षसो धस्तात् ॥ ब्रह्मच
र्यमिति नैष्ठिकाभिप्रायं ॥ १३ ॥ तेषामधिकारिविशेषणस्वभावानाह ॥ वर्णानामिति पंचभिः जन्मस्थाना

त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्रयी ॥ विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ॥ ११ ॥ वि
प्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः ॥ वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः ॥ १२ ॥ गृ
हाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ॥ वक्षःस्थलाद्वनेवासो न्यासः शीर्षणि संस्थितः ॥ १३ ॥
वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणीः ॥ आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमैः ॥ १४ ॥
शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवम् ॥ मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः ॥ १५ ॥ ते
जो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः ॥ स्थैर्यं ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः ॥ १६ ॥
आस्तिक्यं दाननिष्ठा च अदंभो विप्रसेवनं ॥ अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः ॥ १७ ॥ शु
श्रूषणं द्विजगवां देवानां चाप्यमायया ॥ तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः ॥ १८ ॥ अ
शौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः ॥ कामः क्रोधश्च तर्षश्च स भावोऽन्त्यावसायिनां ॥ १९ ॥
अहिंसा सत्यमस्तेयमकामक्रोधलोभता ॥ भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः ॥ २० ॥

नुसारिणीः ॥ नीचैरित्यस्यायमर्थः ॥ मंदाभिर्जन्मभूमिभिः मंदाः उत्तमाभिरुत्तमाश्चेति ॥ १४ ॥ तपआलोचनं १५॥
तेजः प्रतापः एतैरेवाश्रमस्वभावाश्चापि ज्ञेयाः ॥ १६ ॥ तद्बाह्यानां स्वभावानाह ॥ अशौचमिति ॥ शु
ष्कविग्रहः निर्मूलकलहः ॥ तर्षः तृष्णा ॥ १९ ॥ तत्र तावत्सर्वसाधारणं धर्ममाह ॥ अहिंसेति ॥ व
र्णाग्रहणामुपलक्षणार्थम् ॥ ॥ २० ॥ ॥ रामाय नमो नमः ॥ ॥

सम॰
७८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वर्णाश्रमधर्मान् गृहस्थप्रकारेण वक्ष्यति ॥ प्रथमं तावदाश्रमेषु ब्रह्मचारिणो धर्मा वर्ण्यन्ते ॥ स च द्विविधः उपकु
र्वाणो नैष्ठिकश्च तत्राद्यस्य धर्मानाह ॥ द्वितीयमिति नवभिः ॥ द्विजः त्रैवर्णिकः ॥ आनुपूर्व्यात् गर्भाधानादि
संस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्म प्राप्य आचार्येणाहूतो ब्रह्म वेदमधीयीत ॥ चकारात्तदर्थं च विचा
रयेच्च ॥ २० ॥ किं च मेखलादीन् ऊर्ध्वं धारयेत् ॥ अक्षः शाद्वलेन समाला ॥ कच्छभूलो जटिल ॥ अनभ्यङ्गादिना ज्ञात
जटा ॥ न धौतमधौतं दद्वासः ॥ अरक्तपीठः पर्यन्तं दन्तश्च वासश्च दद्वाससी ते न धौते नितान्नियम्यसः ॥ अधौ

द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः । वसन् गुरुकुले दान्तो ब्रह्माधीयीत चाहूतः ॥ २० ॥ मेख
लाजिनदण्डाक्ष ब्रह्मसूत्रकमण्डलून् ॥ जटिलोऽधौतदद्वासोऽरक्तपीठः कुशान्दधत् ॥ २१ ॥ स्नान
भोजनहोमेषु जपोच्चारे च वाग्यतः ॥ न छिन्द्यान्नखरोमाणि कक्षोपस्थगतान्यपि ॥ २२ ॥ रेतो नाव
किरेज्जातु ब्रह्मव्रतधरः स्वयं ॥ अवकीर्णेऽवगाह्याप्सु यतासुस्त्रिपदीं जपेत् ॥ २३ ॥ अग्न्यर्काचा
र्यगोविप्रगुरुवृद्धसुराञ्छुचिः ॥ समाहित उपासीत संध्ये च यतवाग्जपन् ॥ २४ ॥ आचार्यं मां वि
जानीयान्नावमन्येत कर्हिचित् ॥ न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः ॥ २५ ॥ सायं प्रातरुपा
नीय भैक्ष्यं तस्मै निवेदयेत् ॥ यच्चान्यदप्यनुज्ञातमुपभुञ्जीत संयतः ॥ २६ ॥ ॥

तद्वासाः ॥ स चासौ अरक्तपीठश्च न कौतुकादिना रक्तः पीठमासनं यस्य सः ॥ २१ ॥ जपश्च उच्चारश्च मलमूत्रपुरी
षोत्सर्गश्च जपोच्चारं तस्मिन् ॥ वाग्यतः मौनी भवेत् ॥ २२ ॥ रेत इन्द्रियं स्वेनोत्सृजेत् ॥ ब्रह्मव्रतधरः अगृहस्थः
स्वयमेव कथंचिदवकीर्णे अवगाह्य स्नात्वा ॥ यतासुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत् ॥ २३ ॥ संध्ये
द्वे यतवाक् जपन् उपासीत ॥ मध्याह्ने संध्याभिमित्तं मौनेनासीतेति द्विवचनं ॥ २४ ॥ अन्यदपि यत्स्वं प्राप्नो
तच्च निवेदयेत् ॥ तेनानुज्ञातं तत्संयतः सन् ॥ उपभुञ्जीत स्वयं ॥ २६ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ ए॰टी॰ ७९

यानशय्यासनस्थानैर्यानेन पृष्ठतो यानेन निहितमप्रमत्तया समीपशयनेन । विश्रान्तिपादसंवाहनादि
भिः समीपासनेन आसीनः कृताञ्जलिः । नियोगप्रतीक्षया नातिदूरे वस्थानेनेत्यर्थः ॥ २८ ॥ एवंभूतव्रत
माचारो यस्य सः ॥ २९ ॥ एवमुपकुर्वाणस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषयन्नाह । यदीति षड्भिः । अ
सौ ब्रह्मचारी यदि छन्दसां लोकं महर्लोकं ततो ब्रह्मलोकं चारोक्ष्यन् सन्नारोढुमिच्छतीत्यर्थः । यद्वा छन्
दसां लोकमिति ब्रह्मलोकविशेषणं पुनरस्तितया कलात्मकत्वात् । तर्हि बृहद्व्रतः सन् बृहद्व्रतं नैष्ठिकं ब्र

शुश्रूषमाण आचार्यं सदोपासीत नीचवत् । यानशय्यासनस्थानैर्नातिदूरे कृताञ्जलिः ॥ २८ ॥ ए
वंवृत्तो गुरुकुले वसेद्भोगविवर्जितः । विद्या समाप्यते यावद्बिभ्रद्व्रतमखण्डितम् ॥ २९ ॥ यद्यसौ छन्
दसां लोकमारोक्ष्यन्ब्रह्मविष्टपम् । गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः ॥ ३० ॥ अग्नौ गुरावा
त्मनि च सर्वभूतेषु मां परम् । अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः ॥ ३१ ॥ स्त्रीणां निरीक्षण
स्पर्शसंलापक्ष्वेलनादिकम् । प्राणिनो मिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत् ॥ ३२ ॥ शौचमाचम
नं स्नानं संध्योपासनमार्जवम् । तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनम् ॥ ३३ ॥ सर्वाश्रमप्रयु
क्तोऽयं नियमः कुलनन्दन । मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः ॥ ३४ ॥ एवं बृहद्व्रतधरो
ब्राह्मणोऽग्निरिव ज्वलन् । मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः ॥ ३५ ॥

तं यस्य सः । विन्यसेत् समर्पयेत् । अथिकं स्वाध्यायार्थमेव अधीनं निष्क्रियार्थं च ॥ ३० ॥ ब्रह्मवर्चः वेदाभ्यास
जं तेजः तद्वान् ॥ ३१ ॥ तस्यैव सवनस्य यतिसाधारणधर्मानाह । स्त्रीणामिति । निरीक्षणं भावगर्वं क्ष्वेल
नं परिहासः । एवमादिकं त्यजेत् । मिथुनीभूतानग्रतस्त्यजेत् न पश्येदित्यर्थः ॥ ३२ ॥ तस्यैव सर्वाश्र
मसाधारणधर्ममाह । शौचमिति द्वाभ्याम् ॥ निष्कामनैष्ठिकस्य तु मोक्षफलमाह । एवमिति । अमलः
निष्कामश्चेत् दग्धः कर्माशयोऽतः करणं यस्य तथाभूतः सन् मद्भक्तो भवति ॥ ३५ ॥ ॥ ॥

सर्वत्रैश्रोपास्तिं ब्रह्मचारिणः कर्तव्यत्वेनाह ॥ अग्नाविति ॥

ए॰स॰ ७९

उपकुर्वाणस्य समावर्तनप्रकारमाह ॥ अथेति ॥ अनंतरं द्वितीयमाश्रमं समाविवेक्षन् प्रवेष्टुमिच्छन् यथाय-
थावत् विचारितवेदार्थः स्नायात् ॥ अभ्यंगादिकं कृत्वा समावर्तेतेत्यर्थः ॥ २४ ॥ तस्याधिकारश्चतुर्थमाश्र-
मविकल्पसमुच्चयावाह ॥ गृहमिति ॥ सकामश्चेत् गृहं प्रविशेत् ॥ अतः कषायश्राद्धादिकामश्चेद्वनं प्रविशेत्
अनुद्धान्तः कषायः स च द्विजोत्तमः ॥ ब्राह्मणश्चेत्प्रव्रजेदित्यर्थः ॥ यद्वाश्रमादाश्रमान्तरं गच्छेत् ॥ अन्यथा अना-
श्रमी प्रतिलोमं चैव नाचरेत् इत्यर्थः ॥ आश्रमान्तरं इति वा च्छेदः ॥ तत्र भक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात् ॥ गृ-
विवाहनियमपूर्वकं वर्णाश्रमैः सह गृहस्थधर्मानाह ॥ गृहस्थेति सदृशीं सवर्णां अलुप्तस्मितां कुलतोलक्षणत

अथानंतरं समावेद्यान्यपूर्वाजितासितागमः ॥ गुरुवेदक्षिणां दत्वा स्नायात्पूर्वं तु मोदितः ॥ २५ ॥ गृहं वा
नैवोपविशेत्प्रव्रजेद्वा द्विजोत्तमः ॥ आश्रमादाश्रमं गच्छेन्नान्यथा मत्यवस्थितः ॥ २६ ॥ गृहस्थो सदृशीं
भार्यामुद्वहेदजुगुप्सितां ॥ यवीयसीं च वयसा यो सवर्णामनुक्रमात् ॥ २७ ॥ इज्याध्ययनदानानि सम-
वैश्यानां द्विजन्मनां ॥ प्रतिग्रहोध्यापनं च ब्राह्मणस्यैव याजनम् ॥ २८ ॥ प्रतिग्रहं मन्यमानस्तपस्तेजोप-
घ्नानुदम् ॥ अयाचितामेव जीवेत शिलैर्वा दोषदृक्कयोः ॥ २९ ॥ ब्राह्मणस्यैव देहोयं क्षुद्रकामाय नेष्यते
कृच्छ्रायतपसे चेह प्रेत्यानंतसुखाय च ॥ ३० ॥ ॥

अनिंदितां ॥ कामतस्तु पुनस्तस्याः समुद्वहेत् तां सवर्णामनु न स्यात् अनंतरं न चापि वर्णक्रमेणोद्वहेदित्यर्थः
निश्चावर्णान् पूर्वेणोद्वहेत् यथैका यथाक्रमं ॥ ब्राह्मणक्षत्रियविशां भार्याः स्वाः शूद्रजन्मनामिति स्मृतेः ॥ २७ ॥ इ-
ज्यादयः त्रैवर्णिकानामावश्यकधर्माः ॥ प्रतिग्रहादित्रयं तद्वृत्तिः सा च ब्राह्मणस्यैव ॥ २८ ॥ न चापि मुख्या-
मुख्येन माचाराणां वृत्तिमाह ॥ प्रतिग्रहमिति ॥ न योयाजनाध्यापनयोरपि कार्पण्यादिदोषप्रयत्न ॥ शि-
लैः स्वामिसयकैः दोषवर्जितैः कणिशैः ॥ २९ ॥ एवं वृत्तिकार्श्यं ब्राह्मणेन सोढव्यमित्याह ब्राह्मणस्येति ॥ पा-

शूद्रस्य भार्या शूद्रैव
सा च [illegible] स्वा च वि-
शः स्मृते ते चैव स्वा
राज्ञस्ताश्च स्वा चा-
ग्रजन्मनः इति मनुः
॥२॥

ञ्छवृत्तिर्नाम विपण्यादिपतितकणोपादानं तं शिलवृत्त्यैकीकृत्य तया तुष्टचित्तस्य मोक्षफलमाह
शिलोञ्छेति ॥ महान्तमातिथ्यादिलक्षणं ॥ विरजं निष्कामं सेवमानः गृह एव गृहस्थाश्रम एव ना
तिप्रसक्तः ॥ अतिशयेन विरागमकुर्वन् ॥ शांतिमुपैति मुक्त्यादिकारी भवति ४२ ॥ एवमधनस्य पुरु
षस्य महत्फलमुक्त्वा सधनस्याप्याह द्विभिः ॥ समुद्धरंति दारिद्र्यात् । उद्धारयन्ति विप्रमित्युपलक्षणं
मत्परायणं कमपि ॥४३॥ राजस्त्ववश्यकमेतदित्याह सर्वा इति ॥ सर्वेषामापद्वृत्तीराह । पण्यैर्विक्र

शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः ॥ मय्यर्पितात्मा गृह एव तिष्ठन्नाति
प्रसक्तः समुपैति शान्तिं ॥ समुद्धरंति ये विप्रं सीदन्तं मत्परायणम् । तानुद्धरिष्ये न चिरादाप
द्भ्यो नौरिवार्णवात् ॥४३॥ सर्वाः समुद्धरेद्राजा पितेव व्यसनात्प्रजाः । आत्मानमात्मना धीरो य
था गजपतिर्गजान् ॥४४॥ एवंविधो नरपतिर्विमानेनार्कवर्चसा ॥ विधूयेहाशुभं कृत्स्नमिन्द्रे
ण सह मोदते ॥४५॥ सीदन्विप्रो वणिग्वृत्त्या पण्यैरेवापदं तरेत् । खड्गेन वापदाक्रान्तो न श्व
वृत्त्या कथंचन ॥४६॥ वैश्यवृत्त्या तु राजन्यो जीवेन्मृगययापदि । चरेद्वा विप्ररूपेण न श्ववृत्त्या क
थंचन ॥४७॥ शूद्रवृत्तिं भजेद्वैश्यः शूद्रः कारुकटक्रियां कृच्छ्रान्मुक्तो न गर्ह्येण वृत्तिं लिप्सेत कर्मणा ४८

याद्यैः । न तु सुरालवणाद्यैः ॥ तत्राप्यापदाक्रान्तश्चेत् खड्गेन क्षत्रियवृत्त्या । यद्यपि गोतमोक्तं पापीयसी
वृत्तिर्मातिष्ठेत् वृत्तिसंकरेण तु खड्गधारणं पण्यविक्रयाच्छ्रेष्ठं मन्यते । तथापि हिंसा[illegible]तो वणिग्वृत्तिरे
व श्रेष्ठेति भगवतो मतं । न तु श्ववृत्त्या नीचसेवया ॥४६॥ तत्राप्यापदि मृगयया विप्ररूपेण वा अ
ध्यापनादिना ॥४७॥ कारवः प्रतिलोमजविशेषाः बुरुडादयः तेषां वृत्तिं कटादिक्रियां आपदुत्तीर्णो
स्तु नानुकल्पेन वर्तेतेत्याह ॥ कृच्छ्रादिति ॥४८॥ ॥

नीचोनामावैमवः २॥

तेनऋषीन् स्वधाकारेण पितॄन् स्वाहा
कारेण देवान्...

तदेवं द्विविधस्याशक्तापुनर्गृहस्थस्यावश्यकानि च यज्ञानाह वेदाध्ययनेन ब्रह्मयज्ञं ॥ तेन ऋषीन् स्वाहा
हाकारेण देवान् स्वधाकारेण पितॄन् बलिहरणेन भूतानि अन्नाद्येन नोदकादिभिर्मनुष्यानिति ज्ञातव्यं
यथोदयं विभवानुसारतः तेषु ईश्वरदृष्टिं विधत्ते महद्यानीति ॥ ४८ ॥ अथ शक्तं धर्ममुक्त्वा [illegible] शक्त्या
नुसारं स्वधर्ममाह यदृच्छयेति उद्यमं विना प्राप्तिं तेन वा शुक्लेनेति [illegible] स्वहस्त्याल्लब्धेन तथैनेन वा भृत्यानपोष्या
न् ॥ ५० ॥ गृहस्थस्यान्निष्ठां निष्ठामेवाह ॥ कुटुंबेष्विति द्विभिः ॥ न प्रमाद्येत ईश्वरनिष्ठायां प्रसन्नेन भवेत्
पि २

वेदाध्याय स्वधास्वाहा बल्यन्नाद्यैर्यथोदयं ॥ देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ॥ ४९ ॥
यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा ॥ धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ॥ ५० ॥ कुटुंबे
षु न सज्जेत न प्रमाद्येत्कुटुंब्यपि ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ ५१ ॥ पुत्रदाराप्तबंधू
नां संगमः पान्थसंगमः ॥ अनुदेहं वियन्त्येते स्वप्नो निद्रानुगो यथा ॥ ५२ ॥ इत्थं परिमृशन्मुक्तो गृ
हेष्वतिथिवद्वसन् ॥ न गृहैरनुबध्येत निर्ममो निरहंकृतः ॥ ५३ ॥ कर्मभिर्गृहमेधीयैरिष्ट्वा मामे
व भक्तिमान् ॥ तिष्ठेद्वनं वोपविशेत्प्रजावान्वा परिव्रजेत् ॥ ५४ ॥ यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणा
तुरः ॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ॥ ५५ ॥ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्म
जाः ॥ अनाथा मामृते दीनाः कथं जीवन्ति दुःखिताः ॥ ५६ ॥ ॥

ननु दृष्टादृष्टार्थकर्मासक्तस्य कथमप्रमादः ॥ विचारेणेत्याह ॥ विपश्चिदिति ॥ ५१ ॥ तत्रापि दृष्टेष्वासक्तेर
धिकत्वात्तेषां नश्वरतां प्रपंचयति पुत्रादीनामेकत्र संगमः ॥ पान्थानां प्रपायां संगम इव नश्वरः ॥ अनुदेहं प्रति
देहं यन्ति वि[illegible]यन्ति नश्यन्ति निद्रानुगः स्वप्नो निद्रापाये यथेति ॥ ५२ ॥ अतिथिवदुदासीनः ॥ ५३ ॥ अस्याप्याश्रमवि
कल्पमाह कर्मभिरिति गृह[illegible]याश्रमं [illegible] दोषमाह यस्त्विति बंधमेवाभिनयेन दर्शयति अहो इति बालाः आत्मजाः

अत्र गृहस्थाश्रमे मोक्षैः कर्मभिर्मामेव यजन्न वध्येत ।
यदि प्रजावान्स्याद्धि प्रव्रजेद्वा ॥ ५४ ॥ ।

न पुत्रदारादिषु प्रसक्तः
त्रिभिः बंधमेवाप्नोति न मोक्षं यएवंरूपः
कथितमूढताममतादि सहितः इति ताइशो न स्या

त्रादिष्वासक्तमतिः
न ॥ ५५ ॥

[illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भाग
एदी॰
८

गृहेष्वाश्रयो वा सनातनेन आसमंतः॥ तृतीयं स्वद्यं यस्य सः॥ अथ तेन मः॥ प्रीतिनाम मे स्योनि ॥४९॥ इत्येकादशे स
प्तदशः ॥१७॥ अष्टादशे वदद्धर्मं वनस्थयतिगोचरं ॥ अधिकारिविशेषेण विशेषं चापि नद्धृतं ॥ क्रमप्राप्तं व
नस्थधर्मानाह ॥ वनमिति आयुषस्तृतीयं भागं पंचसप्ततिवर्षपर्यंतं ततः परं तीव्रेंद्रियस्य षड्विंशागोपि सेन्या
साधिकः स्यादिति भावः ॥१॥ वसीत परिदधीत ॥२॥ दतः दंतान् न धावेत् न शोधयेत् ॥ त्रिकालं मज्जेत मु
लवत स्नायात् स्थंडिलेशयः ॥ भूमिशायी ॥३॥ ग्रीष्मे तपेत पंचाग्नीन् सूर्येण सह चतुर्दिशं अग्नीन् विधाय शिरः
एवं स्वहाशायाद्वितीयस्वद्यो मस्तकशीरपं ॥ अत्र प्रस्तानं तु थ्यापत्नस्तेथं विशनेतमः ॥५१॥ इत्येकाद
शे सप्तदशः ॥१७॥ श्रीभगवानुवाच ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा ॥ वन एव वसेच्छांत:
स्तृतीयं भागमायुषः ॥१॥ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत् ॥ वसीत वल्कलं वासस्तृणप:
र्णाजिनानि वा ॥२॥ केशरोमनखश्मश्रुमलानि बिभृयाद्दतः ॥ न धावेदप्सु मज्जेत त्रिकालं स्थंडिले
शयः ॥३॥ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वासारषाड्जले ॥ आकंठमग्नः शिशिर एवंवृत्तस्तपश्चरेत् ॥४॥
अग्निपक्वं समश्नीयात्कालपक्वमथापि वा ॥ उलूखलाश्मकुट्टो वा दंतोलूखल एव वा ॥५॥ स्वयं सं
चिनुयात्सर्वमात्मनो वृत्तिकारणं ॥ देशकालबलाभिज्ञो नाददीतान्यदाहृतं ॥६॥ वन्यैश्चरुपुरोडा
शैर्निर्वपेत्कालचोदितान् ॥ न तु श्रौतेन पशुना मां यजेत वनाश्रमी ॥७॥ अग्निहोत्रं च दर्शश्च पौर्णमा
सश्च पूर्ववत् ॥ चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः ॥८॥
सिंधं च मम मध्यंस्य हीत्वा तथा ग्रीष्मे च हृमोदनं वतुर्थं अग्निशुश्रूषणं त्वास्यां अभिमुखं पकपादेन दंडं हृस्वं दृष्टीत्वा तिष्ठे
दित्यर्थः ॥ आसारषाट् आसारं धारासंपातं सहत इति तथा ॥ अभ्रावकाशनामव्रतं चरेत् जले आकंठमग्नः उद
कवासनामव्रतं चरेत् ॥४॥ उलूखलेनाश्मना वा कुट्टयतीति स्वं उपली निवादं तावेव उलूखलं यस्य स तथा
॥५॥ संचिनुयात् ॥ अन्यदा कालांतरे नाददीत नाश्नीयादित्यर्थः ॥ लब्धे नवे नवे न्यायेषु राणं तु परित्यजेदिति वि
दोषः ॥६॥ कालेन चोदितान् आग्रयणादीन् ॥७॥ किंच अग्निहोत्रमिति निमुनेः मुनेः नैगमैर्वेदादिभिः ॥८॥ ॥

राम॰
८

आहरेत् २ आहृतं कालांतरे २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अस्यनिष्कामस्यफलमाह ॥ एवमितिधमनिभिः सिराभिः ॥ संततोव्याप्तः यावज्जीवंकृतेनतपसाऽथवंभए
वा ॥ अनेकवरणश्रद्धिभक्तिद्वासाद्वैवतावमुच्यते ॥ प्रतिबंधकवाहुल्येत्वनेनक्रमेणमुच्यतइति ॥ ९ ॥ सकाम
निंदति ॥ यस्त्वितिनिःश्रेयसंमोक्षफलंअल्पीयसेअल्पमेवआविरिंच्यान्नस्मै ॥ १० ॥ एवंयावज्जीवंवर्तमा
नस्यमोक्षः ॥ तृतीयभागावसानेपिमंदविरागोपिसंन्यासाधिकारः ॥ यदितुततोवागेवसम्यथमोसक्तो
भवेत् ॥ तदापिसम्यगविरक्तः विरक्तोवातदाविरक्तस्यकृत्यमाह ॥ यदेतिज्ञानोवेपथुः कंपादेहेयस्यसः ॥

एवंचीर्णेनतपसामुनिर्धूतमलस्ततः ॥ मांतपोमयमाराध्यऋषिलोकादुपैतिमां ॥ ९ ॥ यस्त्वे
तत्कृच्छ्रतश्चीर्णंतपोनिःश्रेयसंमहत् ॥ कामायाल्पीयसेयुंज्याद्वालिशःकोपरस्ततः ॥ १० ॥ य
दासौनियमेकल्पोजरयाजातवेपथुः ॥ आत्मन्यग्नीन्समारोप्यमच्चित्तोग्निंसमाविशेत् ॥ ११ ॥
यदाकर्मविपाकेषुलोकेषुनिरयात्मसु ॥ विरागोजायतेसम्यक्न्यस्ताग्निःप्रव्रजेत्ततः ॥ १२ ॥ इ
ष्ट्वायथोपदेशंमांदत्वासर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राणआवेश्यनिरपेक्षःपरिव्रजेत् ॥ १३ ॥ विप्र
स्यवैसंन्यसतोदेवादारादिरूपिणः ॥ विघ्नान्कुर्वंत्ययंह्यस्मानाक्रम्यसमियात्परं ॥ १४ ॥ बिभृया
च्चेन्मुनिर्वासःकौपीनाच्छादनंपरं ॥ त्यक्तंनदंडपात्राभ्यामन्यत्किंचिदनापदि ॥ १५ ॥

एवंविरक्तंप्रत्याह यदेति ॥ १२ ॥ तत्रादौकृत्यमाह ॥ यथोपदेशंश्रद्धापूर्वकंप्राजापत्येष्ट्यामामिष्ट्वास्वेश
णेआत्मनि ॥ १३ ॥ संन्यासेविघ्नाभवंतीतितान्नविगणय्यसंन्यसेदेवेत्याशयेनाह ॥ विप्रस्येति केनाभिप्राये
णाक्रम्येति ॥ तमाह अयमितिपरंपरंब्रह्म ॥ १४ ॥ एवंप्रव्रजितस्यधर्ममाह ॥ बिभृयाच्चेदिति परंकौपीनाद
च्छादनंवासोयदिधारयितुमिच्छति ॥ तर्हिकौपीनमाच्छाद्यतेयावतातावन्मात्रंधारयेदित्यर्थः ॥ त्यक्तंप्रैषोच्चा
रणात्पूर्वमेवअतोनान्यत्किंचिदपिनबिभृयात दंडपात्राभ्यामित्यावश्यकजलपात्रादेरुपलक्षणं ॥ १५ ॥

शुष्कमांसइत्यर्थः
ऋषिलोकान्महर्
लोकादिक्रमेण ।

लोकेषुभूरादिलोकपर्यं
तेषुनिरयात्मसुदुःख
दुःखोदर्केषुन्यस्ताग्नि
नइति॰ प्रतिलोमा
दिक्रमेलोकवलोक्यमा
नाः ॥

परमहंसस्य विधिनिषेधागोचरत्वात् ... कोनामग्रतः | नसाहसिको भवेत् ॥
त्वभगवतश्यमीतां ॥ २१ ॥

श्री
भा० ग०
पटी
८२

मनःपूतं मनसा सम्यक् विचार्य यच्छुद्धं तदाचरेत् ॥१६॥ मौनं वाचो दंडः अनीहा काम्यकर्मत्यागो दे-
हस्य प्राणायामश्चेतसः एते अलसत्वयादंडा यस्य न संति । अंग हे उद्धव अंगैर्धृतैर्वेणुभिर्वा ॥१७॥ चतुर्ष्विति
ब्राह्मणेष्वेव वह्निभेदेन चतुर्विधेषु पूर्वं पूर्वासंभवे वा विगर्ह्यानभिशस्तपतितादीन् । असंक्लृप्तानद्य अत्रायं
लाभो भविष्यतीति पूर्वमनुद्दिष्टान् ॥१८॥ बहिर्ग्रामात् पावितं प्रोक्षणादिभिः शोधितं विभज्य विष्णुब्रह्मा-
र्कभूतेभ्यः । अशेषमित्यधिकादरेण निरस्तं याचितमिति पात्रे मधुकरेण याचितमत्र चेत्तर्हि विभज्यशे-

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलं ॥ सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥१६॥ मौनानी-
हानिलायामा दंडा वाग्देहचेतसां ॥ नह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः ॥१७॥ भिक्षां चतुर्षु व-
र्णेषु विगर्ह्यान्वर्जयंश्चरेत् ॥ सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेन तावता ॥१८॥ बहिर्जलाशयं गत्वा
तत्रोपस्पृश्य वाग्यतः ॥ विभज्य पावितं शेषं भुंजीताशेषमाहृतं ॥१९॥ एकश्चरेन्महीमेतां निःसं-
गो नियतेंद्रियः ॥ आत्मक्रीड आत्मरत आत्मवान्समदर्शनः ॥२०॥ विविक्तक्षेमशरणो मद्भाव-
विमलाशयः ॥ आत्मानं चिंतयेदेकमभेदेन मया मुनिः ॥२१॥ अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञा-
ननिष्ठया ॥ बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः ॥२२॥ तस्मान्नियम्य षड्वर्गं मद्भावेन चरे-
न्मुनिः ॥ विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥२३॥

नीतं न तु याचितादिभैक्ष्यवत्तत्त्यज्यमित्यर्थः । माधुकरे तु नैवेद्यं भैक्ष्ये नान्येषु विद्यते । नैवेदिकं कल्पयेत्स्व-
द्विन्नं भौतिके बाह्यमिति स्मृतेः । यद्वा तदानीं कुत्रापि याचितं चेत् । तन्मध्ये तस्मै किंचिद्विभज्य दद्यादित्यर्थः ॥१९॥
किंच आत्मन्येव क्रीडा कौतुकं यस्य सः आत्मन्येव रतः संतुष्टः आत्मवान्धीरः ॥२०॥ विविक्तं विजनं क्षेमं निर्भ-
यं शरणं स्थानं यस्य सः मयि भावेन विमल आशयो यस्य सः ॥२१॥ बंधं मोक्षं च केन बंधः केन वा मोक्ष इति

रामः
८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुराणि हट्टादिमंति ग्रामास्तद्रहिताः ॥ व्रजाः गोष्ठानि तान् सार्थान्यात्रिकजनसमूहान् ॥२४॥ यतः शिल
वृत्त्याप्तेन उञ्छवृत्तिप्राप्तेन तदीयेनांधसान्नेन शुद्धसत्वः सत्वनिवृत्तमोहः संसिध्यति मुच्यते ॥२५॥ नत्वभि
क्षान्नं विहायकथं शिलान्ने प्रवृत्तिः स्यादत आह ॥ एतद्दृश्यमानं मिष्टान्नादि वस्तुतया न पश्येत् ॥ यतो वि
नश्यति ॥ अत इहामुत्र च लोके असक्तचित्तः सन् चिकीर्षितात् ईहाकृत्यादिरमेत ॥२६॥ ननु तथापि याव
द्विनाशोस्तु स्वदेहत्वाभिमानवतः कुतो विरागः स्यात्तत्राह ॥ यदेतदिति ॥ एतज्जगत् ममतास्पदं मनोवाक्प्रा
णैः संहितं संहितं अहंकारास्पदं शरीरं सर्वं तज्जन्यं स्वस्थः च आत्मनि मायामात्रमिति तर्केण स्वस्मादिहदृष्टे

पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रमवतीं महीम् ॥२४॥
वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ॥ संसिध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा ॥२५॥
नैतद्वस्तुतया पश्येद्दृश्यमानं विनश्यति ॥ असक्तचित्तो विरमेदिहामुत्रचिकीर्षितात् ॥२६॥
यदेतदात्मनि जगन्मनोवाक्प्राणसंहितं ॥ सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥२७॥
ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ॥ सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥२८॥ ॥

तेन त्यक्त्वा स्वस्थः आत्मनिष्ठः सन् पुनस्तत् न स्मरेत् न चिंतयेत् ॥ २७॥ एवं बहूदकादिधर्मानुक्त्वा परमहंस
धर्मानाह ॥ ज्ञाननिष्ठ इति ॥ बहिर्विरक्तो मुमुक्षुः सन् ॥ यो ज्ञाननिष्ठो वा मोक्षेप्यनासक्तो मद्भक्तो वा सलिंगा
न् त्रिदंडादिसहितान् ॥ आश्रमांस्तद्धर्मांस्त्यक्त्वा तदासक्तिं त्यक्त्वा यथोचितं धर्मं चरेदित्यर्थः ॥ न पुनर
स्य त्यागएव विवक्षितः ॥ पुनर्धर्मविधानात् ॥ अक्रियस्य अनर्थ्यापेयत्वमाणत्वाच्च नहि सर्वस्मात्को
विशेषस्तमाह ॥ अविधिगोचरः [illegible] विधिकिंकरो न स्यादिति एतदेव प्रकटीकरिष्यति ॥ शौ
चमाचमनं स्नानं न तु चोदनया चरेदित्यादिना ॥२८॥ तर्हि कथं चरेदित्यत आह ॥२८॥ ॥ ॥

साङ्क्षेर्दे प्राभि० २

ना२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री। भाग पटी। ८६

बुधः विवेकवानपि बालकवत् मानावमानविवेकशून्यः कुशलो निपुणोऽपि जडवत् फलानुसंधानाभा-
वेन विद्वानपि उन्मत्तवत् लोकरंजनाभावेन नैगमः वेदार्थनिष्ठोऽपि गोचर्यामनियताचारमेव चरेत् ॥ २९
वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः हैतुकः केवलतर्कनिष्ठः शुष्कवादे निःप्रयोजनगोष्ठ्यां वि-
वादस्तस्मिन् ॥ ३० ॥ अतिवादान् दुरुक्तानि ॥ ३१ ॥ आत्मदृष्ट्या तावद्वैरकारणं नास्तीत्युक्तं एक इति देह-
जनस्य देहमुद्दिश्य वैरं न कुर्यात् ॥

बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत् । वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् ॥ २९ ॥
वेदवादरतो न स्यान्न पाषंडी न हैतुकः । शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ॥ ३० ॥ नोद्वि-
जेत जनाद्धीरो जनं चोद्वेजयेन्न तु । अतिवादांस्तितिक्षेत नावमन्येत कंचन ॥ ३१ ॥ देहमुद्दिश्य प-
शुवद्वैरं कुर्यान्न केनचित् । एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥ ३२ ॥ यथेंदुरुदपा-
त्रेषु भूतान्येकात्मकानि च ॥ ३२ ॥ अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित् । लब्ध्वा न हृष्येद्धृ-
तिमानुभयं दैवतंत्रितं ॥ ३३ ॥ आहारार्थं समीहेत युक्तं तत्प्राणधारणं । तत्त्वं विमृश्यते तेन
तद्विज्ञाय विमुच्यते ॥ ३४ ॥ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं । तथा वासस्तथा शय्यां प्राप्तं
प्राप्तं भजेन्मुनिः ॥ ३५ ॥

दृष्ट्यापि नास्तीत्याह ॥ ३२ ॥ भूतानि च देहा अपि कारणरूपेणैकात्मकानि ॥ ३३ ॥ दैवतंत्रितं दैवाधीनं यतः ॥
अतो न दिं भिताप्रयत्नेनापि तत्राह ॥ आहारमात्रार्थमेव समीहेत यतस्तस्य तद्धि किं मिष्टान्नादिकमत्रा
द्यामेव केनैव युक्तमित्याह ॥ यदृच्छयेति ॥ ३५ ॥

ननु सर्वं दैवतंत्रितं जन्ममरणयोरपि दैवतंत्रितत्वात् ॥
राम।
८८

प्राणधारणं युक्तं सम्यक् कार्यं तेन प्राणधारणे
न तत्त्वं विचार्यते किं तेनापि तत्राह तद्विज्ञाये

निबु६॥२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यथाहमीश्वरो लीलया चरामि तथा ज्ञानी ज्ञाननिष्ठः । अनासक्तः कुर्यात् ॥ ननु विधिकिंकरत्वेन तस्य ज्ञा-
ननिष्ठाविरोधादित्यत आह ॥ ३६ ॥ ज्ञानतो विधिकिंकरत्वाभावः ॥ तस्य तत्राह नहि तस्य विकल्पाख्या भेदप्रती-
तिः ॥ न त्वस्ति सामस्त्येन या चासीत्सापि मद्वीक्षया ज्ञानेन हता ज्ञानं तु न हता पुनर्देहपातमानत्वात्तत्राह ॥ आ-
देहान्तात्क्वचित्कदाचिद्बाधितेव ख्यातिर्भवति ॥ ३७ ॥ तदेवं विरक्तस्यापरोक्षज्ञानवतः । संन्यासं तदुक्त्वा
परोक्षज्ञानकेवलवैराग्यवन्तं विविदिषुं प्रत्याह ॥ दुःखोदर्केष्विति नहि ज्ञानिनो मद्धर्मा मत्प्राप्तिसाधनं ये:

शौचमाचमनं स्नानं न तु चोदनया चरेत् ॥ अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वरः ॥ ३६ ॥
नहि तस्य विकल्पाख्या या च मद्वीक्षया हता ॥ आदेहान्तात्क्वचित्ख्यातिस्ततः संपद्यते मया ॥ ३७ ॥
दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् ॥ अजिज्ञासितमद्धर्मो गुरुं मुनिमुपव्रजेत् ॥ ३८ ॥
तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः ॥ यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥ ३९ ॥ यस्त्वसं-
यतषड्वर्गः प्रचण्डेन्द्रियसारथिः ॥ ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ॥ ४० ॥ सुरानात्मानमात्मस्थं
निह्नुते मां च धर्महा ॥ अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ॥ ४१ ॥ भिक्षोर्धर्मः शमोऽहिंसा तप ई-
क्षा वनौकसः ॥ गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ॥ ४२ ॥ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौ-
हृदं ॥ गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ॥ ४३ ॥ इति मां यः स्वधर्मेण भजन्नित्यमनन्यभाक् ॥
सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात् ॥ ४४ ॥ ॥

न समः ॥ ३८ ॥ मामेव मद्रूपमेव गुरुं परिचरेत् न ततः परं पक्षान्तरे दित्यादियमेव वर्तत इति भावः ॥ अनधिकारिणः ॥
संन्यासं निंदति यस्त्विति प्रचंडः अत्यासक्तः ॥ इंद्रियसारथिर्बुद्धिर्यस्य सः ॥ ४० ॥ सुरान्देवानात्मस्थं स्वात्मानं
चात्मस्थं मां च निह्नुते प्रतारयति निह्नवफलमाह अस्मादिति ॥ ४१ ॥ चतुर्णां प्रधानधर्मानाह ॥ ४२ ॥ अन्यान्यथा
कांश्चिद्दर्शयन्निर्दिशति शौचादिसाहित्येन सब्रह्मचर्यप्रकारमाह ऋतौ गंतुरिति ॥ ४३ ॥ एवंभूतवर्णाश्रमध

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ८४

ततः किमत आह भक्त्येति महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ जननमरणे यस्मात् ॥ अत
एव तत्कारणं मा मां व्रजत्येवं वनवासिने यत्यै ब्रह्मणो वेदस्य कारणमुपयाति साम्येन प्राप्नोति ॥४५॥
सर्वेषां वा सायुज्यपर्यवसानमाह इयेति ॥ एवंभूतेन स्वधर्मेण निर्णिक्तं शुद्धं सत्त्वं यस्य सः ॥ अत एव निर्ज्ञाता मम
गतिस्तत्त्वं येन ॥४६॥ उक्तमर्थं संक्षिप्याह एष एव ॥ आचारलक्षणः पितृलोकप्राप्तिफलः मद्भक्तियुतः
मदर्पणेन कृतः ॥ यत्र क्वापि श्रीकृष्णार्पणं कुर्यात् ॥४७॥ प्रकरणार्थमुपसंहरति ॥ एतत्तेऽभिहितं यथा भक्तो
भूतानां परं समियात् संप्राप्नुयात् ॥४८॥ इत्येकादशेऽष्टादशः ॥१८॥ ज्ञानादेर्निर्णयः पूर्वं कृतो यो ह्याश्रमस्थस

भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरम् ॥ सर्वोत्पत्त्यप्ययं ब्रह्मकारणं मोपयाति सः ॥४५॥
इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नो न चिरात्समुपैति मां ॥४६॥ वर्णा
श्रमवतां धर्म एष आचारलक्षणः ॥ स एव मद्भक्तियुतो निःश्रेयसकरः परः ॥४७॥ एतत्तेऽभिहि
तं साधो भवान्पृच्छति यच्च मां ॥ यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं ॥४८॥ इति श्रीभाग
वते एकादशस्कंधे अष्टादशोऽध्यायः ॥१८॥ श्रीभगवानुवाच ॥ यो विद्याश्रुतसंपन्न आत्म
वान्नानुमानिकः ॥ मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत् ॥१॥ ॥

तः ॥ एकोनविंशतितमे ज्ञानादेस्त्याग उच्यते ॥१॥ तदेवं तर्केणापि बोधितोऽपि देहादिप्रपंचो यावदपरोक्षा
नुभवेन दृश्यो हार्दादिषु न विलीयते तावत्तानाभ्यासः ततो मुक्तिरित्युक्तं ॥ आदेहा[illegible] नातः क्वचिन्नस्याति
तनः स[illegible] नेमयेत्यादिना यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायः तस्य न किंचित्कृत्यमस्तीत्याह यश्रुति
विद्याश्रुतभवः तस्यार्थं तेन युक्तेन संपन्नः ॥ अत एवा[illegible] त्मवान् प्राप्तात्मतत्त्वः ॥ नानुमानिकः केवलपरो
क्षज्ञानवान्न भवति ॥ अनकारणाविद्याक ॥ कृत्स्नं तर्केणोनिर्णीतार्थः ॥ स इदं हैतं तद्विद्यास्तत्साधनं
च मायामात्रमपि ज्ञात्वा ज्ञानं च तत्साधनं संन्यसेत् ॥ अयमेव विद्वत्संन्यासो नाम अग्रे हेतुमाह ज्ञा

घ३

रामः ८४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रवदेठमाह ज्ञानिनस्त्विति यस्मादहमेव तस्येष्टः॥ अयेत्ति तः स्वार्थः फलहेतुः तन्नः साधनं च संमतः स्वर्गः अभ्युदयः॥ अपवर्गः संसारनिवृत्तिश्च अतस्तस्य मदृते वान किंचिदस्तीत्यर्थः॥२॥ अत्र विद्वदनुभवं प्रमाणयति ज्ञानेति॥३॥ यस्योक्तं ज्ञानिनमभिनंदति स्तौति ज्ञानीति यतोसौ ज्ञानेन संधारयति॥३॥ तस्य ज्ञानेन स्तौति तप इति॥ अलमत्यर्थं ज्ञानस्य कलया लेशेन॥४॥ उपसंहरति ज्ञानेन सहितं तत्त्वं यथा भवति तथा ज्ञात्वा तत्संपन्नः स्यात॥ मामेव भज अन्यत्सर्वं त्यजेत्यर्थः॥५॥ तत्र सम्यग्यार्थं पूर्वेषामाह ज्ञानेति मामेव ते सिद्धिं प्राप्ताः॥६॥ तदेव ज्ञानं संक्षेपत उपदिशति त्वयीति त्रिविधात्मिकादि समाध्यात्मा परमा

धर्म्म

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः॥ स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः॥३॥ ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम॥ ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां॥४॥ तपस्तीर्थं जपो दानं पवित्राणीतराणि च॥ नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता॥५॥ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव॥ ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः॥६॥ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि॥ सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोगमन्॥७॥ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत॥ जन्मादयोस्य यदमी तव तस्य किं स्युराद्यंतयोर्यदसतोस्ति तन

र्थः यतयश्च स्मात॥ अंतरा मध्य एवापतति रज्जौ सर्पादिमालावत् नाद्यपवर्गयोः नत्वादावंते चास्ति अतः यद्यदा अस्य विकारस्यामी जन्मादयः तदा तस्य तवाधिष्ठानभूतस्य किं न किंचिदित्यर्थः॥ तस्यापि वस्तुतो न संभवतिं स्यासत्त्वादित्याह॥ यद्वा आद्यंतयोगिनो असतः सर्पादेः आद्यंतयोर्यदस्ति रज्ज्वादि तदेव मध्येन व सर्पादि तद्वद्दंव विकारो नास्तीत्याह॥ यद्वा आद्यंतयोर्यदस्ति तन्मध्ये प्यस्त्येवं न तस्य जन्मादयः॥ जननमरणादयो न संति अतस्त्वं निर्विकार एवासीति ज्ञानादेर्विशेषजिज्ञासुः पृच्छति ज्ञानमिति॥ १॥ ॥ ॥

विकारो देहादिः

श्री। भा। ए। टी। ८५

विशुद्धमेतज्ज्ञानं विपुलं निश्चितं यथा भवति तथा कथय येन महद्भिः ब्रह्मादिभिर्विमृग्यते ।८। महद्वि-
मृग्यत्वमभिनयेनाह तापत्रयेणाभिहतस्य अतः सन्तप्यमानस्य कस्यचित् त्वदङ्घ्रिद्वन्द्वमेवातपत्रमा-
तपात् सन्तापात् त्रायत इति तस्मात् न केवलमातपत्रं किन्तु अमृतमप्यभिवर्षतीत्युक्तं तस्मात् ।९। अ-
तिकृपालुत्वादप्याह दष्टमिति । अस्मिन् बिले संसारकूपे पतितं तत्रापि कालाहिना दष्टं एवमपि क्षुद्रसु-
खेषु ऊरुस्तर्षः तृष्णापिपासा यस्य तं दह्यमानः कथं समुद्धरणीय इति चेत्तत्राह आपवर्ग्यैः अपवर्गबोध-

उद्धव उवाच ॥ ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं । आख्याहि विश्वेश्वर विश्वमूर्ते
त्वद्भक्तियोगं च महद्विमृग्यं ।८। तापत्रयेणाभिहतस्य घोरे सन्तप्यमानस्य भवाध्वनीश । पश्यामि
नान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात् ।९। दष्टं जनं संपतितं बिलेऽस्मिन्कालाहिना क्षु-
द्रसुखोरुतर्षं । समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिञ्च महानुभाव ।१०। शुक उवाच । इति श्रो-
मद्भावुद्धेः (?) पुराणपुरुषाव्ययः । उद्धवं प्रत्युवाचेदं वचनं भूतभावनः ॥ ॥ श्रीभगवानुवाच । इत्थ-
मेतत्पुरा राजा भीष्मं धर्मभृतां वरं ॥ अजातशत्रुः पप्रच्छ सर्वेषां नोऽनुशृण्वतां ॥ निवृत्ते भारते युद्धे
सुहृन्निधनविह्वलः । श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ।१२। तानहं तेऽभिधास्यामि
देवव्रतमुखाच्छ्रुतान् । ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् ॥१४। नवैकादश पंच त्रीन्
भावान्भूतेषु येन वै । ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं ॥१५॥

कैः वाग्भिरासिञ्चेति ॥१०॥ तद्विद्यासाध्यं विद्वत्सभायां वक्ष्यामीत्याह ॥११॥१२॥१३॥ ज्ञानादिभिरुपबृंहितान्
तत्तल्लक्षितानि निमर्थः । तत्र ज्ञानं कथयन् नवेति प्रकृतिपुरुषमहदहङ्कारपञ्चतन्मात्राणि एकादशेन्द्रि-
याणि पञ्च महाभूतानि त्रयो गुणाः एतान्भावानष्टाविंशति तत्त्वानि भूतेषु ब्रह्मादिस्थावरान्तेषु का-
र्येष्वनुगतानि येन ज्ञानेन ईक्षेत अथ एष्वपि भावेषु एकं परमार्थतत्त्वमनुगतं येन ईक्षेत कार्यकारणात्म-
कं जगत्सृष्टेः पूर्वं कारणात्मकमेवेति तत् न ततः पृथगिति येन पश्येत् तज्ज्ञानमित्यर्थः ।१४। विज्ञानमा

॥ ११ ॥

रामः ८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विज्ञानमाद्वयमेतदेवेति ॥ श्लोकार्द्धेन यद्यदा येनैकेनानुगतानेकात्मकान् भावान्सर्वेमैक्षत तांस्तथैव पृ
र्थक्त्वेनैव किं च तदेकं परमकारणं ब्रह्मैव तदा एतदेव विज्ञानमुच्यते ॥ एतदुक्तं भवति परोक्षज्ञानेनैव परो
क्षभ्रमस्य दिग्भ्रोद्भ्रान्त्यादिष्विव निवृत्त्यभावात् ॥ तदात्मकं जगत्पश्यन्नप्यात्मनः पृथक्त्वादिति न मन्यते ॥ अपरो
क्षज्ञानेन बाधितमेवदग्धपटवज्जीवन्मुक्तः संसारशेषं पश्यति ततः परं न पश्यति च ॥ अतः परोक्षापरोक्ष
ज्ञानाभ्यां ज्ञानविज्ञानशब्दाभ्यामुच्येते इति एतेन सर्वकार्याणामनुगतं कार्याणां कारणात्पृथक्सत्त्वं च

एतदेव हि विज्ञानं न तथैकेन येन यत् ॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां ॥ १५ ॥
आद्यन्तवन्तेव मध्ये च सत्त्वात्स्यात्तद्यदन्वियात् ॥ पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् ॥ १६ ॥

स्यैक नस्युः

पयादयति सार्थे न तत्र यदि न कदाचिदनीदृशं जगदित्यादिमतेनैते षां भावानामुत्पत्त्यादयो नहि का र
णस्याभावादेकात्मना मिथ्यात्वं च न स्यात् ॥ अत स्ते षामुत्पत्त्यादीन्साधयति स्थितीति त्रिगुणात्मनां
सावयवानामित्यर्थः ॥ विमताभावा उत्पत्त्यादिमन्तः सावयवत्वात् ॥ घटादिवदिति पश्येदं तदाद्यन्त
वत्त्वं श्रुतेः परिणामान्तराय नौ च कारणत्वेन मध्ये चाश्रयत्वेन सत्त्वात् सत्त्वं कार्याणां तदंशप्रतियदन्वियात्
अनुगच्छेत्तत्प्रतिसंक्रामे तेषां प्रलये च यदवशिष्येत तदेव सदिति पश्येदित्यर्थः ॥ १६ ॥ ॥ ॥

१५ ॥ २

कार्यात्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इदेवत्वं मां वि ह्रीति एक एव हि भूतात्मा भूते भूते व्यवस्थितः इति पर्यायः २

श्री॰ भाग॰ एटी॰ ८८

वैराग्यमाह ॥ श्रुतिरिति द्वाभ्यां श्रुतिः नेह नानास्ति किंचनेत्यादि ॥ प्रत्यक्षं घटादिकार्यं तन्त्वादिव्यतिरेके
णान दृश्यते ॥ चैतन्यव्यतिरेकेण न किंचिद्दृश्यत इति ॥ ऐतिह्यं महाजनप्रसिद्धिः ॥ अनुमानं विमतं मि
थ्या दृश्यत्वात् ॥ शुक्तिरजतवत् ॥ इत्यादि एवं प्रमाणचतुष्टयं एतेष्वनवस्थानात् ॥ एतैर्बाधितत्वात् सर्व
वेसर्वानुगतं सत्यमात्मतत्त्वं पश्यन् विकल्पस्य मिथ्यात्वात्ततो विरज्यते विरक्तो भवतीत्यर्थः ॥ १७ ॥ नचवं
दोक्तस्वर्गादिसुखप्राप्त्या नैव विरज्यते इत्याह ॥ कर्मणामिति आविरिंच्यात् ॥ ब्रह्मलोकपर्यंतं अदृष्टमपि

श्रुतिः प्रत्यक्षमैतिह्यम् अनुमानं चतुष्टयं ॥ प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते ॥ १७ ॥ कर्म
णां परिणामित्वादाविरिंच्यादमंगलं ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ १८ ॥ भक्तियोगः पु
रैवोक्तः प्रीयमाणाय तेनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं ॥ १९ ॥ श्रद्धामृतकथायां मे
शश्वन्मदनुकीर्तनम् ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥ २० ॥ आदरः परिचर्यायां सर्वांगैर
भिवंदनं ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥ २१ ॥ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं ॥ मय्य
र्पणं च मनसः सर्वकामविवर्जनं ॥ २२ ॥ मदर्थेर्थपरित्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मद
र्थं यद्व्रतं तपः ॥ २३ ॥ ॥

सुखं च अमंगलं दुःखरूपं ॥ १८ ॥ नश्वरं च पश्येत् भक्तियोगस्य कारणमाह ॥ भक्तियोगः पूर्वमुक्त एव तथापि त
स्मिन्प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि ॥ १९ ॥ शश्वदिति सर्वत्रानुषज्यते मदनुकीर्तनं श्रवणानंत
रं मत्कथाख्यानमित्यर्थः ॥ २० ॥ अंगचेष्टा लौकिकी क्रिया वचसा लौकिके नापि मद्गुणानामीरणं क
थनं ॥ २२ ॥ मदर्थं मद्भजनार्थं तु हिरण्यादेर्थस्य परित्यागः भोगस्य तत्साधन चंदनादेः सुखस्य पुत्रोपलाल
नादेः ॥ इष्टादि वैदिकं यत्कर्म मदर्थं कृतं ॥ भक्तेः कारणमित्यर्थः ॥ २३ ॥ ॥

विवादास्पदं विश्वं २

सत्यज्ञानप्राप्तित्वा देसज्ज्ञानात् ४॥

राम॰ ८८

तदपि।

भक्तिः प्रेमलक्षणा संजायते । अस्य भक्तस्यान्यः कोर्थः साधनरूपः साध्यरूपो वावशिष्यते न कोपि स्वत
एव भक्तौ तत्सद्धेः ॥ तदेवाह ॥ किं बहुना चित्तमेवोत्तर्वविदि निष्टमर्थानर्थयोः कारणमित्याह यदा
त्मनीति द्वाभ्यां यदात्मनि परमेश्वरे चित्तमर्पितं तदा पुमान् धर्मादीन् प्राप्नोत्येव ॥ २५ ॥ एतदेव व्यतिरे
केणाह छयति ॥ यद्यदा चित्तं विकल्पे देहगेहादौ अर्पितं सत् परिधावति तदादिकं रजस्वलं असन्निष्ठं

एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां ॥ मयि संजायते भक्तिः कोन्योर्थोस्यावशिष्यते ॥ २४
यदात्मन्यर्पितं चित्तं शांतं सत्वोपबृंहितं धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥ २५ । यदर्पि
तं तद्विकल्पे इंद्रियैः परिधावति ॥ रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं ॥ २६ । धर्मो मद्भक्ति
कृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं । गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः । २७ । उद्धव उवाच
यमः कतिविधः प्रोक्तो नियमो वारिकर्षण ॥ कः शमः को दमः कृष्ण का तितिक्षा धृतिः प्रभो । २८
किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥ २९
पुंसः किं स्विद्बलं श्रीमद्भगो लाभश्च केशव । का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च । ३०
कः पंडितः कश्च मूर्खः कः पंथा उत्पथश्च कः ॥ कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं । ३१

न भवति तत्तस्य विपर्ययं धर्मादिकं विद्धि ॥ २६ ॥ स्वाभिप्रेतान् धर्मादीन् व्याचष्टे धर्मो मद्भक्तिकृत् यतः
स एव प्रोक्तः ऐकात्म्यं शास्त्रेषु ॥ २७ ॥ धर्मादीनां महाजनप्रसिद्धानामन्यथा व्याख्यानत्वाद्यमनियमादि
ष्वपि संख्याः स्वरूपतो वा किं चिद्वैलक्षण्यं स्यादिति संभावनया तद्विशेषजिज्ञासुः पृच्छति यम इति
पंचभिः ॥ २८ ॥ ऋतं सम्यग्भाषितं धनं च किं ॥ २९ ॥ परेति विद्यादीनां विशेषणं ॥ ३० ॥ ॥

माद्दि ३

कं

श्री॰ भा॰ ११ टी॰ ८१

प्रश्नान् पृष्टान् अर्थान् विपरीतान् अशमादीन् ॥ ३२ ॥ यमनियमानाह अहिंसेति त्रिभिः अस्तेयं मनसापि
परस्वाग्रहणं आस्ति धर्मे विश्वासः ॥ ३३ ॥ शौचं बाह्यमाभ्यंतरं चेति द्वयं अतो द्वादश नियमाः अहिंसाद्या यमा
दश ॥ ३४ ॥ उभयोः श्लोकयोः ये स्मृताः ते यमा नियमाश्च यद्वा उभयोः प्रवृत्तनिवृत्तयोः मुमुक्षोर्यमाः मुख्याः
सकामस्य नियमा मुख्याः स्मृता इत्यर्थः ॥ अत्र हेतुमाह दुहंतीति यस्मात् ॥ उपासिताः सेविताः संतः पुंसां निवृत्तानां
प्रवृत्तानां च यथाकामं कामानुसारेण मोक्षमभ्युदयं च दुहंतीति ॥ ३५ ॥ मुमुक्षोरुपादेयान् शमादीन् हेयां

कआढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥ ३२ ॥ श्री
भगवानुवाच ॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्ष
माभयं ॥ ३३ ॥ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं
एते यमाः सनियमा उभयोर्द्वादश स्मृताः ॥ पुंसामुपासितास्तात यथाकामं दुहंति हि ॥ ३५ ॥
शमो मन्निष्ठता बुद्धेर्दम इंद्रियसंयमः ॥ तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ॥ ३६ ॥ दं
डन्यासः परं दानं कामत्यागस्तपः स्मृतं ॥ स्वभावविजयः शौर्यं सत्यं च समदर्शनं ॥ ३७ ॥ ॥

श्चदुःखादीन् महाजनप्रसिद्धेभ्यो विलक्षणानाह शम इत्यादिना यावत्समाप्तिः ॥ एतेनैव तद्विपरीता
अशमादयोऽप्यूह्याः ॥ शमो मन्निष्ठता बुद्धेः ॥ न तु शांतिमात्रं दम इंद्रियसंयमः ॥ न चौरादिदमनं तितिक्षा
विद्धि न तु दुःखस्य समर्षः सहनं न भारादेः ॥ जिह्वोपस्थजयो वेगधारणं धृतिः न तु उद्वेगमात्रं ॥ ३६ ॥ दंडो भू
तद्रोहः तस्य त्यागो दानं न धनार्पणं कामत्यागः भोगत्यागस्तपः ॥ न कृच्छ्रादि स्वभावो वासना तस्य जयः
प्रतिबंधः शौर्यं न विक्रांतिः समं ब्रह्म तस्य दर्शनं आलोचनं सत्यं न यथार्थभाषणमात्रं ॥ ३७ ॥ ॥

जयो २

रामः ८१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अन्यच्च ऋतं सूनृतं सत्या प्रिया च वाणी ॥ एवमृतसूनृतयोः स्फुट एव विवेकः क्रमप्राप्तं त्यागं व्याख्या
तुमादौ ततो भेदेन शौचमाचष्टे तस्यापि मलत्यागरूपत्वेन त्यागभेदप्रतीतेः कर्मस्वसंगमः अना
सक्तिः शौचं त्यागस्तु संन्यास इति तयोर्भेद इत्यर्थः ॥ ३७ ॥ नृणामिष्टं धनं धर्मः तप आदि साधारणः
भगवन्नमः परमेव यज्ञः मद्ध्यायतोऽनुष्ठेयः ॥ न क्रियाबुद्ध्येत्यर्थः ॥ यज्ञार्थं दानं दक्षिणा सा च ज्ञानो
पदेशः ॥ न हिरण्यादिदानं तेन हि यज्ञरूपो विष्णुः प्राप्यते तु देमनं बलं तच्च मनोदमनेन हि बलात्प्राणा

ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ॥ कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ॥ ३७ ॥
धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः ॥ दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलम् ॥ ३८ ॥ भ
गो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमा ॥ विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ॥ ३९ ॥

णायाम इति ॥ ३८ ॥ दयालोकप्रसिद्धैवाभिमता अधुना लाभं व्याविवक्षुः प्रथमं भगं ततो भेदेन व्या
चष्टे लोके तयोरभेदप्रसिद्धेः ॥ भगो भाग्यं तच्च म ऐश्वरो भावो मदीयमैश्वर्यादिषाड्गुण्यमित्यर्थः ॥
उत्तमो लाभस्तु मद्भक्तिः न पुत्रादिः विद्या चात्मनि प्रतीतस्य भेदस्य बाधः न ज्ञानमात्रं अकर्मसु जु
गुप्सा देयत्वदर्शनं ह्रीः न तु लज्जामात्रं ॥ ३९ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग प्र.टी. ८८

गुणाएवश्रीर्मंडनंनकिरीटादिः दुःखसुखयोरत्ययः अतिक्रमः । अननुसंधानंसुखंनभोगः विषय
भोगापेक्षैवदुःखंनाग्निदाहादि बंधमोक्षद्वयंवायोवेत्तिसपंडितः । नविद्वन्मात्रः ॥ ४१ ॥ अहंबुद्धिरित्युप
लक्षणंयोदेहगेहादिषु अहंममेत्यभिमानवान्सएव । इत्यर्थः मन्निगमः मांनितरांगमतिप्रापयति
योनिवृत्तिमार्गः सएवपंथाः सन्मार्गः । नकंटकादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः सउत्पथः कुमार्गः
नतुचौराद्याकुलः सत्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः ॥ ४२ ॥ तमसउन्नाहः उद्रेकः नरकः नतु

श्रीर्गुणानैरपेक्षाद्याः सुखंदुःखसुखात्ययः ॥ दुःखंकामसुखापेक्षापंडितोबंधमोक्षवित्
मूर्खोदेहाद्यहंबुद्धिः पंथामन्निगमःस्मृतः ॥ उत्पथश्चित्तविक्षेपःस्वर्गःसत्वगुणोदयः ॥ ४२
नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे ॥ गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४३
दरिद्रोयस्त्वसंतुष्टःकृपणोयोजितेंद्रियः ॥ गुणेष्वसक्तधीरीशोगुणसंगोविपर्ययः ४४ ॥

मित्रादिः गुरुरेवबंधुः नभ्रात्रादिः सचाहमेवयथाहंनगुरुः । एकएवपरोबंधुःविषमेसमुपस्थि
ते गुरुः सकलधर्मात्मायत्राकिंचनगोहरिः । इतिसाधनभोगायतनंगृहंचमानुष्यंमानुष्यरूपंशरी
रमेवनहर्म्यादि गुणैः संपन्नः आढ्यउच्यतेनधनी ॥ ४३ ॥ योवित्तेवित्तभक्तेषुवासंतुष्टः सदरिद्रः अ
जितेंद्रियः सकृपणः शोच्यः नदीनः विषयेष्वनासक्तधीर्यः सईशः स्वतंत्रः नराजादिः गुणसंगः गुणेषु
संगोयस्यसः विपर्ययः अनीशः पतत्स्वशमादिविपर्ययोपलक्षणार्थं ॥ ४४ ॥ उपसंहरति ॥ ४५ ॥ ॥

राम ८८

गुणदोषव्यवस्थार्थम धिकारिविभागः ४

उपसंहरति साधुमोक्षोपयोगितया एतत्सर्वं गुणदोषयोर्विवेनं दृष्टमिति तयोः संक्षेपतो लक्षण
माह ॥ किं बहुना वर्णितेन गुणदोषयोर्लक्षणमेतावदेव तदाह ॥ गुणदोषयोर्दृशिर्दर्शनं दोषः गुण
स्तु तदुभयदर्शनवर्जितः स्वभाव इति ॥ ४५ ॥ इति श्रीएकादशे एकोनविंशोऽध्यायः ॥ १९ ॥ विंशे योग
त्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं ॥ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जित इत्युक्तं ॥ तदाक्षिपन्निव
विधिश्चेति पंचभिः ॥ विधिश्च प्रतिषेधश्च ते ईश्वरस्य तव निगम आज्ञारूपो वेदः ॥ स च विधिप्रतिषेधा
नोवकर्मणां गुणं दोषं च पुण्यपापरूपमवेक्षते ॥ १ ॥ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्र

एतउद्धव ते प्रश्नाः सर्वे साधु निरूपिताः ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥ ४४ ॥
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥ ४५ ॥ इति श्रीभागवते एकादशे एकोनविंशः ॥
उद्धव उवाच ॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ॥ अवेक्षतेऽरविंदाक्ष गुणं दोषं च
कर्मणां ॥ १ ॥ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं ॥ द्रव्यदेशवयःकालान्स्वर्गं नर
कमेव च ॥ २ ॥

माणां विकल्पं भेदं च गुणदोषरूपमेव विवक्षते प्रतिलोमानुलोमजं गुणं दोषं च पुण्यपापरूपमेवे
क्ष ॥ ते प्रतिलोमजाः उत्तमवर्णासु स्त्रीषु वर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः ॥ अनुलोमजा
उत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णासु स्त्रीषु जाताः मूर्धावसिक्ताम्बष्ठादयः ॥ असत्संतस्तु विज्ञेयाः
प्रतिलोमानुलोमजा इति ॥ गुणदोषौ द्रव्यादीन् कर्मार्हत्वानर्हत्वाभ्यां स्वर्गं नरकं च तत्फलतया
गुणदोषरूपमेवावेक्षते ॥ एतच्चोत्तराध्याये प्रपंचयिष्यते ॥ २ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा दा
ग प
टी
८९

तथापि प्रस्तुते किमायातं ॥ अत आह गुणदोषइति गुणदोषदृष्टिर्दोष इति निराकृतत्वात् ॥ गुणदो
षभिदादृष्टिमंतरेण विना [illegible] निषेधविधिलक्षणं कर्मकांडं तव वचः कथं तव वचोन्तरेण नॄणां
निःश्रेयसं कथं स्यात् ॥ तत्रापि श्रोतव्य इत्यादि साधनविधेः ॥ नानुध्यायेद्बहून्शब्दान्वाचो विग्लापनं
हि तदित्यादि निषेधस्यावश्यकत्वादिति भावः ॥ यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्ष
णं तव वचो विनेति सामानाधिकरण्यमेवास्ति यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षण
मपि वचः ॥ कथं त्वत्तमस्यादिवाक्यव ॥ निःश्रेयसपरं स्यात् ॥ सर्वस्य वेदस्य तत्परत्वांगीकारादित्य

गुणदोषभिदादृष्टिमंतरेण वचस्तव ॥ निःश्रेयसं कथं नॄणां निषेधविधिलक्षणं ॥ ३ ॥
पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि ॥ ४ ॥ गुण
दोषभिदादृष्टिर्निगमात्ते न हि स्वतः ॥ निगमेनापवादश्च भिदाया इति ह भ्रमः ॥ ५ ॥

र्थः ॥ ३ ॥ ननु पितरो देवाश्च सर्वज्ञाः अतस्ते नो दृष्टा मनुष्येभ्यः ॥ कथयिष्यंतीत्यत आह ॥ पित्रादीनां सर्वेषां
नन्दलक्षणाक्षरूपो वेद एव तु श्रेयः श्रेष्ठं चक्षुः ॥ प्रमापकं क्व अनुपलब्धेऽर्थे मोक्षे स्वर्गादौ च तथा साध्यसा
धनयोः इदमस्य साध्यं इदमस्य साधनमित्यत्रापि तदेव गुणदोषदृष्ट्यभावे निःश्रेयसं न घटते ॥ ४ ॥ किं
च श्लाघ्यत्वेनैव विहितां भेददृष्टिं तस्मिन्नेव विषये शास्त्रं कथं निवर्तयेदित्यत आह ॥ ते निगमात् आम्नायरूपा त्वत् १
त् वेदादेव न हि स्वतः ॥ यस्मादर्थप्राप्तत्वेन निवर्तनं ॥ हस्तु ढंभ्रमो भवति ॥ तं निवर्तयेति शेषः ॥ ५ ॥ दास
८९

निगमेनैतस्य अपवाद इति श्रुत्वा ६१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सर्वेश्वरस्तेनैवेदः ॥ तथापितद्द्वारकत्वाज्ज्ञाननिष्ठत्वान्नविरोधइतिदर्शयितुंसंक्षेपतोविभागमेवकर्तव्यमाकर्ते
व्यलक्षणंविविच्यविषयाभेदेप्यधिकारिभेदेनाविरोधंवक्तुंप्रथमंयोगत्रयमाह योगाइति ॥ योगाभि
लषितोपायाः ब्रह्मकर्मदेवताकांडैः प्रोक्ताः कर्मचनिष्कामंश्रेयोविधित्सयामोक्षसाधनेच्छयाअन्यउ
पायोनास्तिनित्यकाम्यकर्मादिकंत्वावर्ततेपततितथाचोत्तराध्यायेस्फुटीकरिष्यतियपतानित्यादिना ॥ ६ ॥
तेष्वधिकारभेदमाह निर्विण्णानामितिद्वाभ्यां इहएषांमध्येकर्मसुनिर्विण्णानांदुःखबुद्ध्यातत्फलेषु

श्रीभगवानुवाच ॥ योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया ॥ ज्ञानंकर्मचभक्तिश्चनो
पायोन्योस्तिकुत्रचित् ॥ ६ ॥ निर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसु ॥ तेष्वनिर्विण्णचित्ता
नांकर्मयोगस्तुकामिनां ॥ ७ ॥ यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान् ॥ ननिर्विण्णोना
तिसक्तोभक्तियोगोस्यसिद्धिदः ॥ ८ ॥ तावत्कर्माणिकुर्वीतननिर्विद्येतयावता ॥ मत्कथाश्र
वणादौवाश्रद्धायावन्नजायते ॥ ९ ॥

विरक्तानामतएवतत्साधनकर्मन्यासिनांज्ञानयोगःसिद्धिदइत्युत्तरेणान्वयः ॥ अनिर्विण्णचित्तानांदुः
खबुद्धिशून्यानांअतःकामिनांतत्फलेष्वविरक्तानामित्यर्थः ॥ ७ ॥ यदृच्छयाकेनापिभाग्योदयेनमत्का
म्यकर्मस्वप्रवर्तमानस्यसर्वात्मनाविधिप्रतिषेधाधिकारइत्युत्तराध्यायेवक्ष्यतिनिष्कामकर्माधिका
रिणस्तुयथाशक्तिसर्वंज्ञानभक्तियोगाधिकारःप्रागेवतदधिकृतयेस्तुतत्र ः ताभ्यांसिद्धानांत्व
किंचिदिति ॥ ८ ॥ सावधिकंकर्मयोगमाह तावदितिनवभिः कर्माणिनित्यनैमित्तिकानियावतायावत्

तत्रैवनिष्कामकर्मणिश्रीवर्द्धमानस्य २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रीः
भाग
पटीः
९०

कर्मयोगिनो ज्ञानोक्तभूमिकारोहप्रकारमाह स्वधर्मस्थ इति अनाशीःकामः अफलकामः अयमत्र नि-
षिद्धं नरकपातहेतुरेव विहितानि कामाद्वा निषिद्धाचरणाद्वा अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकं
न याति अफलकामत्वात् स्वर्गमपि न याति ॥१०॥ किंच अस्मिंल्लोके अस्मिन्नेव शरीरे अनघः निषिद्धत्यागी
अतः शुचिः निर्हृतरागादिरेव मलः यदृच्छयेति केवलज्ञानादपि भक्तेर्दुर्लभत्वं द्योतयति ॥११॥ अनेन प्र-
कारेण ज्ञानभक्तिसाधनत्वान्नरदेहः श्लाघ्य इति स्वर्गिणोऽपीति निरयिण इति हृष्टो नत्वेनोक्तं ज्ञानभक्त्योर्न
दुभयं स्वर्गिनारकिशारीरं ॥१२॥ अतो न नरः स्वर्गतिं कांक्षेत नारकीमिति दृष्टान्तः यद्वा स्वर्गनरकसाधन

स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव ॥ न याति स्वर्गनरकौ यद्यन्यन्न समाचरेत् ॥१॥ अस्मिं-
ल्लोके वर्तमानः स्वधर्मस्थोऽनघः शुचिः ॥ ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ॥१॥ स्वर्गि-
णोऽप्येतमिच्छन्ति लोकं निरयिणस्तथा ॥ साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं ॥२॥ न नरः स्व-
र्गतिं कांक्षेत नारकीं वा विचक्षणः ॥ नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति ॥३॥ एतद्विद्वान्पुरा
मृत्योरभवाय घटेत सः ॥ अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं ॥४॥ छिद्यमानं यमैरेतैः कृत-
नीडं वनस्पतिं ॥ खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः ॥५॥ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भय-
वेपथुः ॥ मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति ॥६॥

कर्मणि नद्युपादि स्पष्टं ॥ अस्यातिश्रेष्ठत्वात् सुनरापि मनुष्यो भवेयमित्यपि न कांक्षेत यतो देहावेशात्प्र-
देहसङ्गात् स्वार्थं प्रति प्रमाद्यति अवधानशून्यो भवति ॥३॥ अपि च एतद्देहं साधकमिति विद्वान् तत्त्वार्थ-
सिद्धिदमपि मर्त्यं ज्ञात्वा अप्रमत्तः अनासक्तः सन् मृत्योः पूर्वं मोक्षाय घटेत यतेत यत्नं कुर्यात् ॥४॥
अप्रमत्तो मुक्तसंगः स्यादित्यत्र दृष्टान्तः छिद्यमानमिति यमैर्यमवद्विद्वेषैः पुरुषैः कृतनीडं यः
स्मिन्नं स्वकेतं स्वस्याश्रमं अलंपटः अनासक्तः ॥५॥ दार्ष्टान्तिकमाह अहोरात्रैश्छिद्यमानमायुर्बुद्ध्वा भये

[illegible] ॥१८॥

रामः
९०

एवमप्रयतमानं प्रमत्तं निंदति ॥ नरदेहमिति द्वाभ्यां ॥ नरदेहं प्लवं नावं प्राप्येत्यध्याहारः ॥ यो भवाब्धिं न तरेत्स आत्महा तत्र हेतवः आद्यं सर्वफलानां मूलं पुनस्तु पार्जितकर्मभिः ॥ सर्वे प्राप्तेऽपि किंच सुदुर्लभं उद्यमकोटिभिरप्यप्राप्यं सुलभं यदृच्छयालब्धत्वात् ॥ तं च सुकल्पं दृढतरं किंच गुरुर्मंत्रवादी संश्रितमात्र एव कर्णधारो येन तादृशं तथा मया च स्मृतमात्रेण श्रीकृष्णस्मरणमात्रेण अनुकूलमारुतेन प्रेरितं ॥१७॥ एवं तावदविरक्तस्य वैराग्यद्वारा ज्ञानमुक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं

नरदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं ॥ मयानुकूलेन नभस्वतेरितं पुमान्
भवाब्धिं न तरेत्स आत्महा ॥१७॥ यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः ॥ अभ्यासेनात्मनो
योगी धारयेदचलं मनः ॥१८॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं ॥ अतंद्रितोऽनुरोधेन
मार्गेणात्मवशं नयेत् ॥१९॥ मनोगतिं न विसृजेज्जितप्राणो जितेंद्रियः ॥ सत्वसंपन्नया बुद्ध्या
मन आत्मवशं नयेत् ॥२०॥

वर्जनीयं चाह ॥ सार्धैस्त्रिभिः ॥ यदा तु आरंभेषु कर्मसु निर्विण्णो दुःखदर्शनेनोद्विग्नः ॥ तत्फलेषु विरक्तः अतस्तदा संयतेंद्रियः ॥ सन् आत्मनोऽभ्यासेन आत्मविषयहर्निसं तस्य विस्तार्य अचलं यथा भवति तथा मनो धारयेत् ॥१८॥ तत्र प्रथममेवास्य तथा धारणासंभवात् ॥ तदभावानुसारेण वशीकरणमाह ॥ यर्हि आशु भ्राम्यत् परिभ्रमत् ॥ अनवस्थितं भवति ॥ तदनुरोधेन किंचिदपेक्षापूरणद्वारेण ॥१९॥ ननु तर्हि यथा पूर्वमेव स्यात्तत्राह ॥ मनोगतिं न विसृजेत् ॥ नोपेक्षेत ॥ किं त्वप्रमत्तः सन् आत्मवशं नयेत् ॥ आत्मानं लक्षयेत्

प्रात्मप्रात्कंन याति २

॥ ११ ॥ [illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अनुरोध्यमांसत्संग्रहमाह । एष अनुवृत्तिमार्गेणमनसः संग्रहः परमोयोगस्तत्साधनत्वात उपचारेण:
तु नियथा अदम्यस्य दमनीयस्य अर्वतः । अश्वस्य हृदयज्ञत्वंस्वाभिप्रायेणगतिमन्विछन अपेक्षमाणः
अश्वयथास्व: । अश्वमं किंचित्रइतिमनुवर्तनतद्रावरश्मिनातंधृत्वेवगछति । तत्वपेत्वनैतद्वदित्यर्थः
२१ । एवमीषद्गृहीतस्यमनसश्चलत्वंननैश्चल्योपायमाह । सांख्येनेतित्रिभिः सांख्येनतत्वविवेकेनसर्व
भावानांमहदादिदेहांतानामनुलोमतः प्रकृत्यादिक्रमेणभवंउत्पत्तिं पृथिव्यादिक्रमेणाप्ययंच अनुध्याय
न प्रसीदतितिनिश्चलंभवति ॥२२॥ नन्वपायसहस्रेणापिमनोविषयकारनांतन्मुंजति किंभूयोभूयउपदेशेन:
तिचिंतयन्नाह ॥ निर्विण्णस्येतिनन्वस्यागमापायिषुतेषुअवधिभूतात्मदर्शनात् तदविवेकात्यन्तसंसा

एषवैपरमोयोगोमनसः संग्रहः स्मृतः । हृदयज्ञत्वमन्विछन्दम्यस्येवार्वतोमुहुः ॥२१॥ सां
ख्येनसर्वभावानांप्रतिलोमानुलोमतः । भवाप्ययावनुध्यायेन्मनोयावत्प्रसीदति ॥२२॥ नि
र्विण्णस्यविरक्तस्यपुरुषस्योक्तवेदिनः मनस्त्यजतिदौरात्म्यंचिंतितस्यानुचिंतया ॥२३॥ यमा
दिभिर्योगपथैरान्वीक्षिक्याचविद्यया । ममार्चोपासनाभिर्वानान्यैर्योग्यंस्मरेन्मनः ॥२४॥ यदि
कुर्यात्प्रमादेनयोगीकर्मविगर्हितं ॥ योगेनैवदहेदंहोनान्यत्तत्रकदाचन ॥२५॥

रचके निर्विण्णस्य अतो विरक्तस्य उक्तवेदिनः गुरूपदिष्टार्थालोचकस्य ततो गुरूपदिष्टस्यैव चिंतितः
स्य पुनः । पुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति ॥२३॥ किंच यमादिभिर्योगमार्गैः आन्वीक्षिक्या
परार्थ्यतत्वशोधनेन ममार्चनध्यानादिभिर्वा वाशब्दहेतुनास्यपक्षस्यस्वातंत्र्यंदर्शयति । एतैरुपायैर्योग्यं
एवमात्मानं मनः स्मरेत नान्यैः अनात्मन ऊर्ध्यादिरित्यर्थः ॥२४॥ ननु नात्मैवेति कथं योगिभिः प्रमादात्
विकर्मप्राप्तौ पापापनुत्तये प्रायश्चित्तं कार्यमेवेत्यत्राह ॥ यदीति योगेन ज्ञानाभ्यासेनैव पतनस्थभक्त
स्यापि नामकीर्तनेन उपलक्षणार्थं नान्यत्कृच्छ्रादि ॥२५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नतुनित्यनैमित्तिकंकर्मसत्वशोधकत्वाद्गुणः॥ हिंसादिकंत्वशुद्धिहेतुत्वाद्दोषः॥ नत्वेतत्त्रिवर्तक
त्वात्॥ कृच्छ्रादिप्रायश्चित्तंगुणइतिविधिप्रतिषेधाभ्यामुक्तत्वात्प्रायश्चित्तंविनायोगेनैवकथंप्रा
पद्देत॥ तत्राह स्वेस्वेइतिसार्धेन॥ सएवगुणः॥ नेतरः तदुपपादयति॥ यस्माद्विधिनिषेधाभ्यामने
नगुणदोषविधानेनकर्मणांनियमःसंकोचःकृतः॥ कुतइत्यतआह॥ जात्याउत्पत्त्यैवाशुद्धानांप्रा
णिनांसंगानांत्याजनेच्छया॥ अयंभावः॥ पुरुषस्याशुद्धिर्वासनंप्रवृत्तेरेवन्यास्तिस्वाभाविकप्रवृत्तेःसे
वितस्यमलिनत्वात्॥ नचसहसासर्वतोनिवृत्तिःकर्तुंशक्यते॥ अतइदंनकर्तव्यमिदमेवकर्तव्यमि

स्वेस्वेधिकारेयानिष्ठासगुणःपरिकीर्तितः॥ कर्मणांजात्यशुद्धानामनेननियमःकृतः॥२६॥
गुणदोषविधानेनसंगानांत्याजनेच्छया॥ जातश्रद्धोमत्कथासुनिर्विण्णःसर्वकर्मसु॥ वेद
दुःखात्मकान्कामान्परित्यागेप्यनीश्वरः॥२७॥ ॥

त्येवंस्वाभाविकप्रवृत्तिसंकोचद्वारेणनिवृत्तिरेवक्रियतेयथावनप्रवृत्तिपरोवेदः॥ तद्योत्तराध्यायेक
दशमः॥ उत्त्यमेवद्धिकामेष्वित्यादिना॥ अतोयोगिनःस्वाभाविकप्रवृत्त्यभावान्नप्रायश्चित्तादिविधि
गोचरतेति॥२६॥ भक्त्यधिकारिणोभक्तियोगमाह॥ जातश्रद्धइतिनवभिः॥ मत्कथासुजातश्रद्धः अत
एवान्यकर्मसुउद्विग्नः॥ नतुतत्फलेषुविरक्तः॥ तदाहवेदइति॥ यद्यपिवेदतदपितत्परित्यागेअनीश्व
रःअशक्तः॥२७॥ ॥ ॥राम॥ ॥ ॥ ॥

श्री० भा० ग० टी० ५२

एवंभूतो यः स श्रद्धालुः ॥ भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततस्तदनंतरं मां प्रीत्या भजेत् ॥ वि
षयांस्तु सेवमानोपि तेषु प्रीतिं न कुर्यादित्याह ॥ गर्हयन्निति ॥ २७ ॥ कथं भजेत् किं वा ततो भवति तदा
ह प्रोक्तेनेति द्वाभ्यां ॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना तथा प्रोक्तेन ॥ मां असकृत्
भजतः ॥ हृदय्या हृदि कृताः कामा नश्यंति ॥ २८ ॥ हृदयमेव ग्रंथिः ॥ अहं करोमीत्यहंकारः ॥ तत ए
व कार्याश्च सर्वे संशयाः ॥ असंभावनादयः कर्माण्यनारब्धफलानि संसारे हेतुभूतानि ॥ २९ ॥ तदेवं व्यव

ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः ॥ जुषमाणश्च तान्कामान्दुःखोदर्कांश्च गर्हयन् ॥ २७
प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः ॥ कामा हृदय्या नश्यंति सर्वे मयि हृदि स्थिते ॥ २८
भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि मयि दृष्टेखिलात्मनि ॥ २९ ॥
तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः ॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥ ३० ॥
त यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥ ३१ ॥ सर्वं
मद्भक्तियोगेन मद्भक्तो लभतेंजसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ॥ ३२ ॥ ॥

स्थित्याधिकारत्रयमुक्तं तत्र भक्तेरन्यनिरपेक्षत्वादन्यस्य च तत्सापेक्षत्वाद्भक्तियोग एव श्रेष्ठ इत्युप
संहरति ॥ तस्मादिति त्रिभिः ॥ मदात्मनः मयि आत्मा चित्तं यस्य श्रेयः साधनम् ॥ ३० ॥ तदेवाह यत्क
र्मभिरित्यादि ॥ इतरैरपि तीर्थयात्राव्रतादिभिः ॥ श्रेयःसाधनैर्यत्प्राप्यं तत्सर्वं अंजसा
अनायासेनैव स्वर्गमपवर्गं मद्धाम वैकुंठं वा लभत एव ॥ ३२ ॥ ॥

राम० ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वांछितनास्तीत्युक्तं । यदि वांछति तत्र हेतुमाह ॥ न किंचिदिति धीराः धीमंतः । यतो मम एकांतिनः मय्येव
वशीनियुक्ता अतो मया दत्तमपि ॥ न गृह्णंति । किंतु कथं वा वांछंतीत्यर्थः ॥ अपुनर्भवं आत्यंतिकमपि कैव
ल्यं ॥ २४ ॥ तदुपपादयति ॥ नैरपेक्ष्यमेव परमुत्कृष्टं अनल्पकं महद्भिः श्रेयसं तत्फलं तत्साधनं च प्राहुः

न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ॥ २४ ॥ नैर
पेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ॥ २५ ॥

मे भक्तिर्निराशिषः ॥ प्रार्थ्या नास्त्यन्यस्य निरपेक्षस्य प्रार्थ्येनाकारणभूता · पेक्षया रहितं तस्य तु सो भवे ॥
त ॥ यद्वा मे निरपेक्षस्य या भक्तिः सा निराशिषो भवेदित्यर्थः ॥ २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री। भाग। एकी। ६५

अनेनच प्रकारेण सिद्धानां न गुणदोषा इति विरोधं परिहरन्नुपसंहरति ॥ न मय्येकान्तेति ॥ गुणदोषैर्विहितप्र
तिषिद्धैः समुद्भवो येषां ते गुणाः पुण्यपापादयः ॥ साधूनां निरस्तरागादीनां अतः समचित्तानां अत एव बुद्धेः
परमेश्वरं प्राप्तानां ॥ ३६ ॥ काम्यकर्मनिष्ठानां निर्दिष्टत्वेनानुक्तमार्गानुपसंहरति मे पथः ॥ मत्प्रा

न मय्येकान्तभक्तानां गुणदोषोद्भवा गुणाः साधूनां समचित्तानां बुद्धेः परमुपेयुषां ॥ ३६
एवमेतान्मयादिष्टाननुतिष्ठन्ति मे पथः ॥ क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ॥ ३७ ॥
इति श्रीभागवते दश स्कंधे भगवदुद्धवसंवादे विंशतितमोऽध्यायः ॥ २० ॥
एका

प्त्युपायान् ॥ ये अनुतिष्ठन्ति ते क्षेमं कालभयादिरहितं ॥ मम लोकं विंदंति ॥ यत्परमं ब्रह्म तत्त्वविद
रित्यन्वयः ॥
३७ ॥ इति श्री भावार्थदीपिकायां एकादशे विंशतितमोऽध्यायः ॥ २० ॥ ॥

राम। ६५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गोंजयतिस्वपदानंदःपरानंदैककेसरी॥यत्कृपालवलेशेनश्रीधरःसत्कृतिंकृती॥इदानींतामिमांव्याख्यास्यंतः
वृत्तांममसाद्दसे मयाद्धिस्वीयबोधायकृतमेतत्रसर्वतः॥२ एकविंशक्रियाज्ञानभक्तिषुनधिकारि
णां॥कामिनांद्रव्यदेशादिगुणदोषाःप्रपंचिताः॥३॥ तदेवंगुणदोषव्यवस्थार्थंयोगत्रयमुक्त्वेतत्रवज्ञानः
दो४ भक्तिसिद्धानांनकिंचिद्गुणदोषौसाधकानांतुप्रथमतोनित्यनैकर्मनिष्ठानांयथाशक्तिनित्यनैमित्तिकंक
र्मसत्वशोधकत्वाद्गुणस्तत्करणंनिषिद्धकरणंचतन्मलीमसकरणत्वाद्दोषः॥तन्निवर्तकत्वाच्चप्रायश्चि
दृ१

श्रीभगवानुवाच॥ यएतान्मत्पथोहित्वाभक्तिज्ञानक्रियात्मकान्॥क्षुद्रान्कामांश्चलैःप्राणै
र्जुषंतःसंसरंतिते॥१॥ ॥

करणं१
त्तँगुणः विशुद्धसत्वानांतुज्ञाननिष्ठानांज्ञानाभ्यासएवसिद्धिहेतुत्वाद्गुणः भक्तिनिष्ठानांपुनःश्रवण
कीर्तनादिभक्तिरेवगुणः॥तद्विरुद्धंसर्वमुभयेषांदोषइत्युक्तं॥ इदानींयेतुनसिद्धाःनसाधकाःकिंतुके
वलंकाम्यकर्मप्रधानाः॥तेषांसकलगुणदोषान्॥प्रपंचयिष्यन्॥आदौतानतिवहिर्मुखत्वान्निंदति॥य
एतानित्यर्थः॥ मद्रूक्षमार्गान्॥तुच्छान्॥चलैरस्थिरैःप्राणैःदेहवायुभिरिंद्रियैर्वाजुषंतः॥सेवमानाभ
वंतितेसंसरंति॥निखिलगुणदोषभक्तेननानायोनीःप्राप्नुवंतीत्यर्थः॥१॥॥

[illegible]दोद्वानू२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा ग
पटी॰
४४

ननु तैरेव कर्मभिः केचिद्गुणदोषभाजः ॥ केचिन्नेति ॥ कुतो वैषम्यं न ह्यग्निना केचिद्दह्यंते केचिन्नेति सं-
भवति ॥ तत्राह स्वे स्वे इति ॥ अधिकारभेदेन कल्पितौ गुणदोषौ न च निष्ठा विहितभावः ॥२॥ तत्रादौ शुद्ध्यशु-
द्धी इति ॥ विचिकित्सार्थं योग्यमयोग्यं चेति संदेहद्वारा स्वाभाविकप्रवृत्तिप्रतिबंधार्थमित्यर्थः ॥ तत्र
शुद्ध्यशुद्धी योग्यत्वायोग्यत्वे गुणदोषौ तन्निमित्तौ उपादेयत्वानुपादेयत्वे शुभाशुभौ तन्निमित्तावर्था-
नर्थौ ॥३॥ तत्र शुद्ध्यशुद्धी धर्मार्थं शुद्धेन धर्मः ॥ अशुद्धेनाधर्म इति ॥ गुणदोषौ व्यवहारादर्शनादुपादेयं
नान्यदिति ॥ शुभाशुभौ यात्रार्थं प्राणरक्षणं दोषत्वेप्यापत्सु शरीरनिर्वाहमात्रोपादानेन न पापं अधि-

स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः ॥२॥
शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु ॥ द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ॥३॥
धर्मार्थं व्यवहारार्थं यात्रार्थमिति चानघ ॥ दर्शितोऽयं मयाचारो धर्ममुद्वहतां धुरं ॥४॥ भू-
म्यंब्वग्न्यनिलाकाशा भूतानां पंच धातवः ॥ आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ॥५॥
वेदेन नामरूपाणि विषमाणि समेष्वपि ॥ धातुषूद्धव कल्प्यंते एतेषां स्वार्थसिद्धये ॥६॥

कोपादाने तु पापमिति मया मन्वादिरूपेण धर्मरूपं धुरं भारं कर्मजातं वहतामित्यर्थः ॥४॥ शुद्ध्यशुद्धीस्व-
पंचविध्यन् ॥ वेदोक्तेन तदभिनिवेशो माभूदिति ॥ समानेष्वपि वस्तुष्विति ॥ यदुक्तं तत्प्रपंचयति मी- तिभू २
तिद्विभिः ॥ भूतानां प्राणिनां धारयंतीति धातवः ॥ कारणानि शारीराणां शरीरारंभकाः देहिनः साम्यमुक्तं जी २
वतो व्याह ॥ आत्मसंयुता इति ॥५॥ धातुषु देहेषु नामरूपाणि वर्णाश्रमादीनि कल्प्यंते प्रयोजनमा-
ह एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा यमादि पुरुषार्थसिद्धये ॥६॥ ॥ ॥ ॥

राम
४४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नकेवलंदेहस्थैव अपितुदेशकालादिभावानामपि । आदिशब्देनानुपादेयानांफलनिमित्ताधिकारिणांग्र
हणांवस्तूनां उपादेयानांव्रीह्यादीनामपि ॥ मममयानियमार्थमित्यर्थः ॥ ७ ॥ एवंगुणदोषविषयंपरिशोध्य
तयोः शुद्ध्यशुद्धिसरलत्वात् । शुद्ध्यशुद्धीप्रपंचयति ॥ अकृष्णसार इत्यष्टभिः । देशानामध्येकृष्णसारहरिणवद्धि
तोऽशुचिः । तत्रापिअब्रह्मण्यः ब्राह्मणभक्तिशून्योऽत्यंतमशुचिः । कृष्णसारेपिकृष्णेनसरोगेनसारः श्रेष्ठः
सोपिअसौवीरः कीकटःसुवीरः सत्पुरुषः । तद्वान्सौवीरः कीकटोपिअशुचिः । तदुक्तंसर्वैगुणेनमोदेशांम

देशकालादिभावानांवस्तूनांममसत्तम ॥ गुणदोषौविधीयेतेनियमार्थंहिकर्मणाम् ॥ ७ ॥ अकृ
ष्णसारोदेशानामब्रह्मण्योऽशुचिर्भवेत् ॥ कृष्णसारोप्यसौवीरकीकटासंस्कृतेरिणम् ॥ कर्म
ण्योगुणवान्कालोद्रव्यतःस्वतएववा ॥ यतोनिवर्ततेकर्मसदोषोऽकर्मकःस्मृतः ॥ ८ ॥

स्यांतंयत्रलभ्यतइति ॥ तद्वर्जितोयःकीकटः ॥ मगधअंगवंगकलिंगादि । असंस्कृतःसंमार्जनादिशून्यः
द्धिरेकवत्कालोवाईरितं ॥ ऊषरंपकवद्भावः । तत्र अशुचिः । तदन्यःशुचिरित्यर्थोउक्तंभवति ॥ ८ ॥ कालस्यशु
द्ध्यशुद्धीदर्शयति ॥ कर्मण्यइतिद्रव्यतः । द्रव्यसंपन्यास्वतोवाएवंभूतादियः कर्मण्यः कर्माहः सर्वलक्ष
मित्कर्मणिगुणवान्यतः यस्मिन्द्रव्यलाभेनवाराहुविसंवादिनावाकर्मनिवर्तते । यस्मात्तत्कालोदः
शौचादिलक्षणो कर्मकः कर्माऽनर्हः स्वतःसर्वकलो दोषः । अशुद्धइत्यर्थः ॥ ९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग एकी ९५

वस्त्वशोहोपात्तानां द्रव्याणां शुद्ध्यशुद्धी दर्शयति ॥ द्रव्यस्येति चतुर्भिः द्रव्येण तोयादिना शुद्धिः मृज्जादि
नात्वशुद्धिः वचनेन शुद्धमशुद्धं वेति संदेहे शुद्धं तदेव । रूपेण ब्राह्मणवचनेन शुद्धिः विपरीतेनाशुद्धिः
संस्कारेण प्रोक्षणादिना पुष्पादेः शुद्धिः । अवघ्राणादिनात्वशुद्धिः । कालेन दशाहादिना नवोदकादेः शु
द्धिः कालेनैवोदकं यावत्तावन्यं तत्सद्य एव वदि ॥ अकाले दशरात्रे स्याज्जनतः शुद्धिर्विधीयते । पर्युषितत्वादे
रशुद्धिः । अल्पजलाशुपहतानां तटाकानां महत्वाल्पत्वाभ्यां शुद्ध्यशुद्धी ॥ १ ॥ शक्त्याशक्त्या स्वयोपरागादि
रतकात्रादेः शक्तानामतत्पशुद्धिः । अशक्तान् [illegible] बालवृद्धातुरान् प्रति शुद्धिः । बुद्ध्या पुत्रजन्मादेः

द्रव्यस्य शुद्ध्यशुद्धी च द्रव्येण वचनेन च । संस्कारेणाथ कालेन महत्वाल्पतयाथवा ॥ १ ॥ शक्त्या
शक्त्याथवा बुद्ध्या समृद्ध्या च यदात्मने । अघं कुर्वन्ति हि यथा देशावस्थानुसारतः ॥ ११ ॥

आत्मने

दशाहादिबुद्धिर्ज्ञानेन शुद्धिः । अज्ञाने नाशुद्धिः ॥ समृद्ध्या जीर्णमलवस्त्रादेः समृद्धं प्रति शुद्धिः । दरिद्रं प्र
ति शुद्धिः । तत्रापि विशेषमाह । यदिति पतेत यद्व्य वचनादयो द्रव्यशुद्धिहेतवः अघं कुर्वन्ति । तहि देशाव
स्थानुसारत एव यथावत्कुर्वन्ति न सर्वतः । तथा हि निर्भयप्रदेशे स्नानादिना शुद्धिं कुर्वन्ति । नतु चौराद्याक्रा
न्तप्रदेशे संदेहभयदेशे स्नानादिकं विनापि शुद्धिः । तथा रोगादिव्यतिरिक्त युवाद्यवस्थायामेव कुर्वन्ति
नत्वाल्परोगाद्यवस्थायामिति । तथा च स्मृतिः । देशकालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं । उपपत्तिमवस्थां
च ज्ञात्वा शौचं प्रकल्पयेदिति ॥ ॥ ॥

रामः ९५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धान्येति धान्यानां वायुनादाहरणं ग्नहच मसादीनां तोयाग्नितोम्नोदकैः अश्मनः कालेन मंत्रनां तोये नरसतैजसानां
अग्निना रथ्यादीनां यथायथं कालादिभिः शुद्धिः ॥२॥

द्रव्यादिभिर्द्रव्यशुद्धिरित्युक्तं ॥ तत्र वचनादि शुद्धिः पक्वरूपैव ॥ द्रव्यतस्तत्र शुद्धिर्वेदरूपेति तं प्रपंचयन्
निंदाकल्ललौकिकं गरहच मसादिकं च ॥ अस्थिगजदंतादिरसा तैलघृतादयः ॥ तैजसाः सुवर्णादयः तेषां
पार्थिवानां च रथ्याकर्दमचदेष्टकादीनां यथायथं कालादिभिः ॥ शुद्धिः तत्रापि कांकात्यजाद्युपघात
तारतम्येन देशकालाद्यवस्थाद्यनुसारेण च तैरन्यैश्च युतायुतैः मिलितैः केवलैश्च कालस्य अनर्थग्रहणं
युत त्वप्रदर्शनार्थं ॥२॥ अस्पृश्यस्पर्शे शुद्धिमुक्तालेपविषयेप्याह ॥ ॥ यत्नीवपात्रवस्त्रादि ॥ येनतः

धान्यवदार्वस्थितंतूनां रसतैजसचर्मणां ॥ कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः ॥२४॥
अमेध्यलिप्तस्य येन गंधलेपं व्यपोहति ॥ भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते ॥ य ॥ स्नानदा
नतपोवस्थावीर्यसंस्कारकर्मभिः ॥ मत्सरत्यागात्मनः शौचं शुद्धः कर्माचरेद्द्विजः ॥२५॥

तएणतावा मृद्वोदकादिना गंधं च लेपं च व्यपोहति त्यजति ॥ स्वगतं च मलं त्यक्त्वा प्रकृतिं स्वमेव रूपं भजते
तस्य तच्छौचं शोधकं ॥ यावता वन दानादिना व्यपोहति त्यजति ॥ तावत्प्रमाणं स्वरूपं न पवहृत्निनो वा तः
त्कर्तव्यमिष्यते ॥२३॥ एवं तावद्द्रव्यशुद्धिं कर्तृशुद्धिमाह स्नानेति ॥ अवस्था कौमारादि वीर्यं शक्तिः
संस्कारः उपनयनादिः कर्म संध्योपासनादि दीक्षालक्षणम् ॥ ॥ अग्रे द्वितीयपृष्ठे ॥ =

द्रव्याणां वायु नारः

हृक्का इदानीं २॥

त्मनः ... कारः कर्म ... स्नानादिभिर्यथायथं तत्कार्यानुसारिणी शुद्धिरियं च शुद्धिर्न व्यवहारार्था किं च

ति तत्क्रियेत्या ... नित्यजलं ... स्नानादिभिः ॥

CC-0 Panjab University Chandigarh. An eGangotri Vaidika Bharata Initiative

श्री॰ भाग॰ एटी॰ ९६

आत्मनः सांगं कामस्य कर्तुः। एतैस्त्वानादिभिः। यस्या यस्यं तत्कार्यो ऽस्मादिति शुद्धिः॥ इयं च शुद्धिर्न व्यव
हारार्थं। किं तु विहृतकर्मार्थं स्यादसृ शुद्धः इति द्विजस्य पत्न्यां शूद्रादिरपि॥ ७ मंत्रशुद्धिमाह॥ ९॥
सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः। कर्मशुद्धिमाह॥ ईश्वरार्पणं कर्मणः शुद्धिः॥ धर्मादिभिर
शुद्धस्य शुद्धो उपसंहरति॥ धर्मः इति। देशकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते॥ एते
षां यो विपर्ययः। सोऽधर्मस्तद्धेतुरित्यर्थः॥ अपि च गुणदोषविभागोऽनवास्तवस्त्र्याह। क्वचिदिति॥ ॥
आपदि प्रतिग्रहो गुणोऽन्यनापदि निषिद्धत्वाद्दोषः। परधर्मस्तु परस्य गुणोऽपि स्वस्य दोषः दोषोऽपि कुटुंब
त्यागादि विरक्तादेर्नदोषः। अपितु विधिवलेन गुणः। गुणदोषार्थनियमः एवं यो यं गुणदोषयोरेक

मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं॥ धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः॥ १५॥ क्वचिद्गु
णोऽपि दोषः स्याद्दोषोऽपि विधिना गुणः॥ गुणदोषार्थनियमस्तद्भिदामेव बाधते॥ १६ समा
नकर्माचरणं पतितानां न पातकम्॥ औत्पत्तिको गुणः संगो न शयानः पतत्यधः॥ १७॥ ॥

सिद्धे वास्तवे नियमो गुणदोषार्थो नियमः॥ नियामकं शास्त्रं तत्तयोर्भेदमेव बाधते॥ १६॥ दोषस्य क्वचि
द्दोषत्वाभावे गुणत्वे वोदाहरणं दर्शयति॥ समानस्य तस्यैव कर्मणः सुरापानादेराचरणं पतिता
नां पतनहेतुरपि नाम्या कर्मणा वा पतितानां पुनः। पातकं मथिकारत्वाशकेन भवति पूर्वमेव पतित
त्वाच। अतद्दोषस्यापि दोषतानास्तीत्यर्थः॥ तथा संगोऽपि यतेर्दोषः समदृष्टस्य सौत्पत्तिकः पूर्वस्वी
कृतो न दोषः। अपितु गुणः। स तो भार्यामुपेयादित्यादिविधानात्। उभयत्र दृष्टांतः। सर्वमेवाधः शय्या
नो न्यस्या न पतत्यधोऽपि॥ १७॥ एवं गुणदोषनियमविधी यतां प्रहर्त्तिसंकोचद्वारा निवृत्त्या वपि नान्यर्थेमि

यो२

राम॰ ९६

एवंगुणदोषनियमविधीनांप्रवृत्तिसंकोचवशान्निवृत्तावेवतात्पर्यमित्यभिप्रेत्याह॥यतोयतइति॥१८॥यथाश्रु
तप्रवृत्तिपरत्वंवेदस्यनिराकर्तुंप्रवृत्तिमार्गस्यानर्थहेतुतांदर्शयति॥विषयेष्वितिचतुर्भिः॥संगःआसक्तिःतत्र
तेषुविषयेषुयेनप्रतिहन्यतेकामस्तेनसह॥कामादेवकलिःकलहोविवादः॥१९॥दुर्विषहस्तीव्रस्तमःसंमो
हः॥तंक्रोधंचेतनाकार्याकार्यस्मृतिःद्रुतंशीघ्रं॥२०॥शून्यायकल्पतेअसत्तुल्योभवतीत्यर्थः॥स्वार्थविभ्रंशः
पुरुषार्थहानिःमूर्छितस्यमृतस्यच॥२१॥तदेवंप्रपंचयतिविषयेति॥व्यर्थंवृक्षजीविकया॥एवंयोजीवन्
नापरंप्रमात्मानंदेहादिकंचवेद॥

यतोयतोनिवर्तेतविमुच्येतततस्ततः॥एषधर्मोनृणांक्षेमःशोकमोहभयापहः॥१८॥विषयेषु
गुणाध्यासात्पुंसःसंगस्ततोभवेत्॥संगात्तत्रभवेत्कामःकामादेवकलिर्नृणां॥१९॥कलेर्दुर्विष
हःक्रोधस्तमस्तमनुवर्तते॥तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीद्रुतं॥२०॥तयाविरहितःसाधोजंतुः
शून्यायकल्पते॥ततोस्यस्वार्थविभ्रंशोमूर्छितस्यमृतस्यच॥२१॥विषयाभिनिवेशेननात्मानंवेद
नापरं॥वृक्षजीविकयाजीवन्व्यर्थंभस्त्रेवयःश्वसन्॥२२॥फलश्रुतिरियंनृणांनश्रेयोरोचनंपरं
श्रेयोविवक्षयाप्रोक्तंयथाभैषज्यरोचनम्॥२३॥

र्तते॥समूर्छिततुल्यः॥अतएवयोभस्त्रेवश्वसन्वर्ततेसमृततुल्यःअतःस्वार्थनाशइत्यर्थः॥२२॥ननुप्रवृत्ते
स्यस्वर्गादिफलश्रवणात्कुतःस्वार्थविभ्रंशस्तत्राहइयंफलश्रुतिर्नश्रेयःपरमपुरुषार्थपरानभवतीत्य २२
र्थः॥किंतुबहिर्मुखानांनृणांमोक्षविवक्षयाप्रवर्तनंफलैःकर्मसुरुच्युत्पादनमात्रंयथाभैषज्येऽौषधेरो
चनंरुच्युत्पादनंतद्वदित्यर्थः॥पिबनिंबंप्रदास्यामिखलुतेखंडलड्डुकान्पित्रैवमुक्तःपिबतिनफलंतावदेवतु

नं॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा॰ ए॰ टी॰ ८२

नेनुकर्मकांडेमोक्षस्यनामापिनश्रूयतेकुतएवंव्याख्यायतेयथाश्रुतंनस्याद्रनादित्याह ॥ उत्पत्त्यैवेत्याद्युत्प

त्त्यास्वभावतएव ॥ कामेषुपश्वादिषुप्राणेष्वायुरिंद्रियबलवीर्यादिषुस्वजनेषुपुत्रादिषुच अनर्थहेतुषुपरिणामेकृतो

पुत्रदुःखहेतुषु ॥२४॥ अतस्तान्स्वार्थंपरमपुरुषार्थमविदुषः अतोनतानप्रवृत्तीभूतान्वेदोयद्धाधयिष्यतितदेव

श्रेयइतिविश्वसितानित्यर्थः ॥ तानेवंभूतान्वृजिनाध्वनिकामवर्त्मनि ॥ देवादियोनिषुभ्राम्यतः ॥ ततःपुनः

तमःवृक्षादियोनिषुविशतः ॥ पशुकामइतिचकथंपुनस्तेष्वेवकामेषुस्वयंबुधोवेदोयुञ्ज्यात् ॥ प्रवर्तयेत् ॥

उत्पत्त्यैवहिकामेषुप्राणेषुस्वजनेषुच ॥ आसक्तमनसोमर्त्याआत्मनोनर्थहेतुषु ॥२४॥ तेतानवि

दुषःस्वार्थंभ्राम्यतोवृजिनाध्वनि ॥ कथंयुंज्यात्पुनस्तेषुतांस्तमोविशतोबुधः ॥२५॥ एवंव्यवसितं

केचिदविज्ञायकुबुद्धयः ॥ अग्निमुग्धा ॥ फलश्रुतिंकुसुमितांन ॥

वेदज्ञावदंतिहि ॥२६॥ कामिनःकृपणालुब्धाःपुष्पेषुफ ॥ ॥२७॥

लबुद्धयः ॥ अग्निमुग्धाधूमतांताःस्वंलोकंनविदंतिते ॥

कु२

तथासत्येनाप्तःस्यादितिभावः ॥२५॥ कथंतर्हिमीमांसकाःफलपरतांवदंतितत्राह ॥ एवमितिद्वाभ्यांएवंव्यवसि

तंवेदस्याभिप्रायंकुसुमितं ॥ अवांतरफलश्रवणेनरमणीयांपरमफलश्रुतिंवदंतिकुतस्तेबुद्धयपत्वाद

हितियस्मात्वेदज्ञानोममीमांसकाःतथानवदंतीति ॥२६॥ कुबुद्धितांप्रपंचयति ॥ कामिनइत्यष्टभिःकामिनः

कृपणाःततोलुब्धाःतृष्णाकुलाः ॥ अतःपुष्पेष्ववांतरफलेषुपरमफलबुद्धयः अतएवाग्निमुग्धाःअग्नि

साध्यकर्मभिर्विमोहिताःअलब्धविवेकाः ॥ ततश्चधूमतांतानांधूममार्गाणिययेषांतेस्वंलोकंआत्मतत्त्वंतथाचश्रु

तिःकश्चिद्विवाअस्माल्लोकात्प्रेत्यआत्मानंवेदअयमहमस्मीतिकश्चित्स्वंलोकंचप्रतिजानातीति ॥ अ

॥२॥ [illegible]

८२

क्रोसौन्वलोकः तस्मादहनेति || हृदिस्थमात्मानंमांस्वमन्नोलोकंनतुहृदिस्थमहंकारास्पदं || ज्ञानेनैवसः
त्यपवमात्मानंतंनजानंतीत्याह || यइदंयद्व्यतिरिक्तंजगन्नास्तिऊतः यतइदंजगज्जातंततोनजानंति
ह्रियस्मात्तउक्थंकर्मैवशास्त्रंशंसंकथनीयंपशुहिंसमस्मार्थनंवायेषांतेशसतः केवलंअसुतृपः प्राणत
र्पणपराः नीहारेणतमसः तेनव्याप्तानिचक्षूंषियेषांतेयथानविंदंतितमपिनजानंतितद्वत् || तथाचश्रुतिः ||
नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूव || नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंती
ति ||२८|| वेदतात्पर्यानाज्ञात्वात् || यजंतीत्याह || तेपरोक्षमस्फुटंमेमतमविज्ञायदेवादीन्यजंतइत्युत्तरेण

नतेमामंगजानंतिहृदिस्थंयइदंयतः || उक्थशस्त्राह्यसुतृपोयथानीहारचक्षुषः ||२८|| तेमे
मतमविज्ञायपरोक्षंविषयात्मकाः || [illegible] || हिंसायांय
दिरागःस्याद्यज्ञएवनचोदना || २९ [illegible] || हिंसाविहाराह्यालब्धैः
पशुभिःस्वसुखेच्छया || यजंतेदेवतायज्ञैःपितृभूतपतीन्खलाः ||३०||

९६

तेपु ||२९|| स्वमतमेवाह || हिंसायांमांसभक्षणार्थंवायदिरागःस्यात्तर्हियज्ञएवेत्यनभिज्ञातांतद्वारापरिसं
ख्यापनत्वावश्यकत्वेनचोदनेत्येवहर्यंवयद्यपिनित्यनैमित्तिकयोःकाम्यविशेषानुबंधोनास्तितथापिकः
र्मणापितृलोकमितिश्रुतेः || सामान्यतःपितृलोककामनास्त्येवअंतःकरणशुद्धिकामनावेतिभावः ||
ततुक्तंयत्कामस्यक्रियाकाचिद्विहदृश्यतेनेदकर्हिचित् || यद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टितमिति || अ
तत्वादेवहिंसयाविहारःक्रीडायेषांते ||३०|| ||

राम

श्री॰ भाग॰ ए॰टी॰ ५८

किंच यज्ञेनेति मंदबुद्धयस्त्वाह। स्वर्गोपममिति। अमुं परलोकं आशिषश्चास्मिंल्लोके संकल्प्य नहि निश्चि
त्य विघ्नबाहुल्यात्‌ स्वजंतिकर्म स्व विनियोजयंति यथा कश्चिद्वणिक्‌ उल्लंघ्य समुद्रादि लंघनेन वक्र्य
नानेन हृष्यामि इदं धनं स्वजतु भयभ्रष्टो भवति तद्वदित्यर्थः॥ ३०॥ अतो रजः सत्त्वतमोजुषः निष्ठास्ते रजः
सत्त्वतमोजुषः स्वानुरूपानिंद्रादीनेवोपासते न तु मां यद्यपींद्रादीनामपि मदंशत्वात्‌ मदुपासनमेव
तत्‌ तथापि यथावच्छैवोपासने भेददर्शित्वादित्यर्थः॥ हृदि संकल्प्य उक्तं तमेव संकल्पं दर्शयति इष्ट्वे
ति तस्य भोगस्यांते महाशालाः महागृहस्थाः॥ ३१॥ ततः किमित्यत आह एवमिति अतो मत्स्ववर्णनाभा

स्वर्गोपममम्॑ लोकमसंतेश्रवणप्रियं॥ आशिषो हृदि संकल्प्य त्यजंत्यर्थान्यथा वणिक्‌ ३१
रजः सत्त्वतमो निष्ठा रजः सत्त्वतमोजुषः उपासत इंद्रमुख्यान्देवादीन्न तथैव मां॥ ३२॥ इष्ट्वेह
देवता यज्ञैर्गत्वा रंस्यामहे दिवि॥ तस्यांत इह भूयास्म महाशाला महाकुलाः॥ ३३॥ एवं पुष्पि
तया वाचा व्याक्षिप्तमनसां नृणां। मानिनां चातिस्तब्धानां मद्वार्तापि न रोचते॥ ३४॥ वेदा ब्रह्मा
त्मविषयास्त्रिकांडविषया इमे॥ परोक्षवादा ऋषयः परोक्षं मम च प्रियं॥ ३५॥ ॥

वार्तामियं संसारविलोपं भवतीति भावः॥ ३४॥ तदेवं प्रवृत्तिपरत्वं निराकृत्य प्रकृतं निवृत्तिपरत्वमेवोपसंहर
ति वेदा इति कर्मब्रह्मदेवताकांडविषया इमे वेदाः ब्रह्मात्मविषयाः। ब्रह्मैवात्मा न संसारीतेत्यर्थः नत
स्य तत्त्वाप्रतीतौव फलश्रुतिरियं नृणां न श्रेयो रोचनं परं। श्रेयो विवक्षया भैषज्यरोचनमिव
कर्मैव कारणमनुस्मारयति परोक्षेति ऋषयो मंत्रा तद्द्रष्टारो वा किमिति यतः परोक्षमेव मम च प्रियं अ
यं भावः शुद्धांतःकरणैरेव तद्बोधयत्वं ना अन्यैरधिकारिभिः वृथा कर्मत्यागेन भ्रंशप्रसंगादिति॥ ३५॥ ॥

राम॰ ५८

तत्र२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नतुवेदत्ताअपिजैमिन्यादयः॥ किमितितथानवर्णयंति॥ मांविनातत्त्वतोवेदंकश्चिदर्थंवानकोपिवेदे
त्याशयेनाह॥ शब्दब्रह्मेतियावत्समाप्तिः॥ स्वरूपतोर्थतश्चदुर्विज्ञेयंतच्चसूक्ष्मंस्थूलंचेतिद्विविधंतत्रसू
त्मतावत्तस्यरूपतोपिदुर्ज्ञेयमित्याह॥ प्राणेंद्रियमनोमयंप्रथमंप्राणमयंपश्यंत्याख्यंततइंद्रियमयंम
ध्यमां स्ववाच्यव्यंजकत्वेनवागिंद्रियप्रधानत्वात्॥ किंचअनंतपारंसमष्टिप्राणादिमयस्यनिर्विशेषस्य
कालतोदेशतश्चापरिच्छेदात्॥ अर्थतोपिदुर्ज्ञेयत्वमाह गंभीरंनिम्नगाधं अतोदुर्विगाह्यमतिप्रवेशा

पराख्यंततोमनोमयं ३

स्वंत ८

शब्दब्रह्मसुदुर्बोधंप्राणेंद्रियमनोमयं॥ अनंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत्॥ ३५॥ ॥

नर्हं॥ तथाचश्रुतिः॥ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः॥ गुहायांत्रीणिनिहि
तानेंगयंतितुरीयंवाचोमनुष्यावदंतीति॥ अयमर्थः वाचः शब्दब्रह्मणः॥ परिमितानिगणितानिपश्यंते
नि तायतेपरनवसेभिरितिपदानिरूपाणिचत्वारितानिचत्वार्यपियेमनीषिणोमहांतः तेविदुर्नान्येयतो
गुहायांदेहमध्येत्रीणिनिहितानिनेंगयंति स्वरूपंनप्रकाशयंति॥ अतःकेवलंवाचः तुरीयंचतुर्थभागंवैख
रीरूपंमनुष्याः प्राणिनोवदंतितमपिवदंत्येवनतुतत्त्वतोजानंतीति॥ ३५॥॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नादरूपेण२ भि२ अधिष्ठिते१

श्री भाग वती ९९

तत्त्वमनीषिभिरेव तेय सूक्ष्मं रूपं परं दर्शयति मयेति मयानंतयोगोपबृंहितं अंतः स्यात्त्वेप्यपरिच्छेदं स्वे
ति अपि शारत्वेप्यविकारित्वमाह ॥ ब्रह्मणेति अविकृतस्यापि नियंतृत्वं द्योतयति ॥ अनंतशक्तिनेति भू
तेषु सर्वप्राणिषु घोषरूपेण लक्ष्यते मनीषिभिः ॥ अंतःसूक्ष्मत्वेन दर्शने दृष्टांतः विसेषूर्णेव विविक्ते
३६ ॥ ननो वै स्वयमात्याहूद्दत्सा वा वा ॥ उत्पत्तिप्रकारे सदृष्टांतमाह ॥ यथेति त्रिभिः हृदयात् ॥ सकाशात् मु
खात् द्वारात् उद्वमते बहिर्निष्कर्षयति दार्ष्टांतिके आकाशादिति प्राणस्तु उपाधिर्हि शब्दगर्भरूपः ॥ ३ ॥
प्रभुर्भगवाननंतरूपेण छंदोमयो वेदरूपस्तित्वममृतमयः घोषवान् ॥ नादोपादानवान् मनसा निमित्त ॥

रू७॥ केदर्शयति २॥

मयोपबृंहितं भूम्ना ब्रह्मणानंतशक्तिना ॥ भूतेषु नादरूपेण विसेषूर्णेव लक्ष्यते ॥ ३८ ॥ य
थोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् ॥ आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ॥
छंदोमयोऽमृतमयः सहस्रपदवीं प्रभुः ॥ ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम् ॥ ३९

य

भूतेन निमित्तेन तामेव दर्शयति स्पर्शादीन्वर्णान् ॥ निरूपयति संकल्पयतीति रूपिणा तेन स्पर्शग्रहणमुप
लक्षणं हृदयाकाशाद्धूत्वा सृजतीति ततीयश्लोकेनान्वयः बृहतीं शब्दब्रह्मात्मिकां पदवीं विशेषणा
नि सहस्रपदवीं बहुमार्गां वेदवाणीं ॥ ओंकारादुः ॥ कंठादिस्थानेन व्यंजितैः स्पर्शादिभिः भूषितां ओंकार
श्चात्र लक्षणतः सूक्ष्माभिव्यक्तेः नत्वकारादिवर्णरूपः ॥ तस्य व्यापकोटित्वात् ॥ तत्र स्पर्शाः कादि पंचवर्गाः
स्वराश्च अकारादयः षोडश ऊष्माणः शषसहाः ॥ अंतस्था यरलवाः ॥ ३९ ॥ ॥ ॥

माहभू १

राम ९९

विचित्राभिर्वैदिकलौकिकभाषाभिः वितन्वतां यथोत्तरं स्तवनादि वनार्यस्तत्राणि अपि कानि येषां तैः छंदोभिरु
पलक्षितां एवमनेनपापोत्सृजतिस्वयमेवाक्षिप्य तेउपसंहरतीव ॥ ३५ ॥ ते के कति किं छंदांसि दर्शयति गाय
त्रीतिनवचतुर्विंशत्यक्षरागायत्री तत्तत्सूत्राक्षरलक्षणयोसिगादि छंदांसि अन्यपि अतिजगती विराट्स्वेन
त्रयः एतैः छंदोभिरुपलक्षितां इति पूर्वेणैवान्वयः अनो बृहत्यपि साकल्येन स्वरूपतो पिंडार्थेयत्तकं ४
विचित्रभाषावितन्वतां छंदोभिस्त्वक्षरस्तैः ॥ अनेनपापोपसंहृतीसृजन्त्याक्षिप्यतेस्वयं ॥ २६ ॥ गाय
त्र्युष्णिगनुष्टुप्च बृहती पंक्तिरेव च ॥ त्रिष्टुप्जगत्यतिछंदो ह्यत्यष्टिजगद्विराट् ॥ ४७ ॥ किं विप
ते किमावष्टे किं मन्त्रं वा विकल्पयेत् ॥ इत्यस्याहृदयं लोके नाम्नामद्वैदकत्र्च ॥ ४८ ॥ ॥

अर्थतो पिंडार्थेयत्तमाह किमिति कर्मकांडे विधिवाक्यैः किं विपन्ने देवताकांडे मंत्रवाक्यैः किमावष्टे
प्रकाशयति ज्ञानकांडे तु किं मन्त्रं वा विकल्पयेत् निषेधार्थमित्येवमस्याहृदयं नान्यर्थमन्त्रोन्यः कश्चि
द्पिनवेद ॥ ४८ ॥ ॥ श्रीरामायनमः ॥ रामायनमः ॥ राम॰ मन्त्रो ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ ए॰ उ॰ टी॰ १००

ननु तर्हि त्वं मन्त्रः यथा कथयत्व ओमिति कथयति मामेव यज्ञरूपं विधत्ते मामेव तत्त्वेन हेत्वनात्रूपमभिधत्ते न मन्त्रः पृथ ॥ कथयत्वाकाशादिप्रपंचजातं ॥ तस्माद्वा ॥ तस्मादात्मनः आकाशः संभूत इत्यादिना विकल्प्यापोह्यते नेन तद्द्वार मेव न मन्त्रः पृथगस्ति ॥ उक्तस्य पिंडार्थं सर्ववेदार्थं संक्षेपतः कथयति एतावानेव सर्ववेदानामर्थः तमेवा ह शब्दो वेदः मां परमार्थरूपमाश्रित्य भिदां मायामात्रमित्यनूद्य अनेन रूपेण नानास्ति किं च अनेन इति प्रतिषिध्य प्रसीद ॥

मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहं ॥ ४२ ॥ एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदां ॥ मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति ॥ ४३ ॥ इति श्रीभागवते एकादशस्कंधे श्रीभगवदुद्धवसंवादे एकविंशोऽध्यायः ॥ २१ ॥ ॥ राम ॥ ॥

तिनिवृत्तव्यापारो भवति ॥ अयं भावः यथा स्वांकुरे यो रसः स एव तद्बिल्वारंभूर्तनानाकांडशाखास्वपि तथात्र एवमस्यार्थः परमेश्वरः स एव तद्बिल्वारंभनानासर्ववेदकांडशाखानामपि संगच्छते नान्य इति नित्यमुक्तः सतः सर्ववेदरहस्यं तं सर्ववेदविन्नःस्वपरज्ञानदातायस्तं वंदे गुरुमीश्वरं ॥ ४३ ॥ इत्येकादशे एकविंशः ॥ राम॰ १००
२१ ॥ श्रीरामायनमः ॥ ॥ राम ॥ राम ॥ ॥

द्वाविंशेनतत्त्वसंख्यानामविरोधविधीयते ॥ पुंप्रकृत्योर्विवेकस्तन्नमृत्युविधादिव ॥१॥ तदेवंवेदान्तोक्तप्रवृत्ति
परत्वेनराकृत्यमोक्षपरत्वेनि ॥ ...तेसंतिचमोक्षपरत्वेपितत्त्वांतरंविस्तारः तथाहिकेचित्तत्त्वसंख्यास्व
विदित्वेनतत्रापिवात्स्यायंसदसत्त्वेप्रागात्मतत्त्वेपिकतत्त्वानाहारिषुतत्रकिंसत्यमितिजिज्ञासयापृच्छतिकतीति
ऋषिभिराद्यैःप्रत्युवद्धथाख्यातानितत्त्वानितेषुमध्येकतियुक्तानीत्यर्थः ॥ भगवत्त्वत्तानुवादपूर्वकं
दृष्टसंख्यानंप्रपंचयतिनवेतित्रिभिः त्वंतावदष्टाविंशतितत्त्वान्यात्थतानिचवयंशुश्रुमश्रुतवंतः ॥१॥२॥

उद्धवः ॥ कतितत्त्वानिविश्वेशसंख्यातान्यृषिभिःप्रभो ॥ नवैकादशपंचत्रीण्यात्थत्वमितिशुश्रुम
॥१॥ केचित्षड्विंशतिंप्राहुरपरेपंचविंशतिं ॥ सप्तैकेनवषट्केचिच्चत्वार्येकादशापरे ॥२॥ केचित्सप्तदश
प्राहुःषोडशैकेत्रयोदश ॥३॥ एतावत्त्वंहिसंख्यानामृषयोयद्विवक्षया ॥ गायंतिपृथगायुष्मन्निदंनो
वक्तुमर्हसि ॥४॥ श्रीभगवानुवाच ॥ युक्तंचसंतिसर्वत्रभाषंतेब्राह्मणायथा ॥ मायांमदीयामुद्गृह्य
वदतांकिंनुदुर्घटं ॥५॥ राम

एतावतीनांभावएतावत्त्वंनानात्वमित्यर्थः यद्विवक्षयायत्प्रयोजनमभिप्रेत्यचगायंतिआयुष्मन्नित्यम
ते ॥४॥ विवक्षयाभेदेनसर्वंयुक्तमेवमाययाचकिंनामनयुक्तमित्याहयुक्तमितियथाब्राह्मणाभाषंतेन
युक्तंचनवक्तव्यंतः यस्मात्संतिचसर्वत्रांतर्भूतानितत्त्वानिकिंचमायामितिश्रमत्रोपिमायामाश्रयतांवद
तांपुंसामित्यर्थः ॥ उद्गृह्यस्वीकृत्यनहिमरीचिजलपरिमाणादिविवादेकिंचिद्दुर्घटमिवनभवति ॥५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग. टी. ९१

ननु यदि सर्वमपि युक्तं कुतो विवादः यदि च मायैवावलंबनं कुतो हेतुं प्रति विवादस्तत्राह नैतदिति हेतुं प्रति
वचिवदमानादीयादुपनिक्रमाः शक्तयः सत्वाद्याः स्वंतःकरणवृत्तिविशेषस्वरूपेण परिणता एव हेतुर्विमर्शः ॥
॥ तासां विवादे हेतुत्वमुपपादयति यासामिति यासां व्यतिकरात्क्षोभाद्वदतां पदं विषयः विकल्पो भेद आ
सीत् स्वंतःकरणवृत्तिविकल्पो वा तन्मूलभूतः एतदेव व्यतिरेकेण द्रढयति शमदमयोर्द्वैकान्तस्मिन्न्या
प्रविक ल्पा ख्यातिलीयते तेन च विकल्पमनुवादः शाम्यतीति ॥ संततिसर्वत्रेति यदुक्तं तत्प्रपंचय।

नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा ॥ एवं विवदतां हेतुं शक्तयो मे दुरत्यया: ॥ ६ ॥ यासां व्य
तिकरादासीद्विकल्पो वदतां पदं ॥ प्राप्ते शमदमेऽप्येति वादस्तमनुशाम्यति ॥ ७ ॥ परस्परानुप्र
वेशात्तत्वानां पुरुषर्षभ ॥ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं ॥ ८ ॥ एकस्मिन्नपि दृश्यं
ते प्रविष्टानीतराणि च ॥ पूर्वस्मिन्वा परस्मिन्वा तत्वे तत्वानि सर्वशः ॥ ९ ॥

ति परस्परेति द्वाभ्यां अन्योऽन्यस्मिन्ननुप्रवेशात्तत्ववक्तुर्यथा विवक्षितं ॥ न तथा पूर्वं कारणं अपरं कार्यं
कारणभावेन प्रसंख्यानं भवति यद्वा पूर्वाल्पसंख्या परा अधिकसंख्या तयोर्भावः पौर्वापर्यं तेन सं
ख्यानं गणनं इति ॥ ८ ॥ अनुप्रवेशं दर्शयति एकस्मिन्नपीति पूर्वस्मिन् कारणभूते तत्वे कार्यतत्वानि सूक्ष्म
रूपेण प्रविष्टानि मृदि घटवत् अपरस्मिन्कार्ये तत्वे कारणतत्वान्यनुगतत्वेन प्रविष्टानि घटे मृद्वत् १०२
९ ॥ ॥ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रविरोधमनुपसंहरति अतः अमीषां तत्त्वानां पौर्वापर्यं कार्यकारणत्वं प्रसंख्यानं च न्यूनाधिकमभीप्सतां वादिनां मध्ये य
थायथाविविक्ततया यद्ग्रहणं यस्य स्यात्तत्त्वे प्रवर्तेत तत्सर्वं विविक्तं निश्चित्य वयं गृह्णीमः उक्तन्यायेन सर्वत्र युक्तेः संभवात् ॥
ननु कार्यकारणतत्त्वानां पृथक्त्वेनापृथक्त्वेन विवक्षया भवतु नाम संख्याभेदः न जीवेश्वरयोस्तु कथं भेदाभेदविवक्षया षट्‌वि
शति पंचविंशति पक्षे प्रिहेतो अतः प्राह अनादीति स्वतो न संभवति श्च न्यूनत्वं तु संभवात् स्वतः सर्वज्ञः परमेश्वरो न्या भा
वि न वा इति षट्‌विंशतिपक्षाभिप्राय इत्यर्थः ॥ १९ ॥ कथं तर्हि पंचविंशतिपक्षः न चाह पुरुषेति वेत्तनत्वे एवं विसदृशत्वं

पौर्वापर्यमतो मीषां प्रसंख्यानमभीप्सतां ॥ यथा विविक्तं यद्ग्रहणं गृह्णीमो युक्तिसंभवात् ॥ १८ ॥ अनादिरविद्या
युक्तस्य पुरुषस्यात्मवेदने ॥ स्वतो न संभवादन्यः ॥ तत्त्वतो ज्ञानदो भवेत् ॥ १९ ॥ पुरुषेश्वरयोरस्मन्न वै लक्षणमन्व
पि ॥ तत्र यकत्वनां पारार्थ्यं ज्ञानं च प्रकृतेर्गुणाः ॥ २० ॥ प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नामतो गुणाः सत्त्वं रजस्तमश्चे
ति स्थित्युत्पत्त्यन्तहेतवः ॥ २१ ॥ राम
॥

नास्ति द्वयोरपि चिद्रूपत्वात् अतस्तयोरत्यंतमन्यत्वकल्पना अपार्थाव्यर्था एवं पंचविंशतिपक्ष एव श्लिष्ट इत्यर्थः ॥ न वे
वलं पिंडचूर्णवत् प्रसादं लभ्य ज्ञानस्य पृथक्त्वात् यदि द्वयमपि न वदेत् अत आह ज्ञानं चेति सत्त्वगुणकार्यत्वात् ज्ञानं तद्धर्मः मि
त्यर्थः ॥ २० ॥ ननु ज्ञानं जीवधर्मः कथं प्रकृतेर्गुणाः स्यात् अत आह प्रकृतिरिति [illegible] गुणसाम्यं हि
प्रकृतिं अतः न हि शेषरूपा गुणाः तस्यापवननात्मनो जीवस्याकर्तृत्वात् तस्याः स्थित्यादिहेतुभूतगुणाश्रयत्वानुपप

हे ॥ हे

श्री॰
भा॰
टी॰
१०२

अतः सत्वं सत्वमयं ज्ञानं प्रकृतेर्गुणा इति पूर्वेणैवान्वयः नन्वेतर्हि तत्कार्यनिवर्त्यकर्मवा ज्ञानं च न ज्ञानान्तरं स्यात् । तदुक्तं
कर्म रजसो वृत्तिः अज्ञानं च तमस इति अतः कर्माज्ञानयोः रजस्तमोद्वारा प्रकृतावेवान्तर्भाव इति भावः तथापि का
लस्वभावयोः तत्त्वान्तरता स्यात् । न गुणानां व्यतिकरो यस्मात्स एव ईश्वरः कालो नाम स्वभावो नाम सूत्रं मह
त्तत्वमेवतस्य सर्वप्राणि मनात्मतत्त्वज्ञानादीनां यथायथमंतर्भावान्न पृथक्त्वकल्पनमिति भावः एतच्च पक्षान्तर
सिद्धान्तेयं स्वमते च गुणानामागमापायित्वात् प्रकृतेर्भेदाविवक्षितः ॥ अतो गुणाः त्रीण्येव तत्त्वानि ॥१४॥ अपरा

सत्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते ॥ गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥१४॥ पुरुषः
प्रकृतिर्व्यक्तमहंकारो नभोऽनिलः ॥ ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव ॥१५॥ श्रोत्रं त्वग्दर्श
नं घ्राणो जिह्वेति ज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंगोभयं मनः ॥१६॥ शब्दः स्प
र्शो रसो गंधो रूपं चेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः ॥ १७॥

चविंशतितत्वानि पूर्वोक्तपक्षे १

... पुरुष इति सार्धद्वाभ्यां व्यक्तं महत्तत्वं नभआदीनि तन्मात्राणि मया ॥१५॥ प
तिपं हयसाधारणानि दर्शयति पुरुष इति सार्धद्वाभ्यां ... श्रोत्रादीन्यंगोभयं मनः ... ज्ञानेंद्रियाणि वागादि पायंतानि दशैकेनोक्तानि।
कादश इत्यादि ... ज्ञानेंद्रियाणि ... ज्ञानशक्तयः ... उभयं उभयात्मकं मनः अंगहेतु एवमेतान्येकादश ॥१६॥ पंचदर्शयति
पंच वना शिल्पिविशेषश्चेति कर्मेंद्रियाणि वा उभयं उभयात्मकं मनः ... तन्मात्राधिकं पक्षद्वयेपि स्यात् ते
पाहृ इति शब्दादीनि विषयतया एविणानां पंचमहाभूतानि ... गत्यादिभिः तन्मात्राधिकं ... कर्मेंद्रियाणां सिद्धयः फलानि तत्तन्मा
त्राहृगतीनि गतिश्च उक्तिश्च उत्सर्गश्च शिल्पं च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि तत्तन्मा
तत्वाणि इत्यर्थः १०॥

तदेवं मतत्रयेणानन्त्वमेतस्याभेदाविरुद्धं यद्विवदन्त्यागायतीति यत्पृष्टं तत्तन्मतं तन्नाम्नार्थं दर्शयति सर्गादाविति।
कार्याणां षाड्गुण्यविकाराः कारणानि महदादीनि तत्तद्रूपिणीमिती प्रकृतिः अस्या विषयस्य सर्गादौ गुणैः सृज्यन्ता
यव स्याः पृथक्त्वे उपादानकारणात्तद्रूपेण पुरुषः अव्यक्तस्य परिणामीति निमित्तभूतः केवलमीक्षते न तु परिणामि।
त्वाः प्रकृतेः पुरुषाभिन्न इति ॥१८॥ तन्त्रे वा रब्धस्य कार्यस्य तदंतर्भावमभिप्रेत्याह व्यक्तादय इति व्यक्तादयो
महदादयः प्रकृतेः कल्पना यथा तत्र विकुर्वाणाः पुरुषेक्षणलब्धवीर्याः संहताः अंडं कार्यं सृजन्तीत्यन्वयः

सर्गादौ प्रकृतेर्ह्यस्य कार्यकारणरूपिणी ॥ सत्त्वादिभिर्गुणैर्धत्ते पुरुषोऽव्यक्त ईक्षते ॥१८॥ व्यक्तादयो
विकुर्वाणा धातवः पुरुषेक्षया ॥ लब्धवीर्याः सृजन्त्यंडं संहताः प्रकृतेर्बलात् ॥१९॥ सप्तैव धातव इति तत्रा
र्थाः पंच खादयः ज्ञानमात्मोभयाधारस्ततो देहेन्द्रियासवः ॥२०॥ षडित्यत्रापि भूतानि पंच षष्ठः
परः पुमान् । तैर्युक्त आत्मसंभूतैः सृष्ट्वेदं समुपाविशत् २१॥ चत्वार्येवेति तत्रापि तेज आपोऽन्नमात्मनः
जातानि तैरिदं जातं जन्मावयविनः खलु ॥२२॥

प्रकृतेर्बलात्तामाश्रित्येत्यर्थः ॥१६॥ एवं स्वमतमुपसंहृत्य मतांतरेष्वपि सामान्यतोऽतिरूपितं घटनां विशेषतः स
तानयं दर्शयति सप्तैवेति त्वानवलानातीति दृष्टान्तः जीवः उभयोर्द्रष्टृदृश्ययोराधार आत्मा चेति सप्त तत्र प्रकृत्यादी
नां कारणानि वदन्वादिषु तदंतर्भाव इत्येषामंतर्भावार्थमाह ततस्तेभ्यः समभवः देहेन्द्रियासवः कार्याणि
षडिति मतेऽपि भौतिकस्य भूतांतर्भावं जीवस्य च परमात्मांतर्भावमाह तैर्युक्त इति ॥२१॥ चत्वार्यत्राप्यात्मनो
जातानि आत्मना सह चत्वारि तदंतर्भावार्थमाह तैरिदमिति अवयविनः कार्यस्य
२२ ॥ श्रीराम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भूतानि च मात्राणि च इंद्रियाणि च पंच पंच एकेन मनसा सह आत्मा सप्तदशः ॥२३॥ आत्मैव संकल्पयन् मन उच्यते त्रयोदशपक्षे भूतानि तन्मात्रैकीकृतानि इंद्रियाणि च तन्मात्रकृतानि पंचैव मनस्येकस्मिन्निंद्रियाधिष्ठातृ आत्मा च द्विविधः जीवात्मा परमात्मा च एवं त्रयोदश एकादशपक्षे पंच महाभूतानि पंचेंद्रियाणि जीव मनसोरा। त्मांतर्भावे तेनात्मैवैकादशः नवपक्षे अष्ट प्रकृतयः पुरुषश्च विकाराणामंतर्भावः ॥२४॥ उपसंहरतीति एभिः

संख्याने सप्तदशके भूतमात्रेंद्रियाणि च ॥ पंच पंचैकमनसा आत्मा सप्तदशः स्मृतः ॥२३॥ तद्वत् षोडश
संख्याने आत्मैव मन उच्यते ॥ भूतेंद्रियाणि पंचैव मन आत्मा त्रयोदश ॥२४॥ एकादशत्व आत्मासौ म।
हाभूतेंद्रियाणि च ॥ अष्ट प्रकृतयश्चैव पुरुषश्च नवेत्यथ ॥२५॥ श्रीउद्धव उवाच ॥ इति नानाप्रसंख्यानं तत्त्वा। ना
नामृषिभिः कृतं ॥ सर्वं न्याय्यं युक्तिमत्वाद्विदुषां किमशोभनं ॥२६॥ उद्धव उवाच ॥ प्रकृतिः पुरुषश्चोभौ।
यद्यप्यात्मविलक्षणौ अन्योन्यापाश्रयात्कृष्ण दृश्यते न भिदा तयोः ॥२७॥ प्रकृतौ लक्ष्यते ह्यात्मा
प्रकृतिश्च तथात्मनि ॥ एवं मे पुंडरीकाक्ष महांतं संशयं हृदि ॥२८॥ ॥

प्रकारैः प्रकृतिपुरुषभेदज्ञापनायेत्यर्थः ॥२५॥ तत्र शंकते इति इति आत्मनानात्वं स्वभावेन विलक्षणौ अन्यो
न्यापाश्रयत्वात् परस्परापरिहार्येण प्रतीतेर्न भिदेत्यर्थः ॥२७॥ तदेव दर्शयति प्रकृतौ तत्कार्ये देहे प्रकृतिश्चात्मनि तेन
विना तस्या अप्रतीतेः अहमित्यभेदप्रतीतेर्न देहात्मनो भेदो लक्ष्यते इत्यर्थः हृदि वर्तमानं संशयं येन वचनयुक्त्या
नैपुण्यं सर्वज्ञेषां तत्त्वमेव स्वान्तर्भावमायातीति छेत्तुमर्हसि इत्यर्थः ॥२८॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रहंसीत्युक्तं तत्रहेतुमाह हि यस्मात्तन्मायांदेवप्ररत्नानेश्रमोघः श्रंशाश्चेतशक्तितोमायातः ननुवस्वप्रकाशस्यात्मनः कथंज्ञानरोधेनतत्प्रमोघवा ममकिंप्रयोजनंतत्राहत्वमेति ॥ २७ ॥ विकारावकारराभ्यांनानात्वैकत्वाभ्यांप्रकाशाभ्यांचात्मभेदंवक्तुमाह प्रकृतिःपुरुषश्चेतिविकल्पात्मंभेदएवदुर्गः एषएतायंप्रकृतिशब्दोक्तदेहादिविषयस्तस्यविकारि

ब्रूतमर्हसिसर्वज्ञवचोभिर्नयनैपुणैः ॥ २८ ॥ त्वत्तोज्ञानंहिजीवानांप्रमोषस्तेत्रशक्तितः ॥ त्वमेववात्ममायायागतिं वेत्थनचापरः ॥ २९ ॥ श्रीभगवानुवाच ॥ प्रकृतिःपुरुषश्चेतिविकल्पःपुरुषर्षभ एषवैकारिकःसर्गोगुणव्यतिकरात्मकः ॥ ३० ॥ ममांगमायागुणमय्यनेकधा ॥ विकल्पबुद्धीश्चगुणैर्विधत्ते ॥ वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत ॥ ३१ ॥

त्वदर्थोयत्विषयइतिद्वाभ्यांएषसर्गःसृज्यतइतिसर्गोदेहादिविषयातःवैकारिकःविकारवान्प्रत्र्हेतुःगुणव्यतिकरात्मकःगुणक्षोभकृतः ॥ २९ ॥ नानात्वमाहममेतिविकल्पभेदंतद्बुद्धीश्चअनेकधाविप्रपंचयतिवैकारिकःअनेकविकारवानपिस्थूलेनमार्गेणतावत्रिविधःत्रैविध्यमेवाहअध्यात्ममितिएकंरूपं ॥ ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री भाग प टी १०४

तानि रूपाणि दर्शयन्निह कृष्णाख्यं रूपमपि भूतं स्वरूपं भेदवर्गो नैकेश्वविभुसार्कवपुः स्वांशोऽपि दैवमिति तिसोपदप्रका
शानामा हृदयस्य वमिति एवं च तथा रूपं ज्ञायते न तत्त्वयानुपपत्त्या वक्तव्यं तत्त्वस्य न्यायानुपपत्त्यात ऽपि छाने देव
वनात ततः॥ वदत्यथः प्रकृतिस्तत्र तेषु पदार्थान्निन्यं वमत तद्रूपपरस्परं सिद्ध्यति स्वरूपं भूत इति विशेषणाख्यावर्त्यमानं हृत्स्वं शोभे
पयोगिनयायस्तु विश्वाकाशे कौवर्ततिमध्य लालामनुस्वतः॥ सिद्ध्यति च वदन्विषयतेऽपि प्रतियोगप्रवेशात्मा वेणास्व
न रूपस्तु क॥ इदानीमात्मनो विकारादिव्याप्यभावेन भेदमाह यद्यस्मात् आत्मा एषाम ध्यात्मादीनामाश्रयः कारणम भाव ५

दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिद्ध्यति यः स्वतः खे॥ आत्मा यदेषामपरो यआश्रयः स्वया
नुभूत्याखिलसिद्धसिद्धः॥ ३२॥ एवं नगादिश्रवणादि चक्षुर्जि
ह्वादिनासादि च चित्तयुक्तं॥ ३३॥

त एक रूपः॥ अभिन्नश्च स्मादेतेभ्यो परो भिन्नः स्वप्रकाश्यावारयीत्याह स्वयानुभूत्या स्वतः॥ सिद्धप्रकाशेनाखिला
नां सिद्धानां परस्परं प्रकाशकानामपि प्रकाशकः॥ सर्वेषामपि सामान्यतश्चित्प्रकाशविषयत्वान्स्वतः प
वतस्य स्वप्रकाशत्वेन सिद्धं वदतां परदर्शितं तैर्विध्यमिद्रियांतरेष्वप्यतिदिशति एवमिति॥ ३३॥ यथा च त्वरेवत
मपीत्यर्थः न कस्यचित्तौ वा पुरिति॥ श्रवणं शब्दोऽदिश उतिजिह्वा रसो वरुणः श्रुति॥ नासा गंधो भूविनाविति
चित्तेन युक्तं मनः करणांतरमपि तत्र वित्तं चेतयितव्यं वासुदेव इति मनो मंतव्यं चंद्र इति बुद्धिर्बोद्धव्यं ब्रह्मेति
अहंकारो अहंकर्तव्यं मन रुद्र एवं त्रिविधमित्यर्थः॥ ३४॥ १०४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नन्वपुनरपिचेत्तल्लक्षणमात्रमेवोक्तं त्रिविधश्चैवंव्यतिरिक्तः स्यात्स्तु कुतः स्यादहंकारनिवृत्त्यानन्तु तस्त्रिविधवि
कल्पनिवृत्त्यैवेत्याशयेनाह योसावहंकारस्तमेवाह गुणक्षोभं करोतीति ततः परमेश्वरात् कालाद्वा निमित्तात्प्र
धानं मूलमुपादानं यस्य तस्मात् महतो द्विप्रसूतो विकारः स त्रिवृत् त्रिविधः यस्य विकल्पस्य हेतुस्त्रिविधत्वमेवा
ह वैकारिक इति ॥२४॥ मत्कृतानिवर्तते ब्रात्मा ज्ञानविलसितत्वात् ज्ञानेनेत्याशयेनाह आत्मापरिज्ञानमय इ
ति ननु कथं मोहमयं वा विकल्पस्याहंकारस्य वा केषुचित्सम्मता विकारात्राह विवाद इति भेद एव भिदार्थनि

योसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः ॥ अहं त्रिवृन्मोहविकल्पहेतुर्वैका
रिकस्तामसऐन्द्रियश्च ॥२५॥ आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः ॥ व्यर्थो
पि नैवोपरमेत पुंसां मत्तः परावृत्तधियां स्वलोकात् ॥२६॥ देवादिकां यांति ततो थ नीचां देहेषु नित्यं
परिवर्तमानाः ॥२७॥ ॥
॥

ष्ठः विवादोयमात्मापरिज्ञानमयः अज्ञानमयः यद्वा विवादः सर्वो भिदार्थनिष्ठ एव न तु वस्तुमात्रनिष्ठः अतः प
रमार्थयुक्तिभिर्वे [illegible] भेदस्य निराकृतत्वान्मोहमयत्वं सिद्धमिति ननु यद्यहंकारो विकल्पश्च
नास्ति स्थूलं तर्हि तन्निवृत्तिप्रयासेन तत्राह व्यर्थोपि निःप्रयोजनः ॥ अर्थरहितोपि वा स्वप्नभूतान्मत्तो बहि
र्मुखानां रतीभूतानां पुरुषाणां नैवोपरमेत अहंकारो विकल्पश्च प्रत्युत तत्कृतैः कर्मभिः उच्चनीचदेहे
षु नसंसरंतीत्याह ततः परिवर्तमानाः अनिश्चितधियः पुनः पुनरुच्चनीचेषु देहेषु संसरंतीति ॥२७॥ ॥

मोहमय

श्री भाग टी ९५

तत्र एव जातिमत्त्वं इति व्यापकस्यात्मनो देहाद्देहान्तरगमनमकर्तुः कर्माणि नित्यस्य च जन्ममरणादीनि कथमिति भावः ॥३४॥ एतद्धि ह्यात्मानं संति द्वियस्मान्मायया वंचिताः मोहिताः ॥३५॥ लिंगशरीरात्मा सिंन सर्वं चेष्टत इत्युक्तम आहमन इति प्रधानत्वेन पंचभिरिति निर्देशोऽन्येषामप्युपलक्षणार्थः ॥ देहाद्देहान्तरं प्रतियातीति ततोऽन्य एवात्मा तन्मनोऽनुवर्तते अहंकारेणानुगच्छति ॥ ननु मनसोऽपि पूर्वदेहवियोगो देहान्तरसंयोगश्च कथं भवतीति चेत् ॥३६॥ स्मृतिवियोगयोगाभ्यामिति वक्तुं तयोः कारणमाह ध्यायदिति कर्मतंत्रं नानाकर्मोपस्थापितान् दृष्टाञ्श्रुतानुश्रुतान् ।

उद्धव उवाच ॥ त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो ॥ उच्चावचान्यथा देहान्गृह्णन्ति विसृजन्ति च ॥३६॥ तन्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः ॥ न ह्येतत्प्रायशो लोके विद्वांसः सन्ति वंचिताः ॥३७॥ श्रीभगवानुवाच ॥ मनः कर्ममयं नृणामिन्द्रियैः पंचभिर्युतं ॥ लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते ॥३८॥ ध्यायन्मनोऽनु विषयान्दृष्टान्वानुश्रुतानथ ॥ उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनुशाम्यति ॥३९॥
विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः ॥ जन्तोर्वै कस्यचिद्धेतोर्मृत्युरत्यन्तविस्मृतिः ॥४०॥

ना तं ता

वेदोक्तान्वा विषयाननुध्यायतस्तस्य याते ध्यायमानेऽपि यत् आविर्भवत् पूर्वविषये वसीदत् लीयमानं भवति तदनंतरं तस्य स्मृतिः पूर्वापरानुसंधाने न पश्यति ॥३९॥ ततः किमत आह विषयेति कर्मोपस्थापिते देवादिदेहे येऽभिनिवेशेन आत्मानं पूर्वदेहं पुनर्मनो न स्मरेदिति यत्तेऽवयाति ते देहाभिनिवेशेन भयशोकादेः देवादिदेहाभिनिवेशान्नवा हृत्पूर्वदेहतो ॥ एवं देहस्यात्यंतविस्मृतिः ॥ अहंकारनिवृत्तिः तदभिमानिनो जंतोर्जीवस्य मृत्युरुच्यते न तु देहस्य नाशः ॥४०॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जन्मतु विषयस्य देहस्य आत्मतया स्वीकृतिं अभिमानं प्राहुः ॥ ननु देहवदुत्पन्नं न च पुत्रादिदेहवत्प्रीत्यतिशयमात्रे
ण किंतु सर्वभावेन अभेदेन अभिमानमात्रेणोत्पत्तिमरणे इत्यत्र दृष्टांतं यथा स्वप्नमनोरथयोरित्यर्थः ॥ ३९ ॥ दृष्टांतो वि
वृणोति स्वप्नमिति तत्र वर्तमाने स्वप्नादौ पूर्वं चेति प्राक्पूर्व मिवेति वान्वयः पूर्वसिद्धमप्यात्मानमपूर्वमिवाधुना
तमिव पश्यतीत्यर्थः ॥ ४० ॥ उपसंहरति इंद्रियाणामयनं मनः तस्य सृष्ट्या देहांतराभिनिवेशेन या सृष्टिः उत्प
त्तिः तया वस्तुनि आत्मनि तदभिमानेनेदं त्रैविध्यं उत्तममध्यमनीचत्वं असदेव भातीत्यन्वयः एवंभूतः कत्तु

जन्मत्वात्मतयांपुंसः सर्वभावेन भूरिद ॥ विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः ॥ ३९ ॥ स्वप्नं मनोरथं चेत्थं
प्राक्तनं न स्मरत्यसौ ॥ तत्पूर्वमिवात्मानमपूर्वं वानुपश्यति ॥ ४० ॥ इंद्रियायनसृष्ट्येदं त्रैविध्यं भाति जन्मनो २
वस्तुनि ॥ बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ॥ ४१ ॥ नित्यदा ह्यंग भूतानि भवंति न भवंति च ॥ ४२ ॥
कालेनालक्ष्यवेगेन सूक्ष्मत्वात्तन्न दृश्यते ॥ २

भिन्नांतःकरणोपाधिर्बहिरंतर्भिदाहेतुरेव भवति आत्मा वाह्याभ्यंतरभेदहेतुश्च भवति वाह्यविषयान् आंतरान्
सुखादींश्च पश्यतीत्यर्थः यथा असतो जीवः सन्नेव हन्त्यसतो जनान् देहानुत्पादयन् बहुरूपो भवति तद्वत्
यद्वा इदं त्रैविध्यं अध्यात्मादिरूपं भाति असज्जनकृत् उत्पादकः जनः पिता स्वयं समोऽपि पुत्राभिमा
नेन स्वदिविमित्रारिषु यथा भयभेदहेतुर्भवति न तद्वदिति मन्यमानान् ॥ ४१ ॥ तदेव लोकप्रसिद्धौ जन्ममृत्यू निरू
पयन्नवस्थात्मापि नैवेत्याह यानि रूपयति नित्यदा इति तानि भूतानि शरीराणि उत्पद्यंते नश्यंति च कालस्य
नितरां लक्ष्यत्वात्तत्त्वं भवनमभवनं वा अविवेकिभिर्न लक्ष्यते सर्वेषां जीवानुसारेणात्मानात इति ॥ ४२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रदीपवत्प्रतिदिनं भंगे सोयमिति॥ पाठा२ कृताः

श्री भाग टी १९

मतोर्जन्ममरणयोरज्ञानेकारणमेतत्तत्प्रभवेत्तस्मामेवतयोः उक्तरूपां अनुमानेन साधयति अर्चिषामिति अर्चिषां वि
णामादिभिः स्रोतसां गत्यादिभिः फलानां रूपादिभिर्यथावस्थाविशेषाः कालेन तिरूवस्यानुषंगः आदिश
ब्देन तेजोबलकामक्रोधलादीनामुत्पादानेविमतेप्रतिक्षणोत्पत्तिविनाशवद्देवस्य भेदकत्वात् दीपज्वाला
दिवदित्यनुमानं कथं तर्हि प्रत्यभिज्ञा तत्रदेव सा दृष्टा बलविनीत्याह सोयमिति तथा सोयमिति सादृश्याद
र्चिषामेव यथा सोयंदीपइति प्रत्यभिज्ञा यथा च स्रोतसां प्रवाहजलानामेव तदिदं जलमिति तथा सोयं पुमानि

यथार्चिषां स्रोतसां च फलानां वा वनस्पतेः॥ तथैव सर्वभूतानां वयोवस्थादयः कृताः॥४३॥ सोयं दीपो
र्चिषां यद्वत्स्रोतसां तदिदं जलं सोयं पुमानिति नृणां मृषा गीर्धीर्मृषायुषां॥४४॥ मा स्वस्य कर्मबीजेन
जायते सोप्ययं पुमान्॥ म्रियते वामरो भ्रान्त्या यथाग्निर्दारुसंयुतः॥४५॥

घटते२

तिधीर्गीश्च मृषा नृणां बहूनां शरीरिणां मृषात्वर्थमायुर्येषामविवेकिनां तेषां भवति॥४४॥ ननु कथं देहाध्यास
वतः पुंसः कर्मणा जन्ममरणे निषेधति नान्यस्येति अवस्थानहि घटस्य रूपभेदेन सत्त्वमसत्त्वं चेति न त्वन्यस्यापि
वस्तुतः तदभावादित्याह मा स्वस्य भूयंपुमान् मा स्वस्यात्मनः कर्मणां बीजभूतेन सोपि अजोपि पुमान् जायते म्रिय
ते वा किं तर्हि भ्रान्त्या अजन्मापि जायत इव अमरोपि म्रियत इव यथा महाभूतं तेजो रूपोग्निर्वाकल्पांतमवस्थि
तोपि दारुयोगवियोगाभ्यां जन्मनाशौ प्राप्नोतीति तद्वत्॥४५॥

२०६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नन्वात्मनोजन्मादेरलौकिकत्वेप्रतीयमानेएतेकस्यतावद्विकारादेर त्रिनिचेन्नत्राहसिद्धवत् कृत्वोक्ताव
स्थाःप्रपंचयतिनिषेकोजठरेप्रवेशोगर्भःतन्मध्येवृद्धिः बाल्यमापंचमाद्वर्षात्कौमारंआषोडशाद्वर्षाद्यौ
वनमापंचचत्वारिंशतः। ततोवयोमध्यमाषष्टिवर्षात्॥ ४६ देहसंबंधाज्जन्ममरणादीनुपपादितमर्थमुपसं
हरतिएताइतिद्विभिःस्फुटं अन्यस्यानात्मनोदेहस्यसंबंधिनीर्याएतामनोरथमयीः॥ तनूरवस्थागुणसंगात्स्वयं
त्वविवेकात्कश्चित्परमेश्वरानुगृहीतःकश्चिज्जहातिअवस्थावतोदेहस्यद्रष्टानावस्थावानितिविवेक

निषेकगर्भजन्मानिबाल्यकौमारयौवनं। वयोमध्यंजरामृत्युरित्यवस्थास्तनोर्नव॥ ४६॥ एतामनो
रथमयीर्ह्यन्यस्योच्चावचास्तनूः॥ गुणसंगादुपादत्तेक्वचित्कश्चिज्जहातिच॥ ४७॥ आत्मनःपितृपु
त्राभ्यामनुमेयौभवाप्ययौ॥ नभवाप्ययवस्तूनामभिज्ञोद्वयलक्षणः॥ ४८॥ तरोर्बीजविपाकाभ्यां
योविद्वान्जन्मसंयमौ॥ तरोर्विलक्षणोद्रष्टाएवंद्रष्टातनोःपृथक्॥ ४९॥

तानेन॥ ४७॥ ननुतदानींमूर्छितेनेवजन्ममरणावमेवजन्ममरणवान्देहेनदृष्टएतेतत्राहआत्मनइतिपितृ
देहस्यौर्ध्वदैहिकंऊर्ध्वंनाप्ययदर्शनात्पुत्रदेहस्यचजातकर्मणिजन्मदर्शनादात्मनःस्वदेहस्यापिभवाप्य
यावनुमेयौएवंचदृष्टएतेसतिभवाप्ययवतांवस्तूनांदेहानामभिज्ञोद्रष्टाद्वयलक्षणःभवाप्ययधर्मकोन
भवति॥ ४८॥ एतदेवदृष्टांतेनस्पष्टयतितरोरितितरुशब्देनोद्भिज्जन्मात्रोपलक्षणंफलपाकांतस्यव्रीह्यादे
रित्यर्थःयद्वातरोरिवांकुरःपरिणामोविपाकःबीजाज्जन्मविपाकात्संयमनाशंचविद्वान्द्रष्टातनोर्द्रष्टा
तनःपृथक्अनन्तत्वर्तमानोपियोभवाप्ययाभ्यांनसंबध्यते॥ ४९॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रविवेकिनः संसारं प्रपंचयति प्रकृतेरिति पंचभिः तत्वेन तत्वतो विविक्त्या तत्व स्पर्शो गुणविषयेषु संमूढ इति
वा ५० ततस्तदनुमानेगुणभेदेन विविधं तत्रापि तत्तारतम्येनैकैकत्रापि विविधं संसारमाह सत्वेति ॥ ५१ ॥ तत्त्वक
र्तुरात्मनः कुतः कर्मभिः भ्रमणं तत्राह नृत्यतो गायतो जनानपश्यन्ननुकरोति तद्वत् स्वरतालादि यतिशृंगारकरु
णादिरसं च मनस्यनुवर्तयत्यर्थः ॥ अनुकार्यते गुणैर्बलादित्यर्थः अत्र नटदृष्टांते तेन दृश्यधर्मो द्रष्टरि स्फुरतीति दर्
शितं ५२ उपाधिधर्मा स्वोपाधिके वभासंते तत्र दृष्टांतमाह यथांभसेति तीरस्थास्तरवो धावंत इव दृश्यंते जले प्र

प्रकृतेरेवमात्मानमविविच्याबुधः पुमान् । तत्त्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ॥ ५१ ॥ सत्वसंगादृ
षीन्देवान्रजसासुरमानुषान् ॥ तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ॥ ५२ ॥ नृत्यतो गायतः
पश्यन्यथैवानुकरोति तान् ॥ एवं बुद्धिगुणान्पश्यन्ननीहोप्यनुकार्यते ॥ ५३ ॥ यथांभसा प्रचलता
तरवोपि चला इव चक्षुषा भ्राम्यमाणेन दृश्यते भ्राम्यतीव भूः ॥ ५४ ॥ यथा मनोरथधियो विषयानु
भवो मृषा स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ॥ ५५ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते
ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ५६॥

तिबिंबिता वा चंचला इवेति विषयग्राहकेन मनसा परिकल्पिता एवं ते सुखादयो गुणाः न वस्तुतः संति
आत्मनो निबंधना एवं संसार इत्यभिप्रेत्य ग्राहकगुणाग्राह्येष्ववभासंत इत्यत्र दृष्टांतमाह चक्षुषेति ५४ भो
गस्यापि मिथ्यात्वे दृष्टांतद्वयमाह यथेति यथा एते प्रसिद्धा मनोरथधियः स्वप्नदृष्टाश्च धियो यथा मृषा एवमा
त्मनो विषयानुभवः संसारो मृषा ५५ ननु यदि मृषा तर्हि किं तन्निवृत्तिश्रमेण तत्राह अर्थे हीति अस्यात्मनः ५६ १०

अतोभोगोप्युमोनकर्तव्यइत्याह तस्मादिति ॥५७॥ दुःखप्रतीकारभोगमानपिपरिन्यज्यपरमेश्वरनि
ष्ठेनैवभाव्यमित्याह क्षिप्तइतिद्वाभ्यां क्षिप्तआक्षिप्तः नुत्रइतिवाप्रलब्धउपहसितः ॥५८॥ निष्ठितःनि
ष्ठीवनविषयीकृतः मूत्रितः मूत्रेणार्द्रीकृतः प्रकंपितः परमेश्वरनिष्ठानः श्रद्धाविनोषिकृच्छ्रगतः
कष्टंप्राप्तोपिनदार्थैर्यसबलंब्यात्मनाबुद्ध्यात्मानमुद्धरेव श्रीनारायणंस्मरेदित्यर्थः ॥५८ एवंतउक्ते

तस्मादुद्धवमाभुंक्ष्वविषयानसदिंद्रियैः ॥ आत्माग्रहणनिर्भातंपश्यवैकल्पिकंभ्रमं ५७
क्षिप्तोवमानितोसद्भिःप्रलब्धोसूयितोथवा ॥ ताडितःसंनिरुद्धोवावृत्त्यावापरिहापितः ५८
निष्ठितोमूत्रितोवाज्ञैर्बहुधैवप्रकंपितः ॥ श्रेयस्कामःकृच्छ्रगतआत्मनात्मानमुद्धरेत् ५९
उद्धउवाच ॥ यथैवमनुबुध्येयंवदनोवदतांवर ॥ सुदुःसहमिमंमन्येआत्मन्यसदतिक्रमं ६०
विदुषामपिविश्वात्मन्प्रकृतिर्हिबलीयसी ॥ ऋतेत्वद्धर्मनिरतान्शांतांस्तेचरणालयान् ६१
इतिश्रीभागवतेएकादशस्कंधेभगवदुद्धवसंवादेद्वाविंशोध्यायः ॥२२॥

यथाऽवबुध्येयंतथानःसर्वोत्वंनिवदेत्यर्थः ॥६०॥ त्वद्धर्मनिरतानृतेविदुषामपिअसद्भिःकृतः
मतिक्रममपराधंसुदुःसहंमन्येयःप्रतिस्वभावः ॥६१॥ निरस्यसर्वसंदेहमेकीकृतस्वदर्शनं॥ प्रका
शितवदहंसंतंभजामिपुरुषमीश्वरं ॥ इत्येकादशेद्वाविंशोध्यायः ॥२२॥ ॥

त्रयोविंशे तु निर्विण्णसहनोपाय ईर्यते ॥ भिक्षुगीतप्रकारेण मनसः संयमो धिया ॥ १ ॥ दुर्जनोपद्रवो नूनं
दुःसहोऽपि महीयसां ॥ अतस्तत्र भिक्षुरत्याये सहनोपायवर्णनं ॥ २ ॥ तत्र तावदस्मिन्नध्याये भिक्षुगी
तया मनोनिग्रहं उत्तरस्मिंश्च पुरुषप्रकृतिविवेकस्तेन दुस्तरसंसिन् गुणाहृत्तिविजयः ततः परस्मिन्नैं
न गीतया विषयसंगत्यागेन सत्संग इति क्रमेणोपायाः ॥ भगवता वर्णिताः आशंसितः प्रार्थितः भृ
त्यस्य वचः ॥ सत्कुर्वन् तमभ्यं प्रतिशश्राव बभाषे ॥ १ ॥ तत्र तावदंगीकारेण उद्धवः संरंजयति द्वाभ्यां दुः

श्रीशुक उवाच ॥ स एवमाशंसित उद्धवेन भागवतमुख्येन दाशार्हर्षभेण ॥ सभाजय
न्भृत्यवचो मुकुंदः तमाबभाषे श्रवणीयवीर्यः १ श्रीभगवानुवाच ॥ बार्हस्पत्य स नास्त्य
नं२ त्र साधुर्वै दुर्जनेरितैः ॥ दुरुक्तैर्भिन्नमात्मानं यः समाधातुमीश्वरः ॥ २ ॥ न तथा तप्यते विद्धः
पुमान्बाणैर्हि मर्मगैः ॥ यथा तुदंति मर्मस्था ह्यसतां परुषेषवः ॥ ३ ॥ कथयंति महत्पुण्य
मितिहासमिहोद्धव ॥ तमहं वर्णयिष्यामि निबोध सुसमाहितः ॥ ४ ॥ केनचिद्भिक्षुणा
गीतं परिभूतेन दुर्जनैः ॥ स्मरता धृतियुक्तेन विपाकं निजकर्मणां ॥ ५ ॥

बार्हस्पत्य हे बृहस्पतेः शिष्य अत्र लोके स साधुर्नास्ति यो दुर्जनोक्तैर्भिन्नं क्षुभितं मनः शमयितुं
मीश्वरः स्यात् ॥ २ ॥ ऊनस्य तप्यते आह नेति यथा मर्मस्था मर्मस्वेव निखातस्थिताः पुरुषोक्तिरूपा
इषवः तुदंति व्यथयंति तथा दुर्नरैर्बाणैर्न तुदंति अतस्तथा न तप्यते इत्यर्थः ॥ ३ ॥ तथापि
नैर्मल्यावहस्य मार्गस्य उपायैः सर्वसोढव्याः कुशाः क्षमिणामभिप्रायेण इतिहासं प्रस्तौति महद्यथा भ
वति तथा पुण्यमितिहासं गाथां कथयंति ॥ ४ ॥

ने२ ल३२ श्वि२

सत्वभिदः पूर्वं धनाढ्यः कृच्छ्रार्जितस्य धनस्य नाशेन संतप्यमानो निर्विन्नः सन् पश्चादभिज्ञात्सम्ट
नुजनेनैरूपद्रुतं प्रस्तनो पयोगिनी गाथा गता यनिवक्तुं तस्य चरितमाह अवंतीति स्यादिना अवंति
षु मालवेषु वार्ता कृषिवाणिज्यादिरूपाहत्तीर्यस्य कदर्यस्य नाशुकः ॥ आत्मानं न धर्मं ... पुत्रदा
रांश्चापीडयन् ॥ देवतातिथिभृत्यांश्च स कदर्य इति स्मृत इति ॥ ८ ॥ तस्य ये ज्ञातयो बांधवाश्च ... पयोध्वनी

ढ्य

अवंतिषु द्विजः कश्चिदासीदाढ्यतमः श्रिया ॥ वार्तावृत्तिः कदर्यस्तु कामी लुब्धोतिकोपनः ॥
ज्ञातयोतिथयस्तस्य वाङ्मात्रेणापि नार्चिताः ॥ शून्यावसथ आत्मापि काले कामैरनर्चि
तः ॥ ७ ॥ दुःशीलस्य कदर्यस्य द्रुह्यन्ते पुत्रबांधवाः ॥ दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं ॥ ८ ॥
तस्यैवं यक्षवित्तस्य च्युतस्योभयलोकतः ॥ धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ॥ ९ ॥
तदवध्यानविस्रस्तपुण्यस्कंधस्य भूरिद ॥ अर्थोप्यगच्छन्निधनं बह्वायासपरिश्रमः ॥ १० ॥ ज्ञा
तयो जगृहुः किंचित्किंचिद्दस्यव उद्धव ॥ दैवतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात् ॥ ११ ॥
स एवं द्रविणे नष्टे धर्मकामविवर्जितः ॥ उपेक्षितश्च स्वजनैश्चिंतामाप दुरत्ययां ॥ १२ ॥

ता नेनार्चिता इत्यर्थः ॥ शून्यावसथः धर्मकर्महीने गृहे देहे च यस्य ज्ञानं वित्तमिव केवलं रक्षणीयं
वित्तं यस्य पंचभागिनः पंच यज्ञदेवता ॥ तेषामवध्यानमनादरः तेन विस्रस्तो विशीर्णः पुण्यस्कंधः ॥ अ
र्थोप्यगमत् ... ब्रह्मबंधोर्यस्य बह्वायासैः कर्षणादिभिः केवलं श्रमो यस्मिन्सः ज्ञातयो निधनं गताः ... बह्वादत्तान
यदनि दैवतः ॥ गृहदाहादिर्न कालतः निखातस्थान्यादि ... पार्थिवानां ... चदंडे ... तस्मात् ॥ ११ ॥ न२

दि२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्दाशयः नष्टा रायः अर्थाय स्य तपस्विनः सेवनमस्य ॥ १३ ॥ मे मम्या आत्मा देहः वृथैवात्मानुतापितः प्रनेन प्रापेंक्य
तिनधर्मायेत्यादिनायस्येदृशो यासः तेन मम्या ॥ १४ ॥ नरकाय च सत्य मर्थे धर्मानुष्ठानात् ॥ १५ ॥ श्वित्रः
श्वेत कुष्ठं ॥ १८ ॥ सिद्धेऽप्यर्थे तस्योत्कर्षे संवर्द्धनेनाशोपभोगयोर्द्वंद्वैकं नाशे उपभोगे चेत्यर्थः साधनोत्क
र्षयो राग्याः समनन्तरञ्चासः चिंताच नाशोभ्रमइति ॥ १९ ॥ किंचार्थप्राप्त्यर्थास्तेयादयः पुरुषार्थप्राप्त्यर्थैः स्प

तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः ॥ खिद्यतो वाष्पकंठस्य निर्वेदः सुमहानभूत् ॥ १५ ॥ स
चाहेदमहो कष्टं वृथात्मा मेनुतापितः ॥ नधर्माय च कामाय यस्यार्थायास ईदृशः ॥ १६ ॥ प्राये
णार्थाः कदर्याणां न सुखाय कदाचन ॥ इह चात्मोपतापाय मृतस्य नरकाय च ॥ १७ ॥ यशो यश
स्विनां शुद्धं श्लाघ्या ये गुणिनां गुणाः ॥ लोभः स्वल्पोपि तान्हंति श्वित्रो रूपमिवेप्सितं ॥ १८ ॥ अर्थस्य
साधने सिद्धे उत्कर्षे रक्षणे व्यये ॥ नाशोपभोग आयासस्त्रासश्चिंता भ्रमो नृणां ॥ १९ ॥ स्तेयं हिंसा
नृतं दंभः कामः क्रोधः स्मयो मदः ॥ भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥ २० ॥ एते पंचदशा
नर्था ह्यर्थमूला मता नृणां ॥ तस्मादनर्थमर्थाख्यं श्रेयोर्थी दूरतस्त्यजेत् ॥ २१ ॥ भिद्यंते भ्रातरो
दाराः पितरः सुहृदस्तथा ॥ एकास्निग्धाः काकिणिना सद्यः सर्वेऽरयः कृताः ॥ २२ ॥ अर्थेनाल्पीयसा
ह्येते संरब्धा दीप्तमन्यवः ॥ त्यजंत्याशु स्पृधो घ्नंति सहसोत्सृज्य सौहृदम् ॥ २३ ॥

मा
दयो व्यसनैः सह नव व्यसनानि स्त्रीद्यूतमद्यविषयाणि त्रीणि ॥ २० ॥ भेदवैरस्पर्धाः प्रपंचयति द्वाभ्यां भि
द्यंते भ्रातर इत्यादि एकास्निग्धाः एके एकप्राणाः नेवस्निग्धाः अनितिप्रियाश्च सद्यः काकिणिनांऽङ्गः
स्वमाषं विंशतिवराटिकाः काकिणी तया ॥ २२ ॥ संरब्धाः क्षुभिताः स्पृधः स्पर्धमानाः ॥ २३ ॥ कुंनः २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इहतावदर्थनिष्ठानामनेनेनर्थाः परलोकेप्यनर्थप्रदत्वंतेषामित्याह लब्ध्वेति त्रिभिर्मानुष्यंजन्मतत्र
तु द्विजाग्र्यतां श्रेष्ठं कुलं ब्राह्मण्यं स्वार्थं घ्नंति ॥ आत्मद्वितं न कुर्वंति ये ते यांति २२ अमरप्रार्थ्यं
तादृशं यत्राह स्वर्गेति लोकं देहं अनुषज्जेत आसक्तिं कुर्यात् २३ यक्षवयो ध्ययत्तत्र यत्तयोर्देवता
देवपितृभूतानीन रेषु ज्ञातयः ॥ सगोत्राः बंधवो विवाहादिना संबंधास्ता भागिनः भागहीनानात्मा

न अन्यांस्त्र

लब्ध्वाजन्मामरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिं ॥ २२
स्वर्गापवर्गयोर्द्वारं प्राप्य लोकमिमं पुमान् द्रविणे कोनुसज्जेत मर्त्योनर्थस्य धामनि ॥ २३
देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च भागिनः असंविभज्य चात्मानं यक्षवित्तः पतत्यधः ॥ २४
व्यर्थयार्थेहया वित्तं प्रमत्तस्य वयो बलं कुशला येन सिद्ध्यंति जरठः किं नु साधये ॥ २५ क
स्मात्संक्लिश्यते विद्वान्व्यर्थयार्थेहयासकृत् कस्यचिन्मायया नूनं लोकोयं सुविमोहितः
किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत मृत्युनाग्रस्यमानस्य कर्मभिर्वोत जन्मदैः ॥ २७ ॥

नं च असंविभज्य अन्नादिभिरसंतर्प्य ॥ २४ एवं विमृश्यानुतप्यमान आह व्यर्थयार्थेहयाप्रमत्त
स्य मम वित्तादिगतमिति शेषः येन वित्तादिना कुशलाः विवेकिनः सिद्ध्यंति मुच्यंते जरठो वृद्धः २५
अन्योपि मद्वत् शोचति कस्मादेवमनर्थे विद्वानपि संक्लिश्यतेत्यत्र कारणं संभावयति कस्यचिदिति २६
न तु नाय योहितः क्लिश्यति किं तु धनादिभि भोगादि विवक्षया अत आह किं धनैरिति उत पुनरपि २७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इदानीं संपन्नविवेकः स्वल्पायुष्यं ननु नाहं ननु नमिति विपेनस्थी नेनात्मनः अवद्रूपो निर्वेदस्य भवतिसहरिमे
स्तंनस्थीन इति ॥ २८ ॥ अंगश्रोतव्यिष्येन पसा पृष्टाविपयालय नेष्यामि यदि स्यात्तु कालावशेषस्तत्तोमेप्येवः
सिद्धस्तु यः सन् अखिलेस्वार्थे धर्मादि साधने अप्रमत्तः सन् ॥ २९ ॥ अनुमोदेस्व अनुगहात्तु न नु देवैर निमो
दितोपि न १८ः स्वल्पेन कालेन किं साधयिष्यामि न या हमुहूर्तेनेति ॥ ३० ॥ अभिप्रेत्य निश्चित्य मं अवितिदेशेः

नु२ :

स्नेतेभगवांस्तु हः सर्वदेवमयो हरिः ॥ येनैतो दशामेनां निर्वेदः श्चात्मन लवः ॥ २५ ॥ सोहं काला
वशेषेण शोषयिष्ये गमात्मनः ॥ अप्रमत्तोखिलस्वार्थे यदि स्यात्सिद्ध आत्मनि ॥ २६ ॥ ततो मामनु
मोदेरन् देवास्त्रिभुवनेश्वराः ॥ मुहूर्तेन ब्रह्मलोकं खट्वांगः समसाधयत् ॥ २७ ॥ श्रीभगवानुवाच ।
इत्यभिप्रेत्य मनसा ह्यावंत्यो द्विजसत्तमः ॥ उन्मुच्य हृदयग्रंथीन् शांतो भिक्षुरभून्मुनिः ॥ २८ ॥
स चचार महीमेतां संयतात्मेंद्रियानिलः ॥ भिक्षार्थं नगरग्रामानसंगोलक्षितोविशत् ॥ २९ ॥ तं वै
प्रवयसं भिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वा पर्यभवन्भद्र बह्वीभिः परिभूतिभिः ॥ ३० ॥ केचित्त्रिवेणुं
जगृहुरेके पात्रं कमंडलुं ॥ पीठं चैके क्षसूत्रं च कंथां चीराणि केचन ॥ ३१ ॥ प्रदाय च पुनस्तानि
दर्शितान्याददुर्मुनेः ॥ ३२ ॥

भवः स्वहृदयग्रंथीन् अहंकारममकारान् अभ्यस्तः आसक्तिमून्यअलक्षितः श्रेष्ठमनुद्योतन्
२९ भवन्त संहहंअवधूतमलिनंपर्यभवन् ॥ अवमेनिरे हे भद्र परिभूतिभि स्तिरस्कारैः ॥ ३० ॥ परिभवा
नेवदर्शयति केचिदिति सप्तभिः ॥ भो भगवन् गृहाणेति दर्शितानि संति प्रदाय पुनः आददुः ॥ ३१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शेनैक्रयंति मूर्धनि चष्ठीवंति फूत्कारेणाचेत्यस्माणं प्रदीपंपति ॥ २५ ॥ दीपंपति निरंतरति निद्रामेवाह एष धर्मध्वजः विडं
डलिंगोपजीवी शठो लोकवंचकः ॥ २६ ॥ २७ ॥ तदेवाह । त्रीणि विनश्यति महासारः प्रतिबली ॥ २८ ॥ दुर्यातं पतितं उप
र्धो वा नंतस्तु चति ॥ २९ ॥ वंधकः शृंखलैः निरुक्षकः कारागृहादिशुद्धिजंस्तु कशादिकादि यया भोनिकं दुर्गनादि

पूर्वंबद्धेस्त्यसंपन्नंभुंजानस्यमरित्स्थिते मत्रयंतिवपापिष्ठाः ष्ठीवंत्यस्यचमूर्धनि ॥ २५ ॥ य
तवायंवावयंतितानुयंतिनवाक्किंवत । तर्जयंतिपरेवाधिभेलनोयमितिवादिनः ॥ २६ ॥ व
धंतितुवानंकेविहथ्यतांवध्यतामिति । दीपंत्यकेवजानंतिएषधर्मध्वजः शठः ॥ २७ ॥
त्रीणिविनश्यंत्यावृत्तिमग्रहीत्स्वजनोज्झितः प्रतोपएषमहासारोधृतिमास्थितसात्विकीं ॥ २८ ॥
मौनेनसाधयत्यर्थंवकवद्दृढनिश्चयः इत्येकेविहसंत्येनमेकेदुर्यातंपतितिवा ॥ २९ ॥ तं
वंधवःनिरुक्षकर्मयथाक्रीडनकंद्विजं एवंसभौतिकंदुःखंदैहिकंदैविकंचयत ॥ ३० ॥
भोक्तव्यमात्मनोदिष्टंप्राप्तंप्राप्तमबुध्यत । परिभूतइमांगाथामगायतनराधमैः
॥ ३१ ॥ पातयद्भिः स्वधर्मस्थोधृतिमास्थायसात्विकीं ॥ ३२ ॥ ॥
॥ ॥ ॥

कृतं दैहिकं ज्वरादिनिमित्तं दैविकं शीतोष्णादिप्रभवं ॥ ३० ॥ दिष्टं दैवप्राप्तं धर्मात्पातयद्भिः परिभूतोपि सात्विकीं धृतिमा
स्थाय स्वधर्मे व्यवस्थितः इमां वक्ष्यमाणां गाथामगायत सात्विकी धृतिश्चोक्ता ॥ धृत्या यया धारयते मनः प्राणेंद्रियक्रि
याः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकीति स्मृतेः ॥ ३१ ॥

तमवंति २

श्री भाग टी ११

नामेवाष्टादशश्लोकीं गाथामाह नायमिति त्रयेण जनः अपि भूतादि दैवतानां इन्द्रादि आत्मा देहः ग्रहाः सूर्यादयः कर्म
दृष्टादि सुखदुःखहेतवो न वा आत्मनापि ग्रहादयः मनः केवलं सुखदुःखयोः कारणं वदंति मनसा ह्येव पश्यति मन
सा शृणोतीत्याद्याम्नायः ॥ ४३ ॥ परिवर्तनप्रकारमेवाह मन इत्यादि गुणान् गुणवृत्तीः सृजति ततस्तेभ्यो गुणेभ्यः शु
क्लानि सात्विकानि कृष्णानि तामसानि लोहितानि राजसानि सवर्णाः सवर्णानि कर्मानुरूपाः सृतयो देवतिर्यङ्नरादिजाता ८४
यः ॥ ४४ ॥ ननु हि मनस एव संसारः स्यात् आत्मन इत्याशंक्याह अनीह इति अयमर्थः अविद्यया मनोऽध्यासेन य आत्म

श्रीब्राह्मण उवाच ॥ नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः ॥ मनः परं
कारणमामनंति संसारचक्रं परिवर्तयेद्यत् ॥ ४३ ॥ मनो गुणान्वै सृजते बलीयस्ततश्च कर्मा
णि विलक्षणानि ॥ शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवंति ॥ ४४ ॥
अनीह आत्मा मनसा समीहता हिरण्मयो मत्सख उद्विचष्टे ॥ मनः स्वलिंगं परिगृह्य
कामान् जुषन्निबद्धो गुणसंगतोऽसौ ॥ ४५ ॥

॥ ॥ ॥

स्यैस्य १ प्राक्ति २ समी १

नः संसृतिर्न स्यात् ततः पतत्यत्र हि तस्यैव सा नास्ति किं तु तद्धतो जीवस्यैवेति भेदं तदाह मनसा समीहमानेन सह हि नियंतैव
न वर्तते सा नोऽपि परमात्मा अनीहः तत्क्रियासंगरहितः यतो हिरण्मयः विद्योपधानः ॥ कुतो यतो मत्सखः एवं मम जीव
स्य सखा नियंता अभूत उत अतः उद्विचष्टे श्रुतियाहितज्ञानेन केवलं पश्यतीत्यर्थः असौ पुनरहं जीवः स्वलिंगं स्वास्मिन्ना
त्मनि लिंगयति ज्ञापयतीति यो तमधिकृत्य संसारमिति तथा तं मनोऽपि परिगृह्य आत्मत्वेन स्वीकृत्य तस्य मनसो गुणैः कर्मभिः संग
तः संबद्धः गुणसंगात् कामान् जुषन्निबद्ध इति ॥ ४५ ॥ ॥ १११

तू२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

व्रतो मनोनिग्रहे कृते सर्वं कृतं स्यान्न विनानुसर्वं व्यर्थमित्याह दानमिति द्वाभ्यां स्वधर्मः नित्यनैमित्तिकः सद्व्रता
न्येकादश्युपवासादीनि। अन्यानि वयावृत्तिकर्माणि एते सर्वे उपाया मनोनिग्रहलक्षणा अन्तो निष्ठा फलं ये
षां ते तथा ननु ज्ञानांगत्वं तेषां प्रसिद्धं तत्राह मनसः समाधिर्निग्रह एव परो योगो ज्ञानांगं ॥४५॥ अतो यस्य मनः समाहि
तं भवति तस्य किं कृत्यमस्ति वदेति परं प्रत्युपदिशन्निव स्वयमेवाह असंयतं विक्षिप्तं चेत् यद्वा विनश्यत् आ
लस्यादिना लीयमानं चेत्तर्हि एभिः दानादिभिः किमपरं प्रयोजनं स्यान्न किंचिदित्यर्थः ॥४६॥ नन्विन्द्रियजयः प्रयो

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि ॥ सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो म
नसः समाधिः ॥४५॥ समाहितं यस्य मनः प्रशान्तं दानादिभिः किं वद तस्य कृत्यं असंयतं यस्य मनो
विनश्यद्दानादिभिश्चेदपरं किमेभिः ॥४६॥ मनोवशेऽन्ये ह्यभवंस्तु देवा मनश्च नान्यस्य वशं समेति
भीष्मो हि देवः सहसः सहीयान्युञ्ज्याद्वशे तं स हि देवदेवः ॥४७॥ तं दुर्जयं शत्रुमसह्यवेगमरुन्तुदं तन्न वि
जित्य केचित् ॥ कुर्वन्त्यसद्विग्रहमत्र मर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ॥४८॥

जनं स्यान्नेत्याह मनोवश इति देवा इन्द्रियाणि तदधिष्ठातारो वा भीष्मः ॥ योगिनामपि भयंकरो मनुलक्षणो दे
वः ऊतं सहसः बलादपि बलिनोऽपि वा सहीयान् बलीयान् तेन तं यो वशीकरोति नेऊ योऽस्मिन्नेव देवदेवः सहसः सही
यानिति ॥४७॥ अत्र असह्यवेगाद्युद्धे गायस्य तेऽस्य केनुदं अरुन्तुदं मर्ममन्तुदति व्यथयतीत्यरुन्तुदः तं ज्ञात्वेति केदः
तं दुर्विजित्य अजितात्मानः ये केचित्तैः कैश्चिदसद्विग्रहं कुर्वन्ति तच्चानुकूलप्रतिकूलादीनन्यान्मित्रादीन्
ना। कुर्वन्तीति मूढा इत्यर्थः ॥४८॥

अनत्व ३

सर्वेन्द्रियजेता भवति नान्यः तथा च श्रुतिः मनसैव श्रोसर्वमिदं वभूव नान्यस्य मनो वशमन्वियाय भीष्मो हि देवः २॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननस्मुतेभ्रमेनेनप्रकारेणसंसारेभ्रमंतीत्याहदेहमितिमनोमात्रपरिकल्पितमिमंस्वदेहंमाहदेहमितिपुत्रादिदेहं
चममेतिसंवीकृत्यतमसिसंसारे ॥४९॥ तदेवंमनसएवसुखदुःखकारणत्वमुपपाद्येदानींजन्मादीनांषण्णाम
कारणत्वंप्रपंचयतिजनस्त्विति अत्रत्वास्मिन्नपिपक्षेआत्मनःकिंनदिंविनष्टंसुखदुःखकर्मत्वंनतुकर्तृत्वंचेत्य
र्थःकुतइत्यतआहनिमित्तंहभौमयोर्भूविकारयोर्देहयोस्तत्तुनत्वात्मनःअप्राप्तेस्याक्रियस्यचहननादि
सुकर्मत्वंकर्तृत्वंवानुपपत्तेःतथापिदुःखमात्मपर्यवसाय्येवेतिचेत ॥ एवमपिपरमात्मनःउभयत्राप्येक

देहंमनोमात्रमिमंगृहीत्वाममाहमित्यंधधियोमनुष्याः ॥ एषोहमन्योयमितिभ्रमेणदुरंतपारेत
मसिभ्रमंति ॥४९॥ जनस्तुहेतुःसुखदुःखयोश्चेत्किमात्मनश्चात्रहभौमयोस्तत् ॥ जिह्वांक्वचित्सं
दशतिस्वदद्भिस्तद्वेदनायांकतमायकुप्येत ॥५०॥ दुःखस्यहेतुर्यदिदेवतास्तुकिमात्मनस्त
त्रविकारयोस्तत् ॥ यदंगमंगेननिहन्यतेक्वचित्क्रुध्येतकस्मैपुरुषःस्वदेहे ॥५१॥

त्वात्कोपिविषयोनास्तीतिस्वदष्टांतेनदर्शयतिजिह्वामिति ॥५०॥ यदिदेवताख्यास्तुतामतत्रापिपदे
आत्मनःकिंयतोविकारयोर्विक्रियमाणयोर्दैवतयोस्तद्दुःखंनतुविभिहितेतेनवाहस्तेदष्टेटमिमा
निनोर्वंहींद्रयोरेवतत्तत्वविक्रियस्यानहंकारस्यचात्मनःदेवतानांचसर्वदेहेष्वभेदात्कोपिविष
योनास्तीतिस्वदेहदृष्टांतमाहयदंगमंगंदेवताधिष्ठानंहस्तमुखादिकंअतएवस्वत्रदेवताधिष्ठानंदूप
भूविकारदत्तोदाहरणं ॥५१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आत्मनः सुखदुःखाद्याकारः परिणामः॥ अतः स एव हेतुः। यदि स्यात्तत्र तस्मिन्नपेते अन्यतः किं न किं
चित्। अन्यतो भवति यस्मै कुप्येतेत्यर्थः॥ यतो निज एव स्वभावः सतत्त्वात्मनः तथाऽयं परिणामो निमि न्य२
त्ततो भवति॥ अतोऽस्ति कोऽपि विषय इति चेत्तत्राह नहीति आत्मव्यतिरिक्तं नास्त्येव यदि स्यात्तत्र अस्ती
ति प्रतीयेन नहि तन्मृषैव अतः कस्माद्धेतोः कुप्येत॥ यतो नास्ति निमित्तं न च सुखदुःखं चेत्यर्थः ५१

आत्मा यदि स्यात्सुखदुःखहेतुः किमन्यतस्तत्र निजः स्वभावः॥ न ह्यात्मनोऽन्यद्यदि तन्मृषा
स्यात्कुप्येत कस्मान्न सुखं न दुःखम्॥ ५२॥ यद्वा निमित्तं सुखदुःखयोश्चेत्किमात्मनोऽत्र स
जनस्य तेन वै॥ ग्रहैर्ग्रहस्यैव वदन्ति पीडां कुप्येत कस्मै पुरुषस्ततोऽन्यः॥ ५३॥ ॥

ग्रहपक्षे यजस्यात्मनः॥ किं यतोऽजन्यत इति जनो देहस्तस्यैव जन्मलग्नापेक्षया द्वादशावस्थादिराशि
स्था ग्रहास्ते सुखदुःखयोर्निमित्तं भवन्ति किंच अंतरिक्षस्थैर्ग्रहैः तत्रस्थस्य ग्रहस्यैव पादार्थादिदृष्ट्या
दिभेदैः पीडां वदंति दैवज्ञाः॥ न तु ग्रहकोणादि बुस्थितस्य ततः स्वगोचरस्य पुरुषस्य ग्रहस्यैव तु पीडा
न तु स्यात्मनः देहेन तस्याभिमानाद्भवति अतः॥ पुरुषस्ततो ग्रहा देहाद्वाऽन्यः कस्मै कुप्येत॥ ५३॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ ए॰ प॰ टी॰ ॥ऊ

कर्मैव हेतुरस्त्विति पक्षस्योपगमः कर्मैव नास्ति कुतस्तस्य हेतुत्वमिति तदाह द्वितीयस्मात् तत्र क-
र्मैक कस्य जडस्य जडत्वे सति स्यात् जडत्वाद्धि कारित्वोपपत्तेः अजडत्वाद्विहितानुसंधानतः प्रवृत्तिसंभवा-
त् अचित् जडो देहः अतः तस्य प्रवृत्तिर्न संभवति पुरुषस्तु सुवर्णः शुद्धज्ञानस्वरूपः अतः कस्मै क्रुध्येत
यतः सुखदुःखयोर्मूलभूतं कर्मैव नास्तीति ॥५४॥ तत्र कालपक्षेपि आत्मनः किंयतोसौ कालात्मक एव

कर्मास्तु हेतुः सुखदुःखयोश्चेत् किमात्मनस्तद्धि जडाजडत्वे । देहस्त्वचित्पुरुषोयं सुवर्णः क्रुद्ध्ये-
त कस्मै न हि कर्ममूलं ॥५४॥ कालस्तु हेतुः सुखदुःखयोश्चेत् किमात्मनस्तत्र तदात्मकोऽ-
सौ ॥ नाग्नेर्हि तापो न हिमस्य तत्स्यात् क्रुद्ध्येत कस्मै न परस्य द्वंद्वं ॥५५॥ ॥

समाह २

वह्नेरंशत्वात् तदंशस्य स्वतः पीडा नास्तीत्यत्र दृष्टांतः ॥ नाग्नेर्हितोऽत्र तदंशस्य ज्वालादेस्तापो दाहः
तेनाशोस्ति तथापार्थिवभूतकांशांशस्यादेस्तत्राशः ॥ स्यादिति दृष्टांतांतरं हिमस्य तत् शैत्यं तदंशस्य
वा षारकणस्य नाशकं न स्यादित्यर्थः ॥ किं च आत्मनोंशत्वं वस्तुतः परस्यैवायं ॥ नत्वपरस्य द्वंद्वं सु
खदुःखादिकमस्तीति ॥५५॥ ॥
॥

राम ॥ऊ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न देवपदेन हेतवः प्रसिद्धा निरस्ताः यदि कश्चिदेवं तर्कयेत्तदपि वस्तु महिमा पद्मायां न संभवतीत्याह न केवि
ति निरूपयेद्वः कथमपरूपं तेनेत्याह यथेति संसृतिमविद्यमानामेव रूपयति प्रकाश्यमीति नत्याऽनस्याहमः अहंका
रस्य यथास्मात्तत्वतत्थायारतः प्रकृतेः परस्यात्मनो द्वंद्वसंबंधः अहंकारनिमित्तोऽसौ न वास्तव इत्यर्थः एवं प्रबुद्धो यः स
भूतैः कृतान्न बिभेति निर्भयमन्यत्र कुत्रापि प्राप्नोतीत्यर्थः॥५६॥ ५७ अतोहमप्येतयैव परमात्मनिष्ठया तरिष्यामी
त्याह एतामिति साहमित्यन्वयः। ना तियं निष्ठैव च कथं भवेत्तदाह मुकुंदेति प्रस्तावनमाह गाथायांसंक्षेपतो दर्शय

न केनचित्क्वापि कथंचनास्य द्वंद्वोपरागः परतः परस्य। यथाऽहमः संसृतिरूपिणः स्यादेवं प्रबुद्धो न बिभेति
भूतैः॥५६॥ एतां स आस्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महर्षिभिः॥ अहं तरिष्यामि दुरंतपारं तमो
मुकुंदांघ्रिनिषेवयैव॥५७॥ श्रीभगवानुवाच॥ निर्विद्य नष्टद्रविणो गतक्लमः प्रव्रज्य गां पर्यटमान इत्थं
निराकृतोऽसद्भिरपि स्वधर्मादकंपितोऽमुं मुनिराह गाथां॥५८॥ सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्र
मः मित्रोदासीनरिपवः संसारस्तमसः कृतः॥५९॥ तस्मात्सर्वात्मना तात निगृहाण मनो धिया मय्या
वेशितया युक्त एतावान्योगसंग्रहः॥६०॥ य एतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः धारयन्छ्रा
वयन्छृण्वन्द्वंद्वैर्नैवाभिभूयते॥६१॥ इति श्रीभागवते एकादशस्कंधे त्रयोविंशोऽध्यायः॥२३॥

ति हाभ्यामित्थं नष्टद्रविणो निर्विद्य गतक्लमः प्रव्रज्य गां पर्यटन्नसद्भिर्निराकृतोऽपि स्वधर्मादकंपितः सन्मु
निरमुं गाथामगायतेत्यन्वयः ५८ मित्रोदासीनरिपवः सर्वोऽपि च संसारः तमसः अज्ञानतः आत्मनो मनसो
विभ्रममात्रः न तात्त्विक इत्यर्थः ५९ उक्तं द्वंद्वसहनोपायमुपसंहरति तस्मादिति ६० मनोनिग्रहाशक्तोऽप्ये
तच्छ्रवणादिभिः तत्फलं प्राप्नोतीत्याह य एतामिति द्वंद्वैः सुखदुःखादिभिः॥६१॥ भिक्षुगीतमिषं कृत्वा भक्तिचिह्नगतेह
विः मोहं निद्रु [illegible] वि [illegible] भाति परमानंदरूपतः॥ इति श्री एकादशे त्रयो

विंशः २३

हा १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा प टी ११

चतुर्विंशे तु सांख्येन मनो मोहान्निवार्यते आत्मनः सर्वभावानामागमापायि विनया। १ स्वपदं द्वंद्वभक्तानाम द्वंद्वनायसे।
यम विज्ञस्योक्ता पुनः कृत्स्नं सांख्यमत्राह तत्कृते। अद्वितीयात्परमात्मनो मायया प्रकृतिपुरुषद्वारा संवेदैतमुदेति
[illegible] पुनस्तत्रैव लीयत इत्यनुसंदधानस्य द्वंद्व भ्रमो निवर्तत इति वक्तुं सांख्य प्रश्नो निश्चयति पूर्वैः कपिलादिभिः वि
निश्चितं वैकल्पिकं भेद निमित्तं भ्रमं सृष्टिव्यवहारादिरूपं। १ अथो आद्यः कार्त्स्न्येन ज्ञानेन दृष्टान्तेन स्वरूपे कृत्स्नोऽप्यर्थः अवि
कल्पितं विकल्पशून्यं एकमेव ब्रह्म एव लीनमासीदित्यर्थः कदेत्यपेक्षायामाह अयुगेषु युगेभ्यः पूर्वं प्रलय इत्यर्थः

श्रीभगवानुवाच अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितं यद्विज्ञाय पुमान्सद्यो जह्याद्वैकल्पिकं भ्रमं। १ आ
सीज्ज्ञानमथो अर्थ एकमेवाविकल्पितं यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे। २ तन्मायाफलरूपेण केवलं
निर्विकल्पितं वाङ्मनोऽगोचरं सत्यं द्विधा समभवद्बृहत्। ३ तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका। प्र ३
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते ४ तमो रजः सत्त्वमिति प्रकृते
रभवन्गुणाः मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च
॥५॥

तथा आदौ यत्कृतयुगं तस्मिन्नन्यदापि यदा विवेकनिपुणा जना भवंति तदापि तेषां भेदस्फूर्तेः॥ २ बृहद्ब्रह्म वाङ्मा
नोऽगोचरं यथा भवति तथा मायादृश्यं फलं तत्प्रकाशात्मरूपेण मायाविलासरूपेण च द्विधाभूत ३ तयोर्द्विधाभूत
कृ योर्मध्ये उभयात्मिका कार्यकारणरूपिणी प्रकृतिरभवत् अभिव्यक्ता बभूव ४ मया परमेश्वरेण जीवादृष्टप्रयुक्तेन पुरु
षः पुरुषानुमतं यद्वा स्वस्यैव प्रकृतौ उदासीनरूपायाः पुरुषाय स्यात् तदनुमतेन तद्द्वारेणेत्यर्थः॥५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सूत्रं क्रियाशक्तिमान् प्रथमो विकारः । ततो महान् ज्ञानशक्तिः [illegible] ननु एकस्य महता-
नेव प्रथमो विकारः प्रसिद्धः तत्राह । स च ज्ञानक्रियागर्भत्वात् सूत्रेण संयुतः न पृथगेकमेव तत्त्वं क्रि-
याज्ञानशक्तिभ्यां द्विधोच्यत इत्यर्थः । विमोहनः जीवस्य भ्रमहेतुः स जातः ॥९॥ यतस्तन्मात्रादीनां का-
रणं मनः शब्देन देवानामप्युपलक्षणं चिदचिन्मयः चिदाभासव्याप्तत्वादुभयग्रंथिरूप इति जीवो-
पाधित्वं दर्शितं यद्यपि तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिश्रुतेः अन्नमयं सोम्य मन इ-

तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः । ततो विकुर्वतो जातो योऽहंकारो विमोहनः ९
वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् । तन्मात्रेंद्रियमनसां कारणं चिदचिन्मयः १

त्यादिश्रुतेस्तेभ्यश्च संभूतानि तानि पंचैतेभ्यः चापंचीकृतेभ्यः प्राणादिक्रमेण समष्ट्यात्मकं लिंगशरी-
रं पंचीकृतेभ्यस्तु ब्रह्मांडं तस्मिन्वैराजस्तदंतर्यामी लीलाविग्रहः क्षीराब्धिशायी श्रीनारायणः तन्नाभि-
पद्मे च वैराजस्य भोग्या ये विग्रहः स्वतंत्रानंतः तृतीयच्छावसरसमन्येषां जीवानामाविर्भाव इति प्रक्रिया
तथापि चिज्जाभिव्यक्तिपूर्वकोऽहंकारस्ततो भूतेंद्रियादिव्यवहार इत्येतावता महदादिक्रमेण सृष्टिरु-
क्ता तेन यथा चोक्तं मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्या चोदितान्यथा उपायः सोऽवताराय नास्ति भेदः कथंचन

२ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री। भाग टी। ११५

तस्माच्चित्रिविधात्रिविधोत्पत्तिंदर्शयति॥ अर्थइति तन्मात्रविकारात् शब्दादितन्मात्रकारणान्तामसादहङ्कारात्पोंमहाभूतजन्नजोजनेवृभूतभूतानामावरणस्वभावत्वात् इंद्रियाणिदशतैजसात्तेषांप्रवृत्तिस्वभावत्वात्सात्त्विकाद्देवतादिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेंद्रमित्रकाः वृद्धस्त्वेत्येकादशच शब्दात्मनश्चतेषांप्रकाशस्वभावत्वात्॥८॥ समस्तैराजानत्यामिणः॥९॥ सलिलेसंस्थितिर्यस्य तत्सलिलसंस्थितिः तस्मिन्सलिलसंस्थितावंडेश्रीनारायणरूपोलीलाविग्रहेणसमभवंस्थितइत्यर्थः वि

अर्थेस्तन्मात्रविकाज्जतेनामसादिंद्रियाणिच॥ तैजसाद्देवताआसन्नेकादशचवैकृतात्॥८

मयासंचोदिताभावाः सर्वेसंहत्यकारिणः॥ अंडमुत्पादयामासुर्ममायतनमुत्तमं॥९

तस्मिन्नहंसमभवमंडेसलिलसंस्थितौ॥ ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः॥१०

सोसृजत्तपसायुक्तोरजसामदनुग्रहात्॥ लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रि टि२

धा॥११॥ देवानामोकआसीत्स्वर्भूतानांचभुवःपदं॥ मर्त्यादीनांचभूर्लोकःसिद्धानांत्रित

यात्परं॥१२॥ अधोसुराणांनागानांभूमेरोकासृजत्प्रभुः॥१३ ॥

श्वाख्यंलोककारणभूतंतत्रचात्मभूर्ब्रह्मातत्स्थानरूपभोगविग्रहेणपुनर्वैराजएवतस्मिन्नाविर्भूतइत्यर्थः॥१०॥ रजसायुक्तोमदनुग्रहात्तपसासृजत् भूःअतलादिसहितोभुवः अंतरिक्षलोकःस्वःस्वर्गः महर्लोकादेरप्युपलक्षणं॥११॥ लोकसृष्टिप्रयोजनमाह देवानामितिसार्द्धेनओकोनिवासःपदंस्थानंत्रितयात्परंमहर्लोकादिभूमेरधःअतलादि॥१२॥ ॥

राम। ११५

यदेवंव्यवस्थायांकारणमाहसोऽहंनत्रिलोक्यांपातालादिसहितायांयोगादितारतम्येनयथोत्तरंमहर्लोकादयः
मद्गतिर्वैकुंठलोकः ।।१३।। तत्रतुमज्जतिव्यतिरेकेणनरागतयश्चंचला इत्याह वैराग्यार्थंमयाकालशक्तिनाधा
त्रापरमेश्वरेणाकर्मफलप्रदेनहेतुभूतेनगुणप्रवाहेसंसारेऽन्मज्जतिप्राप्तस्वर्लोकसुखमागतीःप्राप्नोति
पुनर्निमज्जतिप्राप्यावरनीचागतीःप्राप्नोति ।।१४।। सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्त्यर्थत्वात्तत्त्वत्र।

त्रिलोक्यांगतयःसर्वाःकर्मणांत्रिगुणात्मनां योगस्यतपसश्चैवन्यासस्यगतयोमलाः ।।१३।। म
हर्जनंतपःसत्यंभक्तियोगस्यमद्गतिः ।। मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत् ।।१४ गुण
प्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति ।। अणुर्बृहत्कृशःस्थूलोयोयोभावःप्रसिध्यति ।।१५।। स
र्वोप्युभयसंयुक्तःप्रकृत्यापुरुषेणच ।। यस्तुयस्यादिरंतश्चसवैमध्यंचतस्यसन् ।।१६।। विकारोव्य
वहारार्थोयथातैजसपार्थिवाः ।।१७ ।।।

तिपादनायकारणोन्यकार्यस्यप्राप्तिमाहअणुर्बृहदिति उभयेनसंयुक्तोव्याप्तः तदेवाहप्रकृत्येति ।।१५।। इदानींका
र्यस्यकारणात्मतांदर्शयतियस्यकार्यस्ययआदिःकारणमंतःलयस्थानंचतस्यमध्यंमध्यावस्थापिसएववैप्र
सिद्धंसत्त्वाणादिषुअनृतएवाव्यभिचारितात्सएवसत्त्वेनतरः अंतर्हिमिथ्याभूतकार्यस्वरूपात्तत्राहविकारइति
तैजसाःकटककुंडलादयःपार्थिवाःघटशरावादयस्तद्ययेति ।।१६।।।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नैवं तर्हि सर्वकार्यं प्रति महदादीनामप्युपादानत्वात्सत्यत्वं स्यात्तत्राह यदिति यद्रूपमुपादाय यदुपादानकारण
तया स्वीकृत्य पूर्वः कारणरूपो महदादिर्भावः परमहंकारादिकं भावं विकुरुते सृजति यथा पिंडो मृदमुपादाय
स्वयं निमित्तभूतो घटं सृजति तद्वत्तस्यैवमसत्त्वमिति [illegible] पूर्वस्यानुषंगः कथं तर्हि मृत्तिकेत्येव सत्यमित्यादिश्रु
तिस्तत्राह आदिरिति यद्यदा यस्यादिरंतश्च विद्यते तत्तस्य सत्यमभिधीयते अतः परमकारणस्यात्मनः सत्यत्व
मित्यर्थः ॥१७॥ ननु तथापि सर्वकारणमिथ्यात्वे प्रकृतिमहापुरुषकालानामकार्यभूतानां भिन्नत्वात्कथमद्वि
तीयत्वं तत्राह प्रकृतिरिति अस्य सतः कार्यस्योपादानं या प्रकृतिः अभिद्रायश्च तस्याः आधारः पुरुषः य

वि२

यदुपादाय पूर्वस्तु भावो विकुरुतेऽपरं आदिरंतो यदा यस्य तत्सत्यमभिधीयते ॥१८॥ प्रकृतिर्यस्योपा
दानमाधारः पुरुषः परः सतोभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहं ॥१९॥ सर्गः प्रवर्तते तावत्पौर्वापर्ये
ण नित्यशः महान्गुणविसर्गार्थः स्थित्यंतो यावदी॥
क्षणं ॥२०॥ ॥

बृहत् १

गुणक्षोभेणाभिव्यंजकः कालः तत्त्रितयं ब्रह्मैवाहं न तु पृथक् यतः प्रकृतेः शक्तित्वात् पुरुषकालयो स्वस्वा
रूपत्वात् ॥१९॥ एवं तावत्कालत्रयेप्यव्यभिचारित्वाद्ब्रह्मैव सत्यमिति वक्तुं तस्य सृष्टिकारणत्वेनाद्यंतसत्यमुक्तं मध्येपि
तस्यैव सत्यत्वमुपपादयन्स्थितेरवधिनैव सत्यत्वं दर्शयितुं सर्गप्रवाहरूपायाः स्थितेरवधिमाह सर्ग इति महा
न्बहुलः पौर्वापर्येण पुत्रपौत्रादिरूपेण नित्यशः अविच्छेदेन प्रवर्तते तदाह गुणैर्देहैः विविधतया
सृज्यत इति गुणविसर्गो जीवः तदर्थस्तद्भोगप्रयोजनः किं पर्यंतं प्रवर्तते यावत्स्थित्यन्तः सोपि किमवधिस्तदाह
यावदीक्षणं श्रीपरमेश्वरस्य ॥२०॥ ॥

प्रलयं निरूपयति विराड्ब्रह्मांडं मया कालात्मना ग्रास्यमानः आप्यमानः लोकानामद्रद्दः का
ल्परिच्छिन्नया विविधाः कल्प्यन्ते यस्मिन् तान्वा यस्मिन् विकल्पयतीति तथा सन् तथाभूतोपि पंचत्वं
रूपाय विशेषाय कल्पते योग्यो भवति ॥ पंचानां भूतानामैक्यरूपः तेषां पृथग्भावाय पंचत्वाय न भव
तीत्यर्थः ॥२०॥ तत्र तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निः ॥ अग्नेरापः
अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधिभ्योन्नं अन्नात्पुरुष इति सृष्टिक्रमः प्रतिलोम्येन प्रल
यमाह ॥ अन्न इति मर्त्यं शरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्ट्या क्षीणे सति तन्नैव लीयत इत्यर्थः

विराण्मय आसाद्यमानो लोककल्पविकल्पकः ॥ पंचत्वाय विशेषाय कल्पते भुवनैः सह २०
अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते ॥ धाना भूमौ प्रलीयन्ते भूमिर्गंधे प्रलीयते ॥२१॥ अप्सु प्रली
यते गंध आपश्च स्वगुणे रसे ॥ लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते ॥२२॥ रूपं वायौ स च स्प
र्शे लीयते सोपि चांबरे ॥२३॥ ॥

अन्नं धानासु बीजमात्रावशेषं भवतीत्यर्थः धाना भूमौ तु मानप्ररोहंतीत्यर्थः ॥ भूमिर्गंधे संवर्तकादित्य
शोषितायाः संकर्षणमुखाग्निनादग्धायाश्च सती भूतस्सूक्ष्मरूपगंधमात्रावशेषा भवति ॥२१॥ अप्सु गंधः शत
वर्षं यावद्वृष्ट्या आप्यमानासु लीयत एवमेवापश्च ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति ततो रसो
पि तस्मिन् लीयते ॥२२॥ ज्योतिश्च वायुना अभिभूयमानं रूपमात्रं सत् तस्मिन् लीयते वायुश्च कालप्रेरितेना
वरेणाप्यसन् स्पर्शमात्रः संस्तस्मिन् ॥२३॥ ॥ ॥ राम ॥ राम ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी ॥१८

नस्तु

एवं भूतादिनाहंकारेण ग्रस्यमानेन शब्दतन्मात्रेण देवं तामसाहंकारकार्यस्य शब्दपर्यन्तेन लयमुक्त्वा राजसा हंकारकार्यस्याप्याह ॥ इंद्रियाणि स्वयोनिषु तिसृषु वैकारिकदेवतासु तेषां प्रकाशस्वभावत्वात् प्रकाशस्य देवताधीनत्वात्कर्मसु लय इति वा वृत्तिः वस्तुतस्तु कारणे राजसाहंकारे लयो अभिप्रेतः ॥२२॥ योनिरिति वृत्तिद्वयगतत्वादेकत्वमविवक्षितं योनयो देवतास्तु मनसि ऊन ईश्वरे नियंतरि मनोवशे मय्येश्वरे भवन्नस्मदेवा इत्युक्तत्वात् इंद्रियलयोक्त एवाज्ञाप्यभिप्रायः ॥ मनस्तु देवताभिः सह वैकारिके अहंकारे इत्यर्थः तामसाहंका

एवं शब्दतन्मात्रं इंद्रियाणि स्वयोनिषु ॥ योनिर्वैकारिके सौम्य लीयते मनसीश्वरे ॥२३॥ शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः ॥ स लीयते महान्स्वेषु गुणेषु गुणवत्तमः ॥२४॥ तेऽव्यक्ते संप्रलीयन्ते तत्काले लीयतेऽव्यये २५ ॥

रकार्यावशेषस्य शब्दस्य लयमाह ॥२३॥ शब्दो भूतादिं तामसाहंकारं अप्येति तस्मिन् लीयत इत्यर्थः ॥ भूतादिरित्युपलक्षणं त्रिविधोप्यहंकारो महति जगदंशे विद्यायज्ञानक्रियाशक्तिमात्ररूपो भवति कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् स च महान्स्वकारणेषु ज्ञानक्रियाशक्तिमत्वात् गुणवत्तमस्तादृश स्वभावं विहाय गुणमात्ररूपो भवति ते अव्यक्ते प्रकृतौ साम्यावस्थां गच्छन्तीत्यर्थः तदव्यक्तं कालाधीनत्वात्तेनैकीभूयावतिष्ठते अव्यये उपरतवृत्तौ ॥२५॥ ॥

काले

राम ॥१८

मायामये मायाप्रवर्तके ज्ञानमये वा अतएव जीवयतीति जीवस्तस्मिन्महापुरुषे अयं भावः विश्व-
सृष्टौ महापुरुषस्यैव कारणरूपः ॥ कालोहंकारांशेन भोक्तृरूपश्च अतस्तदात्मनावतिष्ठत इति तदुक्तं सप्तमे
कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृदिति ॥ त्वय्यहमेव ॥ योयं कालस्तस्य तेव्यक्त-
बंधोः चेष्टामाहुः चेष्टते येन विश्वं ॥ निमेषादिर्वत्सरांतो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये इति ।
जीव आत्मनि प्र[illegible]कृतेर्लीनत्वेन मतियोग्यभावात् परिशुद्धेन सद्रूपेणावतिष्ठते आत्मा त्वात्मस्थ-

कालो मायामये जीवे जीव आत्मनि मय्यजे ॥ आत्मा केवल आत्मस्थो विकल्पापायलक्ष-
णः ॥ २७ ॥ एवमन्वीक्षमाणस्य कथं वैकल्पिको भ्रमः ॥ मनसो हृदि तिष्ठेत व्योम्नीवार्कोदये
तमः ॥ २८ ॥ एवं सांख्यविधिः प्रोक्तः संशयग्रंथिभेदनः ॥ प्रतिलोमानुलोमाभ्यां परावरदृ-
शा मया ॥ २९ ॥ इति श्रीभागवते दश[illegible]स्कंधे श्रीभगवदुद्धवसंवादे चतुर्विंशोध्यायः ॥ २४
एका

एवं नान्यत्र लीयते यतः केवलो निरुपाधिः अत्र हेतुः विकल्पापायाभ्यां विश्वोत्पत्तिलयाभ्यां लक्ष-
यते अधिष्ठानत्वेनावधित्वेन चेति तथा सः ॥ २७ ॥ कस्य कथनस्य प्रस्तुतोपयोगमाह एवमिति मनसः
कथं भेदनिमित्तो भ्रमः स्यात् वा न वा कथं हृदि तिष्ठेदिति ॥ २८ ॥ उपसंहरति एष इति ॥ २९ ॥ प्रत्यक्ष-
मिव येनेदं दर्शितं तत्त्वमात्मनः सांख्यप्रख्यानतस्तस्मै हरये गुरवे नमः ॥ १ ॥ इति श्रीभावार्थदी-
पिकायां दशमस्कंधे चतुर्विंशोध्यायः ॥ २४ ॥

श्री॰
भाग
पदी॰
११८

पंचविंशे त्वनेन गुणप्रवृत्तिपर्यन्तेन निरूप्यते ॥ चित्तप्रभवसत्त्वादिगुणवृत्तिरनेकधा ॥१॥ प्रकृतिपुरुषविवेक
ज्ञानवतोऽपि यावत्स्वयं तद्विशेषेण गुणत्रयवृत्तिजयो न स्यात्तावद्दुर्लभं परमः ॥ अतस्तज्जयोपायकथनाय
गुणवृत्तिनिरूपणार्थमाह ॥ गुणानामिति सह मिश्रीभूय वर्तमानाः संमिश्राः असंमिश्राः तेषां विभक्ता
नां मध्ये येन गुणेन यथा यादृशो भवेत् तदिदं कथयतो मत्तो निबोधेत्यर्थः ॥१॥ तत्र सत्त्ववृत्तीराह शमः
इति ईक्षा विवेकः तपः स्वधर्मवर्तित्वं स्मृतिः पूर्वापरानुसंधानं तुष्टिर्यथालाभसंतोषः त्यागो व्ययशीलत्वम्

नसमिश्राः १

श्रीभगवानुवाच ॥ गुणानामसमिश्राणां पुमान्येन यथा भवेत् ॥ तन्मे पुरुषवर्येदमुपधारय
शंसतः ॥१॥ शमो दमस्तितिक्षेक्षा तपः सत्यं दया स्मृतिः ॥ तुष्टिस्त्यागोऽस्पृहा श्रद्धा ह्रीर्दयादिः
स्वनिर्वृतिः ॥२॥ काम ईहा मदस्तृष्णा स्तंभ आशीर्भिदा सुखं ॥ मदोत्साहो यशःप्रीतिर्हास्यं
वीर्यं बलोद्यमः ॥३॥

स्पृहा वैराग्यं श्रद्धा आस्तिक्यं ह्रीः अनुचिते कर्मणि लज्जा दयादानं दयं दानं रक्षणे क्षितिस्मरणात्
आदिशब्देनार्जवविनयादि स्वनिर्वृतिः आत्मरतिः ॥२॥ रजसो वृत्तीराह कामाभिलाषः ईहा व्यापारः
मदो दर्पः तृष्णा लाभे सत्यप्यसंतोषः स्तंभो मानः आशीः धनाद्यभिलाषेण देवतादिप्रार्थनं [illegible]
सुखं भिदा अहं ममेति भेदबुद्धिः सुखं विषयभोगः मदोत्साहः मदेन युद्धाद्यभिनिवेशः यशःप्री
तिः स्तुतिः प्रियता हासः वीर्यं प्रभावाविष्कारः बलेनोद्यमः न्यायेनोद्यमः सात्त्विक एव ॥३॥ ॥

राम॰
११८

हास्यमुप॰

भ्रमस्य

नमो वृत्तीराह क्रोध इति क्रोधो मनसि हिंसुता लोभो व्यय पर द्रव्यग्रहणता अनृतं मिथ्या स्वीयमा भाषणं हिंसा द्रोहः याञ्चा प्रार्थना दंभो धर्मध्वजित्वं क्लमः श्रमः कलिः कलहः शोकमोहौ प्रसिद्धौ शोचनं विषादातीदुःखं दैन्यं वा निद्रा तंद्री प्रमीला दंभभविष्यतीत्यनंतरं भीर्भयमनुद्यमो नाम || ४ || अनुपूर्वशः क्रमेणैताः शोकत्रयोक्ताः वर्णित प्रायाः स्वप्नाप्रपत्यनुक्तं प्रायाः प्रयुक्त्यादित्य भावः || ५ || विभक्तानां गुणानां वृत्तयो वर्णिताः मिश्राणामाह सन्निपात इति त्रिभिः अहं ममेति च मतावुक्तं सर्वं वृत्तिसामानाधिकरण्यदर्शनात्सन्निपातजं तरं

क्रोधो लोभोऽनृतं हिंसा याञ्चा दंभः क्लमः कलिः शोकमोहौ विषादार्ती निद्राशाभीरनुद्यमः || ४ || सत्त्व
रजस्तमसश्चैतास्तमसश्चानुपूर्वशः वृत्तयो वर्णितप्रायाः सन्निपातमथो शृणु || ५ || सन्निपातस्त्वहं
मिति ममेत्युद्धव या मतिः || व्यवहारः सन्निपातो मनोमात्रेंद्रियासुभिः ६ धर्मे चार्थे च कामे च यदा
सौ परिनिष्ठितः || गुणानां सन्निकर्षोयं श्रद्धारतिधनावहः || ७ ||

तथा मम प्रीतिरस्ति कामः क्रोध इत्यादि र

हं धनिनः कामी क्रोधीत्यादि इष्टं तत्सर्वकः सर्वो व्यवहारश्च सन्निपातकार्यमित्याह व्यवहार इति प्रवृत्तिहेतुः मनश्च मात्राणि च इंद्रियाणि च असवश्च तैः मनआदीनां सात्त्विकत्वा मस वा न सत्वात्तै व्यवहारः सन्निपातज इति भावः || ६ || यदासौ पुरुषो यदा धर्मादिषु परिनिष्ठितो भवति तदा यं त्रिषु निष्ठारूपः सन्निकर्षः सन्निपातकार्यं धर्मादीनां सत्त्वतमोरजः कार्यत्वाद्विषयतः सन्निपातजत्वमुक्तं फलतश्च तथात्वमाह श्रद्धा रतिधनानि सत्त्वरजस्तमोमयान्यावहतीति तथा || ७ ||

श्री भाग टी ११

धर्मनिष्ठायामेवसत्त्वादिवांतरदर्शयतिषड्भिः निवृत्तिलक्षणोकाम्यधर्मेयदापुमान्निष्ठाभवति अथवानिष्ठानिष्ठितःतथा
पुमान्यदागृहाश्रमएवासक्तः निष्ठेत्तुपश्चात्स्वधर्मेचनित्यनैमित्तिकेनिष्ठेततगुणानांसाम्पिकंस्थितिः सन्नि
पातः हिंयस्माकाम्यधर्मः रजस्तमसत्त्वमयाइत्यर्थः ॥७॥ तदेवंप्रवृत्तिस्थिगुणावृत्तीः प्रदर्श्येदानींपुमानयेनय
याभवेदितियउक्तंतद्दर्शयतिपुरुषमितित्रिभिः ॥८॥९॥ हिंसाशत्रुमरणादिकमाशास्यमांभजेत्तंतामसं
विद्यात् यैर्गुणैरेवंभूतोभवतीतितान्यथः ॥११॥ नतुनतवापितद्गुणावशेनकर्तृत्वाविशेषात्केनविशेषणे

प्रवृत्तिलक्षणेनिष्ठः पुमान्यर्हिगृहाश्रमे। स्वधर्मेचानुतिष्ठेतगुणानांसमितिर्हिसा ॥८॥ पुरुषंसत्त्व
संयुक्तमनुमीयाच्छमादिभिः कामादिभीरजोयुक्तंक्रोधाद्यैस्तमसायुतं ॥९॥ यदाभजतिमांभक्त्या
निरपेक्षः स्वकर्मभिः तंसत्त्वप्रकृतिंविद्यात्पुरुषंस्त्रियमेववा ॥१०॥ यदाआशिषआशास्यमांभजेत्स्वक
र्मभिः तंरजःप्रकृतिंविद्याद्धिंसामाशास्यतामसं ॥११॥ सत्त्वंरजस्तमइतिगुणाजीवस्यनैवमे। चित्तजायैस्तु
भूतानांसज्जमानोनिबध्यते ॥१२॥

त्यंमेत्याजीवस्यैवकर्तृत्वमितिनियमः यतोमांभजेदितिवाक्यंवाक्यमुच्यतेतत्राहसत्त्वमितिजीवस्यैवनमेकृतः यतःचि
त्तजाजीवोपाधौचित्तेभिव्यज्यंतेभूतेषुयैःसचबध्यतेकीदृशः भूतानांदेहादीनांप्राणांतमवेषांचममत्वेससज्जमानः त्रु
देहंतानासज्जमानोगुणान्स्वियत्कर्तृत्वेनरहस्यादिकर्तापिनित्यमुक्तः अतोमहान्विशेषइतिभावः यद्वा तानामप
वीकृतानांयत्कार्यभूतंचित्तंमहत्त्वंमयैहिसोस्यमनःइतिश्रुतेः तत्प्रभवाः गुणाभूतापाधितस्यजीवस्यैवेतिश्र

११५

प्र विशदं स्वच्छं दं। शिवं शांतं शिवम् २

तदेवं मिश्राणि त्रिगुणकार्याणि प्रदर्श्येदानीमेकैकगुणस्यैककार्याणि दर्शयति यदेति सप्तदशभिः। यदेतर
रौ गुणौ जयेत अभिभवेत भास्वरं प्रकाशकं विशदं स्वच्छं भास्वरत्वानो यथा कुमस्सव्यपसंज्ञानहेतुत्वान्नुदांतेषु।
ज्येत धर्मादिशब्दाच्छमदमादिभिः ॥१३॥ तमः सत्त्वं च अभिभूय रजः कर्त्तसंगे हेतुः भिदाहेतुः चलं प्रवृत्तिस्वभा।
वं युतः संगहेतुत्वात् यशसा श्रिया च युज्येत कामः प्रमत्तो भवतीत्यर्थः भिदाहेतुत्वात् दुःखेन युज्येत

संग २ भेद २

करि २

यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवं तदा सुखेन युज्ये
त धर्मज्ञानादिभिः पुमान् ॥१३॥ यदा जयेत्तमः सत्त्वं रजः सं
गं भिदा चलं ॥ तदा दुःखेन युज्येत कर्मणा यशसा श्रिया
यदा जयेद्रजः सत्त्वं तमो मूढं लयं जडं युज्येत शोकमो
हाभ्यां निद्रया हिंसयाशया ॥१५॥ यदा चित्तं प्रसीदेत इं
द्रियाणां च निर्वृतिः देहेऽभयं मनोऽसंगं तत्सत्त्वं विद्धि मे।
त्पदं ॥१६॥ ॥

करि २ १४

मदुपलब्धिस्थानम् २

द्वितीयाद्वै भयं भवतीति श्रुतेः। चलत्वात्कर्मणा च युज्येत ॥१४॥ यदा रजः सत्त्वं च अभिभूय तमः कर्त्तृ जये
त् मूढं विवेकभ्रंशकं लयं आवरणात्मकं जडं प्रयत्नशून्यमात्मकं प्रेतो मूढत्वाच्छोकमोहहिंसाभिर्लयत्वान्नि
द्रया जडत्वात् आशया च अभावे तु केवलं प्राणयात्रा युज्यंते इति द्रष्टव्यं जन इति पाठे लयात्मकत्वमेव निद्राशायो हे
तुः ॥१५॥ किंच यदा चित्तं प्रसीदेत् स्वच्छं भवेत् निर्वृतिरुपरतिः तदा मत्पदं मदुपलब्धिस्थानं सत्त्वं
विद्धि ॥१६॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग ए १२८

यदा पुनः क्रियया विकुर्वन् विकारं प्राप्नुवन् स्वार्थीभवति स्वाभासमंतादित्यादि प्राधोर्यस्य मः । चेतसां बुद्धीन्द्रियाणामनि
वृत्तिः गा वा गाणिकर्मेंद्रियाणि तेषामस्वास्थ्यं विकाराधिकं मनो भ्रांतं चंचलं रजउत्कटं विशामय जानीहि ॥१७॥ यदा
सीनतिरोभवत्येव तमो ग्रहणे विदाकारपरिणामेन बद्धं मम चित्तं विलीयते मनोपि संकल्पात्मकं नष्टं लीनं तत् ।
मोज्ञानं स्मानिर्विषादस्वाभवति तदा तमउत्कटं उपधारय विद्धि ॥१८॥ किंच पथमानस्तिरिंद्रियाण्येव निवृत्तिश्च ।

गा१

विकुर्वन् क्रियया चाधीरनिर्वृत्तिश्च चेतसां । गात्रास्वास्थ्यं
मनो भ्रांतं रज एतैर्निशामय ॥१७॥ सीदच्चित्तं विलीयेत चे-
तसो ग्रहणेक्षमं । मनो नष्टं तमो ग्लानिस्तमस्तदुपधारय
एधमाने गुणे सत्त्वे देवानां बलमेधते । असुराणां च रजसि
तमस्युद्धव रक्षसां ॥१९॥ सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमा-
दिशेत् । प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संततं ॥२०॥ उपर्यु-
परि गच्छंति सत्त्वेन ब्राह्मणा जनाः । तमसाधोध आमुख्याद्रज-
सांतरचारिणः ॥२१॥ राम

१२

वृत्तिर्मोहस्वभावा निद्रेवास्य वर्द्धमाने यद्वा प्रसंगादि देवविकानां गुणानामुत्कर्षकार्याण्युक्त्वा नीतिज्ञेये ॥१९॥ गु-
णोत्कर्षेनावस्थाभेदं दर्शयन् सिसत्वादिति प्रसंगाच्चिगुणावस्थामाहृत तुरीयं चत्वर्थमवस्थानं नाम त्रिषु जाग्रदा-
दिषु संततमेकरूपमात्मानं ननमेवेत्यर्थः ॥२०॥ गुणोत्कर्षफलाबेणानंतनकर्मफलनिष्ठां दर्शयति उपर्युपरीति ब्राह्म-
णा वेदाध्ययनानुष्ठानयुक्ताः ब्रह्मलोकाः इतिपाठे ब्रह्मलोकमभिव्याप्येत्यर्थः आमुख्यात् स्थावरानभिव्याप्य अंतरचा-

१२८

देहाद्यकांतिलीनगुणेनोक्तं फलमाह सत्वे वृद्धे सति प्रलीना मृताः रजोलयाः रजसि प्रवृद्धे सति लयो येषां ते
एवं तमोलया इति ऋपि निर्गुणाः इत्यत्र तु लयशब्दानुपादानाज्जीवंतोपि निर्गुणाश्चेन्मामेव यांतीत्यर्थः ॥२२॥ इदानीं
गुणोक्तं षड्विधं तत्त्वमेव तत्तत्फलसाधनकर्मत्रैविध्यमाह मदर्पणमिति मदुद्देशेन कृतं निष्फलं केवलं दासभावेन वै
वहृतं यन्निजं कर्म नित्यादि तत्सात्विकं फलसंकल्पो नैमित्तिकं हिंसाप्रायं हिंसोद्देशेन कृतं हिंसाबहुलं च श्र

सत्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः । तमोलयास्तु निरयं यांति मामेव निर्गुणाः ॥२२॥ मदर्पणं
निष्फलं वा सात्विकं निजकर्म तत् ॥ राजसं फलसंकल्पं हिंसाप्रायादि तामसं ॥२३॥ कैवल्यं सात्विकं ज्ञानं
रजो वैकल्पिकं तु यत् ॥ प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतं ॥२४॥ वनं तु सात्विको वासो ग्रामो रा
जस उच्यते ॥ तामसं द्यूतसदनं मन्निकेतं तु निर्गुणं ॥२५॥ सात्विकः कारकोसंगी रागांधो राजसः स्मृतः
तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥२६॥ सात्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी ॥
तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥२७॥

दिशब्दात् दंभमात्सर्यादिकृतं च तत् ॥२३॥ इदानीं सगुणनिर्गुणभेदेन ज्ञानादीनां चातुर्विध्यमाह कैवल्यं देहादिव्य
तिरिक्तात्मविषयं वैकल्पिकं देहादिविषयं यत्तद्रजः राजसं प्राकृतं बालमूकादिज्ञानतुल्यं मन्निष्ठं परमेश्वर
विषयं ॥२४॥ अधुना वासविधिमाह वनमित्यादिना वनं विविक्तं तत्सात्विको वासः भगवन्निकेतनं तु साक्षा
दाविर्भावान्निर्गुणं स्थानं ॥२५॥ टीकाद्वितीयपृष्ठे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
१२१

कारकः कर्तासङ्गी अनासक्तः रागान्धः अत्यभिनिवेशवान्स्मृतिविभ्रष्टः अनुसंधानशून्यः ॥ अविवेकी मदपा
श्रयः मदेकशरणः स हि निरहंकारत्वान्निर्गुणः ॥ २६ ॥ अधर्मे धर्म इति या श्रद्धा ॥ २७ ॥ यदग्रे हितं परिणामसुखकरं पूतं
शुद्धं अनायस्तं अनायासतः प्राप्तं आहार्यं भक्ष्यभोज्यादि इंद्रियाणां प्रेष्ठं भोगकाले सुखदं कट्वम्ललवणादि आ
र्तिदा अशुचि दैन्यकरमशुद्धं च शास्त्रान्मन्निवेदितं निर्गुणमित्यभिप्रेतं ॥ २८ ॥ आत्मोत्थं सुखं मदपाश्रयमित्यपि
तेनैतद्दार्थविषयत्वेन तज्ज्ञानवदेव द्रष्टव्यं ॥ २९ ॥ उक्तं संसारहेतुभूतं त्रैगुण्यमुपसंहरति द्वाभ्यां द्रव्यं पथ्यपूतादि दे

पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतं ॥ राजसं चेंद्रियप्रेष्ठं तामसं चार्तिदाशुचि ॥ २८ ॥ सात्त्विकं सुखमा
त्मोत्थं विषयोत्थं तु राजसं ॥ तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं ॥ २९ ॥ द्रव्यं देशः फलं कालो ज्ञानं कर्म
च कारकः ॥ श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि ॥ ३० ॥ सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः
दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ ३१ ॥

शो वनग्रामादिः फलं सात्त्विकं सुखमित्यादि कालः ॥ यस्त्वाभजेत्तं मां भक्त्या यदेत्तद्वो जयेदित्यादिना योऽर्थो उ
क्तः ॥ ज्ञानं केवल्यं सात्त्विकं ज्ञानमित्यादि कर्म मदर्पणमित्यादि कारकः सात्त्विकः कारकोऽसंगीत्यादि
श्रद्धा सात्त्विक्याध्यात्मिकीत्यादि अवस्था सत्त्वाज्जागरणमित्यादि आकृतिः उपर्युपरि गच्छंतीत्यादिनोक्ता
देवत्वादिरूपा निष्ठा सत्त्वे प्रलीनाः स्वर्यांतीत्यादिनोक्ता स्वर्गादिः एवं सर्वोप्ययं भावस्त्रैगुण्यात्मा त्रिगुणात्मकः
॥ ३० ॥ न केवलमेष एव किंतु यावंतः पुरुषाव्यक्ताधिष्ठिताः अधिष्ठिताः ते सर्वे भावा गुणमया एवेत्युपपंच
यति दृष्टमिति ॥ ३१ ॥

श्रीरामः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इदानीं मुक्तेर्गुणस्य संसारहेतुत्वमनुवदंस्तन्निर्जयान्मोक्षमाह एता इति सार्धेन येनेमे निर्जिताः
सत्वश्राद्धविदिति येन भक्तियोगेन मन्निष्ठः सन्मद्भावाय मोक्षाय प्रपद्यते योग्यो भवति ॥ ३२ ॥ तस्माद्धि विवेकि
नामिदमेव युक्तमित्याह तस्मादिति ज्ञानविज्ञानयोः संभवो यस्मिंस्तमिमं नरदेहं ॥ ३३ ॥ भजनप्रकारमा
ह निःसंग इति सार्द्धेन सत्वसंसेवया सात्विकान्येव सेवेत पुमान्सत्वविवृद्धये इति प्रागुक्तया रीत्या नैरपे

एताः संसृतयः पुंसो गुणकर्मनिबंधनाः येनामी निर्जिताः सौम्य गुणाः जीवेन चित्तजाः ॥ ३२
भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं ॥ ३३ ॥ गुणसं
गं विनिर्धूय मां भजंतु विचक्षणाः ॥ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रियः ॥ ३४ ॥ रजस्तमः
श्चाभिजयेत्सत्वसंसेवया मुनिः सत्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शांतधीः ॥ ३५ ॥ संपद्यते गुणै
र्मुक्तो जीवो जीवं विहाय मां ॥ जीवो जीवेन निर्मुक्तो गुणैश्चाशयसंभवैः ॥ ३६ ॥ मयैव ब्रह्मणा
पूर्णो न बहिर्नांतरश्चरेत् ॥ ३७ ॥ इति श्रीभागवते एकादशस्कंधे पंचविंशोध्यायः ॥ २५ ॥ ॥

सत्वेन उपशमात्मकेन सत्वेनैव ॥ ३४ ॥ एवं सति मां प्राप्नोतीत्याह संपद्यत इति जीवं जीवत्वकारणं लिं
गशरीरं मां प्राप्तस्य न पुनः संसार इत्याह जीव इति न बहिर्विषयभोगेन नांतः स्वप्नस्मरणेन ॥ ३५ ॥ गु
णैश्चैतामुरुसंसरणप्रख्यापनजितपुण्यकथाकथनादिभिः युक्त न भक्तिरसेन विवेकिनो न हि पुनः
सुलभं जनरीदृशं ॥ ॥ इत्येकादशे पंचविंशोध्यायः ॥ २५ ॥ ॥ ८२

श्री भाग वती १२२

षष्ठविंशे योगानिष्ठया विद्यानो दुष्टसंगतः ॥ साधुसंगेन तन्निष्ठा परा काष्ठेति वर्ण्यते ॥ १ ॥ योगिनो योगाद्विभ्र
ष्टाः संगतः संभवेदिति ॥ सर्वथा न विहन्यत्वं मे लगीतं वितन्यते ॥ २ ॥ निःसंगो मां भजेद्विद्वानप्रमत्तो जितेंद्रि
यः सुखं ॥ न च विक्षेपमुत्पद्यं क्वचिदुपेक्षन ॥ जीवन्मुक्तस्यापि तर्हि संगो दुर्वार इत्यर्थः स्यादित्याशंक्याह
नुवाद सर्वकं परिहरति साधाभ्यामम् त्यागमत्स्वरूपलक्षणे येन तमिमं नरदेहं लब्ध्वा मद्धर्मे भक्तिलक्ष
णे आस्थितः सन् आत्मस्थमात्मन्येव निरंतरत्वेन स्थितं परमानंदस्वरूपमात्मानं मां समुपैति सम्यक् प्राप्नोः

श्रीभगवानुवाच ॥ मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः ॥ आनंदं परमात्मानमात्मस्थं
समुपैति मां ॥ १ ॥ गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया ॥ गुणेषु मायामात्रेषु दृश्यमानेष्व
वस्तुतः ॥ २ ॥ वर्तमानोपि न पुमान्युज्यतेवस्तुभिर्गुणैः ॥ संगं न कुर्यादसतां शिश्नोदरतृपां क्वचि
त् ॥ ३ ॥ तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत् ॥ ४ ॥

ति ॥ १ ॥ न चैवंभूतस्य विषयसंगो नाम भुक्ती स्यादित्याह गुणमय्येति गुणमय्या या जीवयोनिः जीवोपाधिस्तया वि
मुक्तः गुणेषु वर्तमानोपि तैर्न युज्यते संगं न प्राप्नोति अत्र हेतुः अवस्तुभिः न न्ववस्तुभिरप्येतेषु दृश्यमा
नाः दृश्यंते न वाह अवस्तु नेनह दृश्यमानेषु ॥ २ ॥ तथापि संगं वर्जयेदित्याह संगमिति ॥ असतां लक्षणमाह
शिश्नोदरे न तर्पयंतीति शिश्नोदरतृपस्तेषां क्वचित्कदाचिदपि आस्तां नाव तद्रूपो संगः किं तु तस्यैकस्या
प्यनुगः अनुवर्ती सन् अंधे तमसि गच्छति यथांधः तद्वत् ॥ ३ ॥

राम १२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बृहच्छ्रवः कीर्त्तिर्यस्य स १ शोकसंयमे २

अत्रेतिहासमाह ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः ॥ उर्वशीविरहात्स्वर्गे मुह्यन्नकृते
त्रेतायां समागम्य गंधर्वदत्तेनाग्निना देवानिष्ट्वा पुनरुर्वशीलोकं प्राप्य शोकापगमे सति ततो निर्वि-
ण्णः सन्निमां गाथामगायतेति नवमस्कंधोक्तसारेणाह ऐलेति शोकसंयमे हेतुमाह मुह्यन्निति आ-
त्मानं महाराज्यानंदं [illegible] कामप्रयप्यवाश्याया आत्मानं त्यक्त्वा व्रजंतीमन्वगात् ॥ घोरे तिष्ठेति हे मनस्वि
अये जा

अ्रा

ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः ॥ उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे
४ ॥ त्यक्त्वात्मानं व्रजंतीं तां नग्न उन्मत्तवन्नृपः ॥ विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ॥ ५
कामानतृप्तोनुजुषन्क्षुल्लकान्वर्षयामिनीः ॥ न वेद यांतीर्नायांतीरुर्वश्याकृष्टचेतनः ॥ ६
ऐल उवाच ॥ अहो मे मोहविस्तारः कामकश्मलचेतसः ॥ देव्या गृहीतकंठस्य नायुःखंडा
इमे स्मृताः ॥ ७ ॥

अयांतीः आयांतीः

भिष्प्रा

तिष्ठ घोरे इत्येवं वासिष्ठ्येणावदहैतननैमं त्राजक्तदितासम्यते मयस्कात्तृप्त एव नाह क्षिप्रमेवं सं त्रे॥
विलपन्न ॥ ५ ॥ वैक्लव्ये कारणमाह ॥ कामानिति वर्षाणि यामिनीं रात्रीं यांतीः ॥ आगामिनी आकृष्टचे-
तनायस्य सः ॥ ६ ॥ तस्मात्पूर्वलोकं प्राप्तस्य बहुकालं उर्वशीसंभोगानंतरं निर्विण्णस्य गाथामाह
अहो इति दशभिस्त्रयोदशभिः ॥ अनुतापः ॥ प्रपंच्यते अहो इति यतो मया इमे अहोरात्ररूपा आयुःखंडा न स्मृ-
ताः ॥

श्री। भाग। पटी। २३

तदेवाहं नाहमिति अभिनिर्मुक्तः मयि रममाणेऽस्तंगतः अभ्युदितो वा सूर्य इति अमुया उर्वश्यावं
चितः वत खेदे उत अपि मुषितः वर्षपूगानामपि गतान्यहानि न वेदेति ॥ ६ ॥ येन संमोहेन आत्मा देहः
क्रीडामृगवदधीनः नन्वप्रणय कुपितायाः अनया श्वमथीनता उक्तैव सत्यं न त्वत्र तद इत्याह सप
रिच्छदेति राजादि महितं ईश्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यान्तीमपि अनुगमनमनुगतोऽस्मि ॥ ५ ॥ किं वम

नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितोऽमुया ॥ मुषितो वर्षपूगानां वताहानि गतान्युत ॥ ६ ॥
अहो मे आत्मसंमोहो येनात्मा योषितां कृतः ॥ क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः ॥ ७ ॥
सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं ॥ यान्तीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन् ॥ ८ ॥
कुतस्तस्यानुभावः स्यात्तेज ईशित्वमेव वा ॥ योऽन्वगच्छं स्त्रियं यान्तीं खरवत्पादताडितः ॥ ९ ॥
किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा ॥ किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं ॥ १० ॥
स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं ॥ योऽहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः
सेवितो वर्षपूगान्मे उर्वश्या अधरासवं ॥ न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा ॥ १२ ॥

मम भावाद्यभिमानो नष्ट एवेत्याह कुतः तस्य मे तेजो बलं खरो यथा पादताडितोऽपि खरीमनुगच्छति
न हृत एवं भूतस्य सर्वं साधनं निष्फलं व्यर्थमित्याह किमिति त्यागेन संन्यासेन विविक्तेन एकान्तेन से
वया मौनेन वाग्निः यमेन अन्ततमः स आत्मानं निन्दति द्वाभ्यां स्वार्थस्येति अकोविदमज्ञानां रगोरिव
खर इवेति अधरासवं सेवमानस्य आत्मभूर्मनसिजः पुनः पुनरुद्भवन् ॥ ५ ॥

राम। २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवमष्टभिर्निर्वेदोनिरूपितः ॥ इदानींतस्यविशेषमाह दशभिः पुंश्चल्येति अयंभावः कर्मभिर्देवानि
ष्टाद्रुः त्वमेवप्राप्तोस्मि अतःपरमेश्वरमेवभजेयमिति ॥१५॥ परमेश्वरप्रसादंविनादेवैरुपदिष्टाद्पि
वेदवाक्यान्मोहोननिवर्तत इत्याह बोधितस्यापीति देव्या उर्वश्यास्तत्कृतवाक्येन यथार्थवचनेनपु
रूरवोमामृथामाप्रनष्टोमात्वावृकासोअशिवासउक्षन् नवैस्त्रैणानिसख्यानिसंतिशालावृका
णांहृदयान्येता इत्यनेन ॥१६॥ पुंश्चल्यापहृतंचित्तमित्यादिनातस्या अयमुपकारोनुस्मृतः इदानीम

पुंश्चल्यापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः ॥ आत्मारामेश्वरमृतेभगवंतमधोक्षजं ॥१५

बोधितस्यापिदेव्यामेस्तत्कृतवाक्येनदुर्मतेः ॥ मनोगतोमहामोहोनापयात्यजितात्मनः ॥१६

किमेतयानोपकृतंरज्ज्वावासर्पचेतसः ॥ रज्जुस्वरूपाविदुषोयोहंयदजितेंद्रियः ॥१७॥ क्वा

यंमलीमसःकायोदौर्गंध्याद्यात्मकोशुचिः ॥ क्वगुणाःसौमनस्याद्याःह्यध्यासोविद्यया

कृतः ॥१८॥

मेवायमपराधइत्याह किमेतयेतिनः ॥ अस्माकंकामिनोपतयाकिमपकृतंनकिंचिदपियथारज्ज्व
स्वरूपाविदुषोरज्ज्वद्रष्टुः पुंसः ॥ तस्याःसर्पकल्पनयाविषयतोपिरज्ज्वाकिमपिनापकृतंतद्वत् एवमस्मा
तयोहमेवंभूतः सर्वत्राजितेंद्रियत्वादपराधीत्यर्थः ॥१७॥ ननुतथापिसौवसौगंध्यप्रेमादिगुणैःसं
मोहस्तत्रास्मिन्नाशंक्यतेपिस्वपरिकल्पितापूर्वेत्याह चतुर्भिः क्वायमितिमलीमसः अतिमलिनः
क्वमनसोऽक्षमानामिवगंधसौकुमार्यादिसौमनस्यंशोभनमनोभवोवा ॥१८॥ ॥ ॥ ॥ ग॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ममत्वमपि तस्मिन्परिकल्पितमेवेत्याह पित्रोः किं स्वं कायः जनकत्वात् नु वितर्के भार्याया वा भोग
प्रदत्वात् अथानुपयुक्तमप्येतत्प्रायत्नस्यत्वात् उत स्वामिनो वाधीनत्वात् अग्नेर्वान्ते दाहकत्वात् एवं
श्वगृध्रयोर्वा भक्ष्यत्वात् किं वात्मनः तत्कृतशुभाशुभभोगित्वात् सुहृदां वा उपकारित्वात् एवं यो न नि
श्चीयते १९ तथापि कृमिविड्भस्मलक्षणा निष्ठान्तो यस्य तस्मिन्कायेकलेवरे प्रियत्वेन गृहीते अभिषंगमेवा
ह अहो रतिसुनसं शोभननासिकं २० अतो गुणदोषेण रममाणानां साहृश्यात् कृमिसमा इत्याह त्वगा

पित्रोः किं स्वं नु भार्यायाः स्वामिनोऽग्नेः श्वगृध्रयोः किमात्मनः किं सुहृदामिति यो नावसीय
ते १९ तस्मिन्कलेवरेऽमेध्ये तुच्छनिष्ठे विषज्जते अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियाः २०
त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ विण्मूत्रपूये रमतां कृमीणां कियदन्तरं २१ अ
थापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित् विषयेन्द्रियसंयोगान्मनः क्षुभ्यति नान्यथा २२
अदृष्टादश्रुताद्भावान्न भाव उपजायते असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः २३

दि संहतौ तत्संघाते देहे विण्मूत्रादि संहतौ रमतां कृमीणां वा २१ यद्यप्येवं बीभत्सिता एव स्त्रियः अ
थापि नोपसज्जेत अवलोकनादिनापि संगं न कुर्यात् अर्थविद्विवेकी अत्र हेतुः विषयेति २२ ननु कश्चि
न्निमीलितनयनादेरपि मनःक्षोभो दृश्यते सत्यं सोऽपि पूर्वं दर्शनादिकं विना न भवतीत्याह अदृष्टादिति
भावात् पदार्थात् भावो मनःक्षोभः अतः प्राणानिन्द्रियाणि असंप्रयुंजतः नियच्छतः स्तिमितं निश्चलं सत् २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इंद्रियैः कृत्वा अविस्रब्धः अविश्वसनीयः मादृशाम् अविवेकिनां॥२४॥ फलितमाह द्वाभ्यां एवमि
त्येषुद्वीक्ष्यतीतिनयथा॥२५॥ उक्तिभिर्हितोपदेशैरिति तीर्थदेवादिसंगादपि सत्संगः श्रेयानिति द्व
योयति॥२६॥ सतोत्सलक्षणमाह संत इति विशेषेणैकस्य पयघेहेदेवमद्भावः॥२७॥ नचनेभ्यपदेशमपेक्ष्य

तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः॥ विदुषां चाप्यविस्रब्धः षड्वर्गः किमु मादृशां॥
श्रीभगवानुवाच॥ एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय॥ आत्मानमात्म
न्यवगम्य मां वै उपारमत् ज्ञानविधूतमोहः॥२५॥ ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान्
संत एवास्य छिंदंति मनोव्यासंगमुक्तिभिः॥२६॥ संतोनपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः
निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः॥२७॥ तेषु नित्यं महाभाग महाभागेषु मत्कथाः
संभवंति हि ता नृणां जुषतां प्रपुनंत्यघं॥२८॥ ये ता शृण्वंति गायंति ह्यनुमोदंति चादृताः
मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि॥२९॥ भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते
मय्यनंतगुणे ब्रह्मण्यानंदानुभवात्मनि॥३०॥ यथोपश्रयमाणस्य भगवंतं विभावसुं
शीतं भयं तमोप्येति साधून्संसेवतस्तथा॥३१॥ निमज्ज्योन्मज्जतां घोरे भवाब्धौ परमायणं
संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां॥३२॥

अपि तु केवलं तत्सन्निधिरेव तारयतीत्याह तेष्विति सप्तभिः॥२८॥ श्रवणादिभिरेव मत्पराः श्रद्दधाना
श्च संतो भक्तिं विंदति॥२९॥३०॥ विभावसुमग्निं सेवमानस्य यथा शीतं नश्यति तथा कुमार्गाद्भयं ज्ञान
सिसंसारभयं तन्मूलमज्ञानं च नश्यतीत्यर्थः॥३२॥ निमज्ज्योन्मज्जतां उच्चावचयोनीर्गच्छतां परमायणं परमा

छत्तं१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ टी॰ १२५

किंच यथा त्वमेव प्राणिनां जीवनमहमेव यथा शरणं धर्मश्च यथा प्रेत्य परलोके वित्तं तथा संतप्तवा वो

ऽहं संसारतापात्तिन्नमनः पुंसः अवनं शरणं ॥ ३३ ॥ किंच संतस्त्वदुःखं विसर्गेण निर्गुणज्ञानानि अर्कः सम्य

गुत्थितोपि बहिः स्फुटमेकमेव च तत्त्व विमर्शः ॥ ३४ ॥ अध्यायार्थमुपसंहरति वैतसेन इति ॥ अभावेन

उद्भावनेव विज्ञस्य वीतमोहनाः स्त्रीभावं प्राप्तस्य पुंसो वीतसेनः पुरूरवाः पवनं क्षयप्रकारेण वैश्या लो

कान्स्थानादेवलोकनात् अतिनिःस्पृहस्ततोपि सत्संगादपि हेतो मुक्तसंगः ॥ सत्रात्मारामो भूत्वा यथेष्टं च

तस्य स्त्रीभावं प्राप्तस्य

अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं ॥ धर्मो वित्तं नृणां प्रेत्य संतोर्वाग्बिभ्यतोरणं ॥ सं

तो दिशंति चक्षूंषि बहिरर्कः समुत्थितः ॥ देवता बांधवाः संतः संत आत्माहमेव च ॥ ३४

वैतसेनस्ततोप्येवमुर्वश्या लोकनिस्पृहः ॥ मुक्तसंगो महीमेतामात्मारामश्चचार ह ॥ ३५

इति श्रीभागवते एकादशस्कंधे ऐलोपाख्याने षड्विंशोध्यायः ॥ २६ ॥ उद्धव उवाच ॥ क्रिया

योगं समाचक्ष्व भवदाराधनं प्रभो ॥ यस्मात्त्वां ये यथार्चंति सात्वताः सात्वतर्षभ ॥ १ ॥

चारेति ॥ ३५ ॥ इत्येकादशे षड्विंशः ॥ २६ ॥ सप्तविंशे क्रियायोगः सद्यः चित्तप्रसादकः ॥ सर्वकामाभि

हेतुश्च संगः प्रोक्तः समासतः ॥ नानाव्याकुलचित्तानां कुतो संगादिसंभवः ॥ इति क्रियायोगमंत्रस्तुत्या

नुष्ठाने ॥ १ ॥ क्रियायोगमिति भवदाराधनरूपं यस्मादिति करणाधिष्ठानादि प्रश्नः सर्वकारकानानि

मित्तत्वस्याविशिष्टत्वात् ॥ यथेति कस्मिन्नधिष्ठानादौ केन प्रकारेण निप्रश्नः येपि कास्मिनः सात्वताः

घु३

राम॰ १२५

अस्यपुनर्विशेषतः प्रश्नेकारणमाह चतुर्भिः एतद्वदंतीनिःश्रेयसकरंवदंति अंगिरसःसुतोबृहस्प
तिः॥२॥ निःसृतंत्वयोपदिष्टमित्यर्थः देव्यैपार्वत्यै ॥३॥ सर्ववर्णानांत्रैवर्णिकानां॥४॥ विश्वेश्वराद्येतेषा
मीश्वरः॥५॥ कर्मकांडस्यपूजाविधानस्यनांत्यंतोग्रंथतः पारंवानुष्ठानतोपि स्पनस्य॥६॥ वैदिकपक्षे
त्रैवैदिकान्येवांगानिच यस्मिन्पुरुषसूक्तादौसवैदिकः एवं तांत्रिकोपिमिश्रः॥७॥ शूद्रादिभिस्त्वाह

एतद्वदंतिमुनयोमुहुर्निःश्रेयसंनृणां॥ नारदोभगवान्व्यास आचार्योंगिरसःसुतः॥२॥ निःसृ
तंतेमुखांभोजाद्यदाहभगवानजः॥ पुत्रेभ्योभृगुमुख्येभ्योदेव्यैचभगवान्भवः॥३॥ एतद्वैस
र्ववर्णानामाश्रमाणांचसंमतं॥ श्रेयसामुत्तमंमन्येस्त्रीशूद्राणांचमानद॥४॥ एतत्कमलप
त्राक्षकर्मबंधविमोचनं भक्तायचानुरक्तायब्रूहिविश्वेश्वरेश्वर॥५॥ श्रीभगवानुवाच॥ नह्यं
तोनंतपारस्यकर्मकांडस्यचोद्धव॥ संक्षिप्तंवर्णयिष्यामियथावदनुपूर्वशः॥६॥ वैदिकस्तां
त्रिकोमिश्रइतिमेत्रिविधोमखः॥ त्रयाणामीप्सितेनैवविधिनामांसमर्चयेत॥७॥ यदास्वनिग
मेनोक्तंद्विजत्वंप्राप्यपूरुषः॥ यथायजेतमांभक्त्याश्रद्धयातन्निबोधमे॥८॥ अर्चायांस्थंडिले
ग्नौवासूर्येवाप्सुहृदिद्विजः॥ द्रव्येणभक्तियुक्तोर्चेत्स्वगुरुंमाममायया॥९॥ पूर्वंस्नानंप्रकुर्वीत
धौतदंतोंगशुद्धये॥ उभयैरपिचस्नानंमंत्रैर्मृद्ग्रहणादिना॥१०॥

ना॥७॥ यदात्रैवर्णिकोयजेततदाविशेषमाह॥ गर्भाष्टमैकादशद्वादशादिकालेस्वनिगमेनस्वाधि
कारप्रवर्तनेनवेदेनोक्तंद्विजत्वमुपनयनं॥८॥ अर्चायांप्रतिमादौ॥९॥ स्नानविशेषमाह॥ उभयैर्वैदिके
स्तांत्रिकैश्चमंत्रैः॥१०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग वटी. १२६

किंच संध्योपासनादीनि कर्माणि श्रुत्योदितानि साकल्येन विहितानि यस्य यानि तैः सह मे पूजां कुर्यात् न
तु तानि परित्यजेदित्यर्थः सम्यक् च रमेश्वरविषय एव संकल्पो यस्य तथाभूतः सन् कर्मपावनीं कर्मनिर्हा
रिणीं ॥११॥ अर्चाभेदानाह सार्धेन शैली शिलामयी लौही सुवर्णादिधातुमयी लेप्या मृच्चन्दनादिमयी
हृदि पूजा यस्यां सा मनोमयी ॥१२॥ प्रकर्षेण तिष्ठत्यस्मिन्निति प्रतिष्ठा प्रतिमैव जीवस्य भगवतो मंदिरं यद्वा प्रतिष्ठ
याकालाभ्यामेन भगवन्मंदिरं भवतीति प्रतिमाभेदेन विशेषमाह सार्धेन उद्वासो विसर्जनं ॥१३॥ अस्थि

स्या॰ २

संध्योपास्त्यादिकर्माणि वेदेनाचोदितानि मे ॥ पूजां तैः कल्पयेत्सम्यक् संकल्पः कर्मपावनीं ॥११
शैली दारुमयी लौही लेप्या लेख्या च सैकता ॥ मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥१२
चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं ॥ उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने ॥१३॥ अ
स्थिरायां विकल्पः स्यात् स्थंडिले तु भवेद्द्वयं ॥ स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं ॥१४॥ द्रव्यैः
प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायिनः ॥ भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि ॥१५॥

स्या॰ २

रायामर्चने विकल्पः सालग्रामे न कुर्यात् सैकतायां तु कुर्यात् अन्यत्र कुर्याद्वा न वेति अविलेप्यायां स्न
पनं लेप्य व्यतिरिक्तायां अन्यत्र विलेप्यायां लेख्यायां च परिमार्जनमेव ॥१४॥ इदानीं सकामनिष्कामभेदे
न विशेषमाह द्रव्यैरिति प्रकर्षेण सिद्धैः स्वदेशभवैः अमायिनो निष्कामस्य भक्तस्य च यथालब्धैः पु
ष्पचंदनादिभिः सर्वथालाभे तत्र हृदि भावेन भावनया यद्वा हृदि चिन्मयागस्तदा भावेन मनोमः

टी॰ ११ श्रीमद्भागवत

राम. १२६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अधिष्ठानभेदेन प्रधानोपवासमाह । सार्धेन स्नानेति तत्त्वविन्यासः । यथास्थानं संगप्रधानदेवतानां त
त्तन्मंत्रैः स्थापनं अभ्यर्हणं उपस्थानाय आदिसलिलादिभिस्तर्पणादिना यजनं ॥ १९ ॥ सर्वत्र साधारण
माह श्रद्धयेति ॥ १७ ॥ एवमधिकारास्थिरवस्थामुक्त्वा ॥ इदानीं प्रजाप्रकारमाह । शुचिरिति संभृताः सं
भारा सजासाधनानि येन सः ॥ प्रागग्रैर्दर्भैः ॥ यद्वा प्रागेव संभृतसंभारः सन्नासीनः नत्वासीनः सम्यगासनं
संभाराद्यं देवाद्वारमुक्तिहेरिमस्य ॥ प्राङ्मुखउदङ्मुखो वा आसीनः अर्चायां स्थिरायां संमुखः अर्चा

स्नानालंकरणं प्रेष्ठमर्चायामेतदुद्धव ॥ स्थण्डिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः ॥ १९ ॥
सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः ॥ श्रद्धयोपाहृतं प्रेष्ठं भक्तेन मम वार्यपि ॥ १७ ॥ भू
र्यप्यभक्तोपहृतं न मे तोषाय कल्पते ॥ गंधो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः ॥ १८ ॥ शुचिः
संभृतसंभारः प्राग्दर्भैः कल्पितासनः ॥ आसीनः प्रागुदग्वार्चेदर्चायां त्वथ संमुखः ॥ १९ ॥ कृत
सां २ न्यासः कृतन्यासमर्चां पाणिनामृजेत् ॥ कलशं प्रोक्षणीयं च यथावदुपसाधयेत् ॥ २० ॥ तदद्भि
र्देवयजनं द्रव्याण्यात्मानमेव च ॥ २१ ॥ ॥

भिमुखस्त्वुपविष्टः सन् ॥ १९ ॥ अनंतरं गुर्वादिनमस्कारपूर्वकं । यथोपदेशं स्वस्मिन् कृतन्यासः । कृतो
मत्लक्ष्यं न्यासो यस्यास्तां मम अर्चां आमृजेत् निर्माल्याद्युपकर्षणादिना शोधयेत् । कलशं शंखं कुंभं प्रोक्षणी
यं प्रक्षालनार्थोदकपात्रं उपसाधयेत् चंदनपुष्पादिभिः संस्कुर्यात् ॥ २० ॥ तदद्भिः प्रोक्षणीयाद्भिर्देवय
जनं देवसजास्थानं ॥ २१ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पाद्यार्घ्यार्थे त्रीणि पात्राणि कलशोदकैः ॥ पूरितानि तेषु तैर्द्रव्यैः साधयेत्तत्र पाद्यादिद्रव्याणि पाद्ये श्या-
माकदूर्वाब्जविष्णुक्रांतादि दिष्यते ॥ गंध पुष्पाक्षतयवकुशाग्रतिलसर्षपाः ॥ दूर्वा चेति क्रमाद्द्रव्यैरर्घ्यं द-
र्व्याष्टकमुदीरितं ॥ जातीलवंगकंकोलैर्मतमाचमनीयकमिति ॥ तानि च त्रीणि पात्राणि यथाक्रमं
हृदयादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत् देशिकः पूजकः ॥ २१ ॥ तदनंतरं पिंडदेहे वाय्वग्निसंशुद्धे
इति कोष्ठगतेन वायुना शोषिते आधारगतेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडलामृतमयेनाने
ल्पवेनामृता

प्रोक्तपात्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् ॥ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि दे-
शिकः ॥ २१ ॥ हृदाशीर्षाद्यशिखया गायत्र्या चाभिमंत्रयेत् ॥ पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थो-
परि मम ॥ २२ ॥ आत्मबीजं जीवकलां ध्यायेन्नादांते सिद्धभाविताम् ॥ २३ ॥ तयात्मभूतया पिंडे व्याप्ते
संकल्प्य तन्मयः ॥ आवाहनादि पुस्थाप्य न्यस्तांगं मां प्रपूजयेत् ॥ २४ ॥ ॥

तस्मिन् हृत्पद्मस्योपरि शोभमानां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् ॥ कथंभूतां नादांते सिद्धभावितां
प्रणवस्याकारोकारमकारबिंदुनादाः पंचांशाः तत्र नादांते सिद्धैर्ध्यानतां ध्यायत इति ॥ यो वेदादौ
स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः ॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वर इति ॥ २२ ॥ तयात्मभूतया स्वेनैव
भावेन चिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति तस्मिन्नेवादौ मानसैरुपचारैः
संकल्प्य तन्मयः सन् अर्चादिष्वावाहनस्थापनमुद्रयास्थाप्य पित्वा उभाभ्यां मां प्रपूजयेत् ॥ २४ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृत्यं पूजयेत् तदाह पाद्येति द्वाभ्यां धर्मादिभिर्ममासनम् २४ ॥ तत्र पद्मं च कल्पयित्वा भाभ्यां वेदतंत्रा
भ्यां उभयसिद्धये मत्स्यपाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः ॥ उपस्पर्शः ॥ आचमनं अर्हणं मधुपर्कं
अर्घ्यं उभयसिद्धये वेदतंत्रोक्तभुक्तिमुक्तिप्राप्तये अयमर्थः ॥ धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंक
स्याग्नेयादिचतुष्कोणेषु पादाः अधर्मादीनि पूर्वादिदिक्षु गात्राणि मध्ये च कर्णिकायां त्रयो गुणाः
पत्रिकास्तत्र पूर्वादिक्रमेण मध्ये च विमलोत्कर्षिणी ज्ञानक्रियायोगाप्रह्वीसत्येशानानुग्रहेति नव

पाद्योपस्पर्शार्हणादीनुपचारान्प्रकल्पयेत् ॥ धर्मादिभिश्च नवभिः कल्पयित्वासनं मम २४
पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलम् ॥ उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये ॥ २५ सुदर्श
नं पांचजन्यं गदासीषुधनुर्हलान् ॥ मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् ॥ २६ ॥ नंदं
सुनंदं गरुडं प्रचंडं चंडमेव च ॥ महाबलं बलं चैव कुमुदं कुमुदेक्षणम् ॥ २७ ॥ दुर्गां विनायकं
व्यासं विष्वक्सेनं गुरून्सुरान् ॥ स्वे स्वे स्थाने त्वभिमुखान्पूजयेत्प्रोक्षणादिभिः २८ ॥

शक्तयः ॥ एवं यथोपदेशं धर्मादिभिश्च नवभिश्च शक्तिभिश्चासनं कल्पयित्वेति कर्णिकायां केसरैः त
स्य सर्वादिमंडलेष्वोज्ज्वलमित्यर्थः ॥ २५ ॥ आयुधादिपूजामाह सुदर्शनमिति त्रिभिः तत्र मुसलागं वरण भि॰त्यं॰गा॰२
पूजा स्वविना आसनेनैव शक्त्यावरणमित्युक्तं ततः सुदर्शनादि मुसलांतान्यायुधान्यष्टसु दिक्षु कौस्तु
भमालाश्रीवत्सानुरसि ॥ २६ ॥ नंदादीन्पार्षदान्दिक्षु गरुडं पुरस्तात् ॥ २७ ॥ दुर्गादीनि कोणेषु गुरून्वामतः
सुरानिंद्रादिलोकपालान्पूर्वादिदिक्षु एवमेतान्देवस्याभिमुखान्प्रोक्षणादिभिः अर्घ्यादिभिः पूजयेदित्यर्थः
२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धर्म २ घ १

श्री॰
भाग
पदी॰
२८

पाद्यादीनुपचारान्कल्पयेदित्युक्तं तानेव गुणविधिभिः प्रपंचयति षड्भिः चंदनेति ॥२९॥ मंत्राना
ह स्वर्णघर्मानुवाकः ॥ सुवर्णं घर्मं परिवेद वेनमित्यादि महापुरुषविद्या ॥ जितं ते पुंडरीकाक्ष नमस्ते
विश्वभावन सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वजेति ॥ पौरुषं सूक्तं सहस्रशीर्षेत्यादि नीराजना
दीनि सामानि इंद्रं नरो नेमधिता हवंत इत्यस्यामृचि गीतानि आदिशब्दात् रौहिण्यादीनि ॥३०॥ व
स्त्राद्युपचारेष्वलंकारलक्षणं गुणं विधत्ते वस्त्रेति पत्राणि कपोलवक्षस्थलादिषु लिखिताः पत्र

चंदनोशीरकर्पूरकुंकुमागुरुवासितैः ॥ सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति ॥२९॥
स्वर्णघर्मानुवाकेन महापुरुषविद्यया ॥ पौरुषेणापि सूक्तेन सामभी राजनादिभिः ॥३०॥
वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः ॥ अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं ॥३१॥
पाद्यमाचमनीयं च गंधं सुमनसोक्षतान् धूपदीपोपहार्याणि दद्यान्मे श्रद्धयार्चकः ॥
गुडपायससर्पींषि शष्कुल्यापूपमोदकान् ॥ संयावदधिसूपांश्च नैवेद्यं सति कल्पये
त् ॥३३॥ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं ॥ अन्नाद्यगीतनृत्यानि पर्वणि स्युरु
तान्वहम् ॥३४॥

मद्भक्तः १

भिप्रायः चेत्सप्रेम यथा भवति तथा यथोचितमलंकुर्वीतेत्युक्तार्थे सर्वधारणं ॥३१॥ श्रद्धालक्ष
णं विधत्ते पाद्यमिति ॥३२॥ नैवेद्ये भवलक्षणं विधत्ते गुडपायसेति शष्कुल्यस्तैलपक्वविशेषाः आ
पूपाः आज्यपक्वा मंडकादीनां समस्ताः सूपा व्यंजनानि सति विभव इति विशेषः ॥३३॥ काल
भेदेन गुणं विधत्ते अभ्यंगेति अभिषेचनं पंचामृतादिस्नपनं अन्नं भोज्यं आद्यं भक्ष्यं पर्वणि एक
कादश्यादौ अन्वहं प्रत्यहं वा विभवे सतीति ॥३४॥ अन्नाद्येति १

गुणं

टीका॰
२८

गुण ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कमलभूयस्त्वार्थिनोऽग्नावपिप्रत्तप्रकास्माद्विधिनास्वगृह्योक्तप्रकारेणमेखलादिभिरुपलक्षिते विहिते निर्मि उद्दिष्टं २
तेतदुक्तं विस्तारोऽस्याः प्रायतल्लिखितो मेखलास्मरुतुवेंगुलाः हस्तमात्रोभवेत्कुंडः सयोनिर्वेदिकानेष्यत्यादितप्रज्व
लितमग्निं परितः समन्ततः षट्करमेत्तलयेत ॥ २५ दर्भैः परिस्तीर्य परितः प्रोक्षयेत ॐ अन्वाधानसंज्ञकं व्याहृतिभिः
समिध्यतेपादिरूपकमेकंकृत्वाग्नेरुत्तरतो द्रव्याणि होमोपयोगीन्यासाद्य निधाय प्रोक्षणीपात्रे

विधिनाविहितेकुंडेमेखलायांतवेदिभिः अग्निमाधायपरितः समस्तद्रव्याणि नोदितं २६ प
रिस्तीर्याथपर्युदेशेनाधाय यथाविधि प्रोक्षणपात्रसाधद्रव्याणि प्रोक्ष्याग्नेर्भावयेत्तमा २७
तप्तजांबूनदप्रख्यंशंखचक्रगदांबुजैः लसच्चतुर्भुजं शांतं पद्मकिंजल्कवाससं ॥ २८ ॥ स्फुर
त्किरीटकटककटिसूत्रवरांगदं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥ २९ ॥ ध्यायन्नभ्यर्च्य
दारूणि हविषाभिघृतानिच ॥ प्रास्याज्यभागावाघारौ दत्वाचाज्यप्लुतं हविः ॥ ३० ॥ ॥ ॥

रकेनप्रादन्याग्नेमांध्यायेत ॥ २४ ॥ फोत्वादिभिरुल्लसंतः शोभमानाश्चत्वारो भुजायस्थितं ॥ २७ ॥ स्फुरंतिकिं री
टादीनियस्थितं ॥ २५ ॥ हविषाघृतेनाभिघृतानि संसिक्तानि दारूणि शुष्कसमिधः प्रास्य प्रक्षिप्य आघारौ
तत्सेतुकौयागोपवमान्यभागौचदत्वानटर्योप्राङ्तीर्दत्वान्यर्थः तत्राग्नये प्रजापतये स्वाहा इंद्राय स्वा
हेतिवोत्तरदिशापरिधिसंधिमारभ्याग्निम हा पवित्र्यं ते घृतदारणेनूपो आज्यभागौ अग्नये स्वा
हा सोमाय स्वाहेत्येवं होमम ॥ २६ ३० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
टी
१२१

मूलमंत्रेण छादयेत्तेनान्यथा षोडशार्घ्यं यावत् यस्मिंस्तेन पुरुषसूक्तेन वस्त्रं वदानततः प्रत्यृचमाहुतिग्रहणेनेत्यर्थः
पुरुषसूक्तेनाथ वपद्भक्षणं पयसा मूलमंत्रस्तेन च प्रत्यृचमवदानं ततो होमः ॥ ४१ ॥ मन्त्रनिमंत्रे स्वाहांते तेनैव मंत्रेण यथान्या ।
यं प्रजा ... स्विष्टकृते स्वाहा इत्येवं स्विष्टकृतं च दत्वा ॥ ४१ ॥ ततो वह्निस्थं भगवंतमभ्यर्च्याथ नमस्कृ
त्य पार्षदेभ्यो नंदादिभ्यो ... दिक्षु बलिं हरेत् ततः प्रजास्थानमागत्य देवस्याग्रे समुपविश्य यथाशक्ति मू
लमंत्रं जपेत् ॥ ४२ ॥ ततः भगवतो भोजनसमाप्तिं ध्यात्वा आचमनं दत्वा उच्छेषं विष्वक्सेनाय कल्पयित्वा ॥

गुडूच्या मूलमंत्रेण षोडशोपचारैर्वदानतः ॥ धूपादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं बुधः ॥ ४२ ॥ अ
भ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत् ॥ मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं ॥ ४३ ॥ दत्वाच
मनमुच्छेषं विष्वक्सेनाय कल्पयेत् ॥ मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत् ॥ ४४ ॥ उपाग
यन्गृणन्नृत्यन् कर्माण्यभिनयन्मम ॥ मत्कथाः श्रावयन् शृण्वन्मुहूर्तं क्षणिको भवेत् ॥ ४५ ॥
स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत् ॥ ४६ ॥ शिरो मत्पाद
योः कृत्वा बाहुभ्यां च परस्परं प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥ ४७ ॥ ॥

राम ॥ राम राम त्रितिवं २

मदनुग्रहाय यस्मात् स्वयं भुंजीत ततः सुरभिमत्तांबूलाद्यं मुखवासं दत्वाय पुनरपि अर्हयेत् पुष्पांजलि
ना पूजयेत् ॥ ४४ ॥ अभिनयन् स्त्रीन्नादिः कुर्वन् क्षणिकः ... भवेत् ॥ ४५ ॥ स्तवैः स्तोत्रांतरैः
मेदं ... पौराणैः प्राकृतैः भाषांतरैरिति ॥ ४६ ॥ कथं प्रणमेदित्यपेक्षायामाह शिर इति बाहुभ्यां दक्षिणेन द
क्षिणं वामेन वामं समदक्षिणं ... गृहीत्वा ततः परस्परं निबद्धाभ्यां कृत्वा पादयोरवप्रपन्नमित्यादि

ततः शेषां गृहीत्वा पूर्ववत् वैकल्पिकोद्वासनप्रकारमाह इत्यनेनैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ।
ध्यानादिविषयस्याधाय धृत्वा चेद्यदि उद्वास्यमेव हि प्रतिमायां यन्त्रे वा ज्योतिस्तत्पुनः हृत्पद्मस्थ ज्योतिषि
बाह्यस्य उद्वासनीयं तदनु वचयाप स्वान्स्वयं भुंजीतेति एतेषु पिष्टेन पुंकिंस्वरूपमित्यपेक्षायामाहार्चा
दिष्विति ४७ ॥ यदा यत्र श्रद्धा तदा तत्र तन्मयो भूत्वा मुख्ये मुख्यं तत्कृतो यतः सर्वभूतेष्विति ॥ ४८ ॥ उभय

इति शेषां मया दत्तां शिरस्याधाय सादरं ॥ उद्वासयेच्चेदुद्वास्यं
ज्योतिर्ज्योतिषि तत्पुनः ॥ ४७ ॥ अर्चादिषु यदा यत्र श्रद्धा मां तत्र ।
चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ॥ ४८
एवं क्रियायोगपथैः पुमान्वैदिकतान्त्रिकैः ॥ अर्चन्नुभयतः सि
द्धिं मत्तो विंदत्यभीप्सितां ४९ मदर्चां संप्रतिष्ठाप्य मंदिरं कारये
दृढं ॥ पुष्पोद्यानानि रम्याणि पूजायात्रोत्सवाश्रितान् ५० ॥ पूजा
दीनां प्रवाहार्थं महापर्वस्वथान्वहं क्षेत्रापणपुरग्रामान्दत्त्वा
मत्सार्ष्टितामियात् ॥ ५१

ततः इहामुत्र च सर्वार्थप्राप्तिमाह एवमिति त्रिभिः ॥ ४९ ॥ ५० ॥ पुष्पोद्यानानि च कारयेत् पूजायात्रोत्सवा ।
श्रितान् पूजाप्रयत्नाद्यात्राविशेषोत्सवान्वा नित्यजनसमागमः उत्सवः वसन्तादिमहोत्सवः तदाश्रितान्देवा
दीन्द्रव्याण्युपजीव्यश्रितान्वा आश्रितानां नित्यसर्वेषां पूजादीनामिति प्रवाहार्थं क्षेत्राणि दत्त्वा मत्सार्ष्टि
तां मत्समानमैश्वर्यं प्रतिमादीनां व्यस्तानां समस्तानां फलमाह प्रतिष्ठयेति ॥ ५१ ॥ ॥ ॥ ॥

श्री भाग टी ११

मत्साम्यतां मयासाम्यमित्यर्थः ॥ ५३ ॥ सकामप्रयुक्तं अहैतुकभक्तं प्रत्याह मामेवेति अहैतुकभक्तियोगात्कथं भवति भक्तियोगमिति ॥ ५४ ॥ दातुः फलस्य कैप्रयहर्तारं निंदति यइति विट्भुक विष्ठाभोजी कृमिः कर्तर्यत्फलं तदेवान्येषामित्याह कर्तुरिति ॥ ५५ ॥ सारथ्यः सहकारिणः हेतोः प्रयोजकस्यानुमोदितः च प्रेत्य तत्फलमित्यन्वयः ऊनोयतः कर्मणामेते भागिनः भागार्हाः तत्रापि विशेषमाह भूयसि क मंत्री सारथ्यादेश्च भूयः अधिकं

प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामिया
त् ॥ ५२ ॥ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति भक्तियोगं स लभते एवं यः पूजयेत मां ५३
यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः वृत्तिं स जायते विट्भुक् वर्षाणामयुतायुतं ५४
कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं ५५
इत्येकादशे श्रीभगवत्पूजाविधिर्नाम सप्तविंशोऽध्यायः ॥ श्रीकृष्णः परस्वभावकर्मा
णि न प्रशंसेन्न गर्हयेत् विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥ १ ॥ परस्वभाव
कर्माणि यः प्रशंसति निंदति स आशु भ्रश्यते स्वार्थादसत्याभिनिवेशतः ॥ २ ॥

राम ॥ ॥ राम
राम

फलमिति ॥ ५५ ॥ यः पूजादिमात्रेण पूजितो यः परं पदं प्रागेव विशति प्रीतः सकृत्स्मः श्रावणं मम इति श्रीम प्रविंश ॥ २७ ॥ ग्रहणाविंशेत्यः एवं विस्तरेणोपवर्णितः ज्ञानयोगः पुनश्चाष्टाविंशे समासेनाह इदानीं मति विस्तरेणोक्तं ज्ञानयोगं संक्षेपेणाह परेषां स्वभावान् शांतघोरादीन् कर्माणि च तत्र हेतुः विश्वमिति विक्षेपदोषमाह स्वार्थात् ज्ञाननिष्ठा लक्षणात् असत्ये मिथ्याभूते देहादावभिनिवेशात् अंशमेव दृष्टान्तो

एकादशी ११ ॥
१२०

तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रयाप्रपन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेणामायां स्वप्नरू
पां प्राप्नोति तेन तो मनस्यपि लीने नष्टचेतनः सन् मृत्युं वा मृत्युतुल्यां सुषुप्तिं प्राप्नोति यथा तद्वदेव नानार्थरूपकं दैत्याभि
निवेशी विक्षेपं लयं वा प्राप्नोतीति यथा प्राज्ञसंपर्कात् विश्वस्य भोगात्यलक्षणो भ्रंशः एवमनात्मसंपर्कात् आत्म
नोपि स्वरूपभ्रंश इति भावः द्वैतासत्यतया स्तुतिनिंद्यो निर्विषयत्वं प्रपंचयति सार्धैः षड्भिः किं भद्रमिति ३ अव
स्तुनो द्वैतस्य मध्ये किं भद्रं किं वा अभद्रं कियत् भद्रं कियद्वा अभद्रं इत्यर्थः अवस्तुत्वमेवाह वाचेति वाशेंद्रिय

तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः ॥ मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थरूपकमान् ॥ ३ ॥ किं भद्रं किमभद्रं वा द्वै
तस्यावस्तुनः कियत् ॥ वाचोदितं तदनृतं मनसा ध्यानमेव च ॥ ४ ॥ कायाप्रत्याहृताभासा असन्तो व्यर्थकारिणः
एवं देहाद्यभावाय कं त्यास्युतो भयं ॥ ५ ॥ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ॥ त्रायते त्राति विश्वात्मा
ह्रियते हरतीश्वरः ॥ ६ ॥ तस्मान्नह्यात्मनोन्यस्मादन्यो भावो निरूपितः निरूपितेयं त्रिविधा निर्मूला
भातिरात्मनि ॥ ७ ॥

पलक्षणं वाचा उदितं उक्तं चक्षुरादिभिस्तु रूपं तदनृतं इति नैवं सति देहादिभावानामप्यसंभवात् कथं भय
हेतुत्वेन त्रसत्त्वं दृष्टान्तमाह ॥ ४ ॥ कायाप्रतिबिंबप्रत्याहृत्यः प्रतिघातिः आभासः शुक्तिरजतादिवत् ये यथा असंतो व्य
र्थकारिणो भवंति आत्मसत्त्वतः सत्त्वमभिव्याप्य यद्वा सत्त्वलयः यावत् तज्ज्ञानेन न लीयते तावत् स्यर्थं तमित्यर्थः ननु सृ
ष्ट्यादिस्थितिभिरद्वैतं निरूपितं कथमसत्यं स्यात् तत्राह आत्मैवेति द्वाभ्यां ५ त्रायते पाल्यते त्राति पालयति ६ अस्य
स्मात् सृष्ट्यादिव्यतिरिक्तात् त्रिविधा आत्मादिरूपं भातिः प्रतीतिः ननु निर्मूलं कथं प्रतीयते तत्राह ॥ ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा॰ टी॰ १३१

इदमितिज्ञानविज्ञानयोर्नैपुण्यं निश्चयमस्येव कस्मात् भूतापत्तेरित्येषा प्राप्त्युपायमाह प्रत्यक्षेणेति ॥ ९ ॥ यदाद्यंतवत्तदे
तेन रसदिति ज्ञात्वा निःसंगो विचरेत् आद्यंतवत्त्वे प्रमाणानि प्रत्यक्षेण घटादिष्वनुमानेन सावयवत्वेन हेतुना पृथिव्या
दि निगमेन च प्रत्यक्षमाकाशादि आत्मसंविदा स्वानुभवेन सर्वं दृश्यमाद्यंतवत् असंस्वेति ज्ञात्वेति किंतु यथात्मसं
विदा सर्वं दृश्यमसदित्युच्यते तत्र किमात्मस्वप्रकाशो देहादिर्वा जडमित्युक्ते स्यात् तत्र तयोर्वस्तुतः संसारः प्रतिभासो न च
टेतेत्याशंक्याह नैवेति ॥ १० ॥ अनात्मस्वदृशोः जडाजडयोः अत एव हेतुः द्रष्टृदृश्ययोः मा भूत् तद्वयोरपि तत्राह उपलभ्यत इति ॥

इदं गुणमयं विद्धि त्रिविधं मायया कृतं एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणं ८
न निंदति न च स्तौति लोके चरति सूर्यवत् प्रत्यक्षेणानुमानेन निगमेनात्मसं
विदा ॥ ९ उद्धव उवाच नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः अनात्मस्व
आद्यंतवदसज्ज्ञात्वा निःसं दृशोरीश कस्य स्यादुपलभ्यते ११ आत्मा
गो विचरेदिह १० व्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः अ।
ग्निवद्दारुवदचिद्देहः कस्येह संसृ ॥
तिः ॥ १२ ॥ राम

एतत्प्रपंचयति आत्मेति ॥ १० ॥ अव्ययत्वादिभिर्विशेषणैः नाशादि रागादि गुणापाय गुणज्ञानपरिच्छेदानामसंभवं दर्श
यति हेतुहेतुमद्भावेन यथा एतैश्च विनष्टः अयं भावः यथैवाग्निर्दारुणो भेदेनानुपलंभेऽपि दारुरूपकाशमेव अग्निः प्र
काशकः तथा देहात्मनोरपीति तत्र संसृतिः सत्त्वा तस्यापि चेतनत्वेन संसृतिः तस्यापि च तत्र संसृतिः तथापि द्वयोर्देहसमविविक एव ।
संसारावलंबनमित्याह पंचभिः यावदिति ॥ १२ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संनिकर्षणं संबंधः ननु असंगस्य कुतः संबंधस्तत्राह अपार्थोपि अविवेकिनः स्वज्ञानकृत इत्यर्थः ननु स्वप्रकाशस्य कथ-
मज्ञानमतः संसारः तत्राह अपार्थोपि केवलं फलवान्स्फूर्तिः ननु तन्नतत्वेनास्तीत्यर्थः ननु सतो देहादेः कुतः संस-
र्गस्फूर्तिहेतुत्वमपि तत्राह अर्थेहीति ॥ ५५ ॥ अस्यात्मनः ननु कथं विज्ञानतो विषयस्फूर्तिर्जीवन्मुक्तस्यापि दुर्नि-
वारेत्यनिर्मोक्षप्रसंगः स्यात्तत्राह यथा हीति ५६ प्रस्वापः स्वप्नः बह्वनर्थान् बिभर्ति पुष्णातीति तथाहंका-

श्रीकृष्ण उवाच ॥ यावद्देहेंद्रियप्राणैरात्मनः सन्निकर्षणं ॥ संसारः फलवांस्ता-
वदपार्थोप्यविवेकिनः ॥ ५४ ॥ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो
विषयानस्य स्वप्नेनर्थागमो यथा ॥ ५५ ॥ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृ-
त् ॥ स एव प्रतिबुद्धस्य न वै मोहाय कल्पते ॥ ५६ ॥ शोकहर्षभयक्रोधलो-
भमोहस्पृहादयः अहंकारस्य दृश्यंते जन्म मृत्युश्च
नात्मनः ॥ ५७ ॥ ॥ ॥

रादिलक्षणो देहादिसंनिकर्षस्तावत्संसारालंबनमित्युक्तम् ननु प्रतिबोधमात्रेणात्मधर्माणां शोकादी-
नां कथं निवृत्तिस्तत्राह व्यतिरेकाभ्यां दर्शयति ॥ ५७ ॥ सुषुप्त्यादौ तेषामदर्शनात् अहंकारस्यैवेति निवेद्ययन्नयं सुखीति
ती २ प्रत्ययाभावाच्च कृपणत्वासुखादीनां कृशानादिवत् दृष्टधर्मत्वानुपपन्नेरिति भावः ननु यद्यहंकारस्य संसा-
रः तर्हि मुक्तिरपि तस्यैवेति मुक्तावहंकारावशेषः प्रसज्येत तत्राह देहेति ५७ ॥ ॥

देहादिष्वभिमानो यस्य सः आत्मैवेत्तेषामनुस्यूतो जीवः स्वतप्रवृत्तगुणकर्ममयी मूर्तिर्यस्य सः ॥ ॥ सएवचमहदात्मोपा
धिभिर्बहुधैव सूत्रादिशब्दैर्गीतः संसारे परमेश्वराधीनः संधृतो धावति श्चेतो नायं दोष इति भावः तदेवमहंकारस्य
तेवंधस्यप्रपायेदानीं ज्ञानेनतच्छित्त्वामुक्तिरित्याह अमूलमिति ॥ ३६ ॥ वस्तुतो मूलशून्यः अज्ञानतत्त्वबहुभिःरू
पैः रूपितं प्रकाशितं मेदं जालिकतुल्यमिति वा किंतत्तदाह मनइति मनआदीनांद्वंद्वः ॥ यद्वा मनआदिषु
क्रियेते यत्कर्म सृष्टं कर्मणा गुरूपासनया निशितेन ज्ञानाख्येन खड्गेन छित्त्वा तदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति।
ज्ञानमिति ॥ ३७ ॥ विवेको ज्ञानं तत्र साधनान्याह निगमो वेदः तपः स्वधर्मः प्रत्यक्षं स्वानुभवः ऐतिह्यमुपदेशः अनु

देहेंद्रियप्राणमनोभिमानो जीवोंतरात्मा गुणकर्ममूर्तिः सूत्रं महानित्युरुधेव गीतः संसार आधाव
ति कर्मतंत्रः ॥ ३६ ॥ अमूलमेतद्बहुरूपरूपं मनोवचः प्राणशरीरकर्म ज्ञानासिनोपासनया शितेन च्छि
त्वा मुनिर्गां विचरेदतृष्णः ॥ ३७ ॥ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्य
यदेव केवलं कालश्च हेतुश्च तदेव मध्ये ॥ ३८ ॥ यथा हिरण्यं स्व
कृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य तदेव म
ध्ये व्यवहार्यमाणं नानापदेशैरहमस्य
तद्वत् ॥ ३९ ॥

मानं तर्कः फलं ज्ञानस्वरूपमाह आद्यंतयोर्यदस्य जगतः मध्येपि तदेव केवलं न तु जगदिति किं तत्कालः व
लयविक्षेपकारणमायानियंता हेतुः कारणं च यत्तदेव एतदुक्तं भवति यदस्य विश्वस्य कारणं प्रकाशकं सदवस्थितदा
त्मकमेवैतन्न तु ततः पृथगित्येवं निश्चयफलो निगमादिसाधनजो यो विवेकः स ज्ञानमिति तत्र नानात्वभेदव्यवहा
रावलंबनस्यापि विश्वस्य कारणमात्रात्मकत्वे सदृष्टांतमाह यथेति ॥ ३९ ॥ स्वकृतं स्वमुकुटकुंडलादिरूपेण विरचितं यद्धिर
ण्यकीटं हिरण्मयस्य कुंडलादेरुपपत्तेः पुरस्तात्तन्नाशात् पश्चात् आरादिककटककुंडलमित्यादिना नानापदेशो
व्यवहार्यमाणमपि तदेव यथा तद्वदस्य विश्वस्य कारणभूतोहमेव नानाव्यवहारालंबनं न तु मत्तः पृथक्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदेवं कार्यस्य कारणेन तादात्म्यमुक्त्वा प्रकाश्यस्य प्रकाशात्मतामाह विज्ञानमिति त्रियवस्थं यकारस्य पृथक्पाठः छंदोनुरोधेन जाग्रदादित्र्यवस्थं यद्विज्ञानं मनः तदेवस्याकारणभूतं च यत्गुणत्रयं यच्च कारणकार्यकर्तृ कारणमध्यात्मं कार्यमधिभूतं कर्तृ अधिदैवं एवं गुणत्रयकार्यभूतं त्रिविधं जगद्येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेन भवति येनानुगतं प्रकाशत इत्यर्थः ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति तथा च व्यतिरेकतश्च सुषुप्त्यादौ श्रोत्रं श्रोत्रस्य मनसो यं मनो विदुरित्यादिश्रुतेः ननु विशेषज्ञानव्यतिरेकेण न तुर्येनामोप

विज्ञानमेतत्त्रियवस्थमंगगुणत्रयं कारणकार्यकर्तृ ॥ समन्वयेन
व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यं ॥२०॥ न यत्पुरस्तादुत यन्न प-
श्चान्मध्ये च तन्न व्यपदेशमात्रं ॥ भूतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्या-
दिति मम नीषा ॥२१॥
॥

लभ्यमेहाजाग्रदादिव्यतिरेकतश्च समाध्यादौ प्रदर्शितं तदेव सत्यमिति ॥२०॥ एवं कालत्रयेप्यव्यभिचारिणः सत्यत्वमुक्तं व्यभिचारिणस्त्वसत्यतामाह न यदिति मध्ये च तत्पृथक् नास्ति किंतु व्यपदेशमात्रं ऊनः यतोयद्यन्य रेणान्वेन भूतं जातं प्रसिद्धं प्रकाशितं च तत्तदेव कारणप्रकाशकेनावमात्रं स्यात् इत्ययमिति मे मनीषा श्रुतिः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेणैव कार्यस्य प्रकाश्यस्यानुपलंभादिति भावः ॥२१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं सामान्यतः कार्यप्रकाशयोः कारणप्रकाशकाभ्याममभेदमुक्त्वा उभयविवेक एवं केवलं प्रपंचस्य ब्र
ह्माभेदमाह सच विद्यमानः इति यो यं वैकारिकः विकारसमूहः स एष आगाविद्यमानो राजसः सर्गः वैजोहारेणाव्र
ह्मकार्यभूत इत्यर्थः अवभासते पि ब्रह्मप्रकाशकत्वेनेत्यर्थः ब्रह्म तु स्वयमेव सिद्धं न तु कार्यमित्यर्थः ज्योतिः प्रका
शकमित्यर्थः अतः कारणादिं इंद्रियाणि वार्थास्तन्मात्राणि चात्मा मनश्च देवता सम्प्रुपलक्षणं विकाराः पंचभू
तानि प्रपंचविवेकं ब्रह्मैव भातीति ॥ २२ ॥ उपसंहरति एवं विवामंतयः अत्यंतेति हानुमाने स्फुटं यथा भवति तथा ब्रह्मवि वे
केहेतुभिः तथाप पारस्य देहादेरपवादेनात्मतत्त्वनिश्चयेन नवकीरशेन विशारदेन निपुणेन गुरुणा निमित्तभूतेन

प्रविद्यमानोप्यवभासते यो वैकारिको राजससर्ग एषः। ब्रह्म स्वयं ज्योतिरतो विभाति ब्रह्मेन्द्रियार्था-
त्मविकारचित्रं ॥ २२ ॥ एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन । छित्त्वात्मसंदेहमुपारमेत
स्वानंदतुष्टोखिलकामुकेभ्यः ॥ २३ ॥ नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः
मनोन्नमात्रं धिषणा च सत्त्वमहंकृतिः खं क्षितिरर्थसाम्यं ॥ २४ ॥

॥ ॥ ॥ ॥ ॥

तिवा आत्मविषयं संदेहं छित्त्वा स्वानंदतुष्टः अखिलेभ्यः कामुकेभ्यः इंद्रियादिभ्य उपारमेत निःसंगो भ
वेत् ॥ २३ ॥ परापवादमेव दर्शयति वपुरात्मा न भवति पार्थिवत्वात् घटवत् तथा इंद्रियाणि तदधिष्ठातारो देवा असु
श्च धिषणा बुद्धिः सत्त्वं चित्तम् अहंकृतिरित्येते आत्मा न भवंति कुतः अन्नमात्रं अन्नोपष्टंभ्यत्वात् शरीरवत् हा
युर्जलं च हुताशः खं क्षितिरिति पंचभूतानि अर्थाः शब्दादयः साम्यं प्रकृतिश्चैतान्यात्मा न जडत्वात् घटवदिति
तेजः ३ यद्वा इंद्रियाद्युक्तेनानुमानांतराणि सूचितानि तथा इंद्रियाण्यात्मा न भवंति तैजसत्वात् प्रदीपवत् ।
करणत्वात् मनोवत् प्राणश्च वायुत्वात् बाह्यवायुवदिति ॥ २४ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदेवमात्मानं विक्रियत इत्युक्तं नैवैतदुपपन्नं बुद्ध्यावस्थयान्यान्यमानत्वात् सक्कावस्थया गृह्यमाणत्वान्न हि बुद्धी
द्ध्याः स्वधावान्तन बुद्धी हि भावान्यायातस्तेद्धत्वाभावेन गृह्यमाणं विक्रियते तत्राह पूर्वमिति विथावस्थायां गुणैः कृ
तैश्चित्रविचित्रमज्ञानेन कार्यं देहेन्द्रियादिलक्षणं प्रथमेनात्मनि प्रविविक्तं गृहीतमासीन्न देवपुनर्ज्ञानेन विवि

एवं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग। निवर्तते
तत्पुनरीक्षयैव न गृह्यतेनापि विसृज्य आत्मा ॥ यथा हि भानो
रुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते एवं समीक्षा निपु
णा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ॥ २४ ॥

वर्तते आत्मा तु नैकेनापि रूपेण गृह्यते नापि त्यज्यते ध्रुवं भावः मुक्तेः क्रियाफले नैव न तावदात्मनो विकारस्तस्या
त्वात् अपि तु ज्ञानमात्रनिवृत्ति रूपत्वात् न तावत् समस्य प्रीतिं बंधमात्रयोः प्रतीनविकार इति ॥ ३३ ॥ तदेवं दृष्टान्तेन
स्पष्टयति यथेति न तु एवमेव सत्तद्घटादिषु न विधत्ते न करोति मिसमीक्षात्मविद्या ॥ २४ ॥

श्री
भाग
टी
१२५

आत्मनो निर्विकारत्वं प्रपंचयति एष इति। अनेनापरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति। स्वयंज्योतिरित्यनेनाज्ञान
मलापकर्षणलक्षणां विकृतिं वारयति। अज इत्युत्पत्तिं वारयति। अप्रमेय इति ज्ञानलक्षणामाप्तिं गुणाधानेन संस्कारं च
महानुभूतिरिति देशकालपरिच्छेदाभावेनानित्यवृद्धिविपरिणामापत्तयो निरस्ताः। स्वयंज्योतिष्ट्वादौ हेतुः सकला
नुभूतिरिति। एकोऽद्वितीय इति विकारहेतोरन्यस्याभावान्न कोऽपि विकार इति दर्शयति। ननु श्रुतेर्विषयस्य कथं स्वयं
ज्योतिष्ट्वादि तत्राह वचसां विरामे प्रमाणगोचरत्वेन निवृत्तौ मत्यां तथा च श्रुतिः। यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इति

सकलानुभूतिः २

एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः। एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्चरन्ति ॥२५॥
एतावानात्मसंमोहो यद्विकल्पस्तु केवले आत्मन्नृते स्वमात्मानमव
लम्बो न यस्य हि २६ ॥

तत्र हेतुः येनेषिताः प्रेषिताः तथा च श्रुतिः। केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः। केनेषिता
वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति। श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षु
रिति २५ एवमद्वितीयत्वं सुप्रदर्शयितुं भेदस्यावस्तुत्वमाह एतावानिति केवलेऽप्यभिन्ने आत्मनि आत्मनो विकल्प इति य
त्तावानात्मनोऽमनसः संमोहः भ्रमः यतः स्वमात्मानमृते विना यस्य विकल्पस्यावलम्बः आश्रयो ना
स्ति तत भ्रमस्य वस्तुतः विना नेह नानास्ति किंचन इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश इत्यादि

एकादशस्कन्धः २८

१२५

एवंविवेकज्ञानवतो मुक्तस्य नेन्द्रियादिकृतो गुणदोषसंबंध इत्याह समाहितैरिति मन्तुर्विविक्तधाम्नः मम सुहृद्विवि
क्तधाम स्वरूपं येन तस्य प्रकाशकस्य प्रकाश्यगुणदोषा न भवन्तीति दृष्टान्तेनाह २५ अप्रसंगाद्ब्रह्मणैव नाव
स्यन ३ स्थितं केपि गुणदोषा इत्याकाशदृष्टान्तेनाह यथेति वाय्वादीनां शोषणदाहनक्लेदनरजोधूसरत्वादिभिर्गताग
तैरागमापायिभिः अच्युतगुणैः शीतोष्णादिभिर्वा अहंमतेः अहंकारात्परमत्त्वं संसृतिहेतुभिर्न युज्यते

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मन्तुर्विविक्तधाम्नः विलिप्यमानैरपि नतु किंतु दूषणं घनै
रूपैतैर्विगतैः रवेः किं २५ यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते तथाक्षरं सत्त्वर
जस्तमोमलैरहंमतेः संसृतिहेतुभिः परं २६ तथापि संगः परिवर्जनीयो गुणेषु मायारचिते
षु तावत् मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायः २७ यथामयोऽसाधुचि
कित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति
सर्वसंगं २८ ॥

यद्वाहंकारस्य संसृतिहेतुभिरिति २६ मुक्तवदसम्यग्ज्ञानी न यथेष्टमाचरेदित्याह द्वाभ्यां तथापीति
गुणेषु विषयेषु रजो रागः मनसः कषाय इति दुर्निरासतामाह २७ एतदेव दृष्टान्तेनोपपादयति यथेति नृ
णामामयो रोगः असाधु असम्यक्यथा अपक्वकषायकर्म अदग्धाः कषायाः रागादयः तन्मूलानि कर्माणि च
यस्मिंस्तत् अतएव सर्वसंगं सर्वेषु पुत्रादिषु सज्जमानं मनः कुयोगिनं असम्यक्ज्ञानिनं विध्यति भ्रंशय
ति २८ ॥ राम ॥

श्री भाग. टी. १२४

ननु कथं विद्वद्विषयसंभेयदि योगभ्रंशः स्यादलं न हिंसोयायेनयोगमार्गात्तत्राह ऊयोगिनरति मनुष्यभूतैर्वपुःष्विाद्या
दिरूपैरस्पृष्टयो रूपस्पृष्टः अवितिन्मयावश्रुतिः यस्मान्नेदषांनाश्रियं येदत्त मनुष्यादिरूपाणीति भूयोजन्मांतरेन तु क
र्मतंत्रकर्मविस्तारं ॥ २९ ॥ ननु विदुषामपि सर्वथा कर्म दुष्परिहर्मित्ति पुनः संसारः स्यात् अत आह करोतीति विदु।
षोस्यासाजंतुर्देहएवभोजनादिकर्म करोति क्रियते वततेन कर्मणाप्युण्यापापि प्राप्नोतीत्यर्थः केनापि संस्कारादि
नावोदितः सन्नाश्रानिपातान्मरणपर्यंतं करोति विद्वांस्तु प्रवृत्तोदेहे स्थितोपि तत्र कर्मणा न विक्रियते निरहंका

ऊयोगिनो यै विहृतान्युंतरायैर्मनुष्यभूतैस्मिदषापस्पृष्टेः ॥ ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु क
र्मतंत्रे २९ करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् ॥ न तत्र विद्वान्प्रकृतौ स्थितोपि
निवृत्ततृष्णः स्वसुखानुभूत्या ॥ ३० ॥ तिष्ठंतमासीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नं ॥ स्वभावमन्यत्किम
पीहमानमात्मानमात्मस्थमतिर्न वेद ॥ ३१ ॥ यदि स्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत् नम
न्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानं ॥ ३२ ॥

ति वातन्हर्षविषादादिभिः संसारं न प्राप्नोति ॥ ३० ॥ किंच यावत्संतानावदैहिककर्मभिर्विकारशंकायतो देहमप्यसौ न
पश्यतीत्याह तिष्ठंतमिति उद्वंतं मूत्रयंतं स्वभावप्राप्तमन्यदपि दर्शनस्पर्शनादि ईहमानं कुर्वंतमात्मानं देहं ॥ ३१ ॥
नन्विंद्रियवतः सर्वथा कथमदर्शनं संभवति तत्राह यदि स्मेति यद्यप्यसन्तां बहिर्मुखानामिंद्रियाणामर्थं पश्यति
तथापि नानात्मनि मिथ्या स्वप्नवदित्यनुमानेन विरुद्धं बाधितं सत् परमात्मनाति किं तु मनीषी वस्तुतया न मन्यते स्वा
पादुत्थाय प्रबुद्धः संस्कारमात्रेणास्वाप्नविषयं स्फुरंतं अतएव स्वयमेव तिरोभवंतं यथा न तद्वत् ॥ ३२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

केचित्तु नः प्रत्यक्षादिप्रतीतप्रपंचस्य बाधायोगान्न वेदान्तार्थानां वाक्यानामर्थकत्वं प्रतिपादनपरत्वेनार्थवादत्वाद्धे
तोः सत्यमिति मन्यंते तेन मतमनूद्य दूषयति यदिति नामाकृतिभिः नामरूपोपलक्षितं पंचभूतात्मकं द्वयं देहं तं यत्तद
बाधितमिति पंडितमानिनां ॥ अत्र वयमेव पंडिता इत्यभिमानवतां वेदान्तेष्वयमर्थवाद इति प्रतीतिः ॥ ननु तत्त्ववि
दो यतः व्यर्थेनापि विनाप्यर्थेनाप्रतीति ॥ तथा हि न तावद्विध्येकवाक्यत्वं तेषामस्ति यतोर्थवादत्वं स्यात् न वाक्
द्वैभोक्तृपरमानंदरूपात्मप्रतिपादने कर्मविधिशेषताभजनं तेन चाबाधितत्वं हेतोर्नामरूपात्मकत्वात् ग्राह्यत्वा
त्वात्

यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनां ॥ ३८ ॥ योगिनोप।
क्वयोगस्य युंजतः काय उत्थितैः ॥ उपसर्गैर्विहन्येत तत्रायं विहितो विधिः ॥ ३९ ॥ योगधारणया कांश्चि
दासनैर्धारणान्वितैः ॥ तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत् ॥ ४० ॥ कांश्चिन्ममानुध्यानेन नामसं
कीर्तनादिभिः ॥ योगेश्वरानुवृत्त्या वा हन्यादशुभदाञ्छनैः ॥ ४१ ॥

च वर्णात्मकत्वात् स्वप्नवदित्याद्यनुमानेन वाचारंभणादिश्रुतिभिश्च बाधितत्वादिति ॥ ३८ ॥ तदेवं ज्ञानयोगं सप
रिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रतीकारमाह योगिन इति त्रिभिः अपक्वं युंजतः कायोत्थितैरेवोत्थैरुपस
र्गैः रोगाद्युपद्रवैः अभिभूयेत विधिः प्रतीकारः ॥ ३९ ॥ योगधारणया सोमसूर्यादिधारणया संतापशीतादीन् आस
नैर्वायुधारणान्वितैर्वातादिरोगान् तपोमंत्रौषधैः पापग्रहसर्पादिकृतान् ॥ ४० ॥ ममानुध्यानादिभिः कामादी।
न् योगेश्वरानुवृत्त्या दंभमानादीन्हन्यात् ॥ ४१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भा प
टी
१३६

अन्येतुदेहस्यसिद्ध्यर्थमेवतत्सर्वंकुर्वंतितंदूषयतिकेचिन्मुनेरितेतरन्यैश्चोपायैर्देहमेवसकल्पंजरारोगादिवर्जितंवय
सितारुण्येस्थिरंचकृत्वाअहंहंपरकायप्रवेशादिसिद्धयेतद्धारणारूपंयोगंयुंजंतिनतुज्ञाननिष्ठारूप या कुशलैः
श्चेत्ताद्दग्योगेनभवतिवनस्पतिवदात्मेवस्थायीशरीरंतुफलवन्नश्वरमित्यर्थः॥४२॥ननुक्वचित्साध्यंगतो।
नापिप्राणायामादियोगक्रियमाणाज्जरारोगाद्यभावोदृश्यतेसत्यंतथापिसमाधिमुत्सृज्यनतत्रसज्जेतेत्याह।

केचिद्देहमिमंधीराःसुकल्पंवयसिस्थिरं। विधायविविधोपायैरथयुंजंतिसिद्धये
॥४३॥नहितत्कुशलादृत्यंतदायासोह्यपार्थकः॥अंतवत्त्वाच्छरीरस्यफलस्येववनस्प
तेः॥४४॥योगंनिषेवतोनित्यंकायश्चेत्कल्पतामियात्।तच्छ्रद्दध्यान्नमतिमान्यो।
गमुत्सृज्यमत्परः॥४५॥योगचर्यामिमांयोगीविचरन्मदपाश्रयः।नांत।
रायैर्विहन्येतनिःस्पृहःस्वसुखानुभूः॥४६॥इत्येका
दशेभागवतेउद्धवसंवादेपरमार्थनिर्णयोना
माष्टाविंशः२८
॥

योगनिषेवितत्वाद्देहस्थिरत्वंनश्रद्दध्यात्नविश्वसेत्॥४५॥नन्वेवंविघ्नप्रतीकारैर्योगंकुर्यादित्युक्तं।मच्छरणस्यतुन
विघ्नशंकापीत्याहयोगचर्यामितिविचरन्नाचरन्स्वसुखेऽनुभूःअनुभूतिर्यस्यसः स्पृहामलादिविघ्नास
वमदपाश्रयस्यनिवर्तंते अतोंतरायैर्नविहन्यतेस्वानंदपूर्णोभवतीति॥४६॥ समाहृत्यसर्वयोगांतस्समस्तोपनि
षद्रसं स।भिमुख्यत्संमांभक्तिंमुक्तोपेतरूपादिशत्१॥इत्येकादशेऽष्टाविंशः॥२८ ॥ ॥॥

१३६

ऊनविंशेयोऽनुयः पूर्वं विस्तरेणाभिनिरूपितः ॥ भक्तियोगस्तमेवाह स्वभक्त्याय समासतः ॥ १ ॥ अतिक्लेशमिवालक्ष्ययो
गः संसेवकत्वं पदि[illegible] सुखोपायं पुनः कृष्णमुद्धवः परिपृच्छति ॥ २ ॥ अनात्मन अवशीकृतमनसः
पुंजसाः प्रयासं तो यथा सिद्ध्येत् तथांजसा सुबोधं यथा तथा मे ब्रूहि ॥ १ ॥ सुदुष्करत्वं प्रपंचयति प्रायश इति मनो
युंजंतो निगृह्णंतः सीदंति विक्षेपं पतंतः अतः समाधानात् अनिग्रहात् कथंचिन्मनसो निग्रहे वा कर्शिताः श्रा

उद्धवः सुदुष्करामिमां मन्ये योगचर्यामनात्मनः ॥ यथांजसा पुमान् सिद्ध्येत्
तन्मे ब्रूह्यंजसाच्युत ॥ १ ॥ प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः ॥ विषीदं
त्यसमाधानान्मनोनिग्रहकर्शिताः ॥ २ ॥ अथात आनंददुघं पदांबुजं हंसाः
श्रयेरन्नरविंदलोचन ॥ सुखं नु विश्वेश्वर योगकर्मभिस्त्वन्माययामी विह
ता न मानिनः ॥ ३ ॥

ताः संतः ॥ २ ॥ यस्मादेवं केवलं विषीदंति अथात एव ये हंसाः सारासारविवेकचतुराः ते आनंददुघं
ममस्तानंदपरिहारकं तव पदांबुजमेव सुखं यथा भवति तथा नु निश्चितं श्रयेरन्नेवं ते अमी तु त्वन्मायया विहताः
के ये योगकर्मभिः मानिनः संतो न श्रयंते यद्वा अमी वद्धाः त्वन्मायया न विहताः अत एव योगकर्मभिः हृत्वामा
तिनो न भवंति अन्ये तु त्वन्मायया मोहिताः संतो वयं योगज्ञा वयं कर्मजपाला इति केवलं गर्विता भवंति न त्वसु
खंत इत्यर्थः ॥ ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भाग टी १६७

नद्भक्तेः त्वत्प्रसादेनकृतार्थाभवंतीतितेनातिविचित्रमित्याह किमिति अनन्यशरणेषुदासेषुतवात्मसात्त्वंतद
धीनत्वंयथातेदेवापीबलिप्रभृतिषुअनंतंकिंचित्रंनाश्चर्यमित्यर्थः यतोयोभवान्श्रीरामकृष्णाद्यवतारेवान
रैःसहसाहित्यंसख्यमितियावत्अरोचयत्प्रीत्याकृतवान्कथंभूतः ईश्वराणांब्रह्मादीनांयानिश्रीमंतिकिरी
टानितेषांतटानिअग्राणितैःपीडितंविलुलितंपादपीठंयस्यस्वयंतथाभूतोपिसन् ४ अन्यच्चापीत्यन्यको
नामास्यसंश्रयेदित्याहतंत्वेति एवंभूतंत्वांकोनुविसृजेतकथंभूतः स्वकृतविद्बलिप्रह्लादादिषुअनयाकृ क२
तमनुग्रहंजानन्यद्वाअस्मिन्नेवात्मयोनितयाकृतमुपकारंविद्वान् तदेवाह आखिलात्मदयितेश्वरमाश्रि।

किंचित्रमच्युततवैतदशेषबंधोदासेष्वनन्यशरणेषुयदात्मसात्वं॥ योरो
चयत्सहमृगैःस्वयमीश्वराणांश्रीमत्किरीटतटपीडितपादपीठः॥ ४॥ तं
त्वाखिलात्मदयितेश्वरमाश्रितानांसर्वार्थदंस्वकृतविद्विसृजेतको
नुकोवाभजेत्किमपिविस्मृतयेनुभूत्यैकिं
वाभवेन्नतवपादरजो
जुषांनः ५

तस्यजगतःआत्मानंदयितंआत्मत्वादेवदयितंप्रेष्ठंसमस्तैश्वर्यप्रदत्वादवश्यंभजनीयंकिंचाश्रितानांस
र्वार्थदंतर्हिकिंफलोद्देशेनाहंसेव्यःनहिनहिकिमपिअपेक्षितंकिंतुकृतज्ञतयैवेत्याह स्वकृतमपिकोवाभजे
त्सेवेतकथंभूतेतयत्नोबलंभूतोइंद्रियभोगायअनुश्रंतंतमेवनविस्मृतयेभवतियद्वाअनुभूतिविदितिकिंवा
पिदेवतांतरंधर्मज्ञानादिसाधनंवाभूत्यैऐश्वर्यायसंसारस्यविस्मृतयेमोक्षायवाकोवाभजेन्नकोपिननुनः
साधनेविनाभोगमोक्षादिफलंकथंस्यात्तत्राह किंवेतितदेकं॥ यावैसाधनसंपत्तिःपुरुषार्थचतुष्टये तयावि १६७
नानदाप्नोतिनरोनारायणाश्रयःइति॥ ५

आस्तामन्यभजनवार्ता त्वत्कृतोपकारं स्मरतस्त्वय्यात्मनिवेदनं नैव निष्कृतिर्नान्यथेत्याह॥ नैवेति अपचितिं
प्रत्युपकारं आनृण्यमिति यावत्कवयो ब्रह्मविदोऽपि नैव प्राप्नुवंति यतस्त्वत्कृतमुपकारं स्मरंतः ऋद्ध
मुदः उपचितपरमानंदाः॥ उपकारमेवाह॥ यो भवान्बहिराचार्यवपुषा गुरुरूपेण अंतश्चैत्यवपुषा अं
तर्यामिरूपेण अशुभं विषयवासनां विधुन्वन्निरस्यन्स्वगतिं निजरूपं प्रकटयति तस्य तव ६ ईश्वरे

नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः योंतर्बहिस्तनुभृता
मशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति॥ ६॥ शुक उवाच॥ इत्युद्धवेनात्यनुरक्त
चेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः॥ गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनो
हरस्मितः॥ ७॥ श्रीभगवानुवाच॥ हंत ते वर्णयिष्यामि मम धर्मान्सुमंगलान्॥ यांश्रद्धया
चरन्मर्त्यो मृत्युं जयति दुर्जयम्॥ ८॥

स्वतत्वे हेतुं जगत्क्रीडनकं क्रीडोपकरणं यस्य सः॥ ननु जगत्सृज्यसृष्ट्यादिना ब्रह्मेशादयः क्रीडंति
तत्राह स्वशक्तिभिः सत्वादिभिर्गृहीतं मूर्तित्रयं येन सः सप्रेमसहितं मनोहरं स्मितं यस्य सः सप्रेम
युष्मानस्माञ्जगादेति वा ७॥ तदेव कथयिष्यामि हंतेति सहर्षसंबोधनं सुमंगलान्स्वस्वरूपान्स्वः
स्वसंसारं दुर्जयं मन्यैरुपायैः॥ ८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भा॰ग॰ एदी॰ १३८

धर्मेणैवाह कुर्यादिति त्रयोदशभिः मांस्मरन् शनकैः असंरंभतः कुर्यात्तदाह । मयीति अर्पिते मनः
चित्ते संकल्पविकल्पात्मके येन अत एव मद्धर्मएवात्ममनसो रतिर्यस्य सः ॥ ९ ॥ पुण्यदेश
लक्षणं मद्भक्तैरिति देवादिषु ये ये भक्तास्तेषामाचरितानि कर्माणि चाश्रयेत ॥ १० ॥ सत्रेण संभूय
वा ॥ ११ ॥ अंतरंगां भक्तिमाह मामिति त्रिभिः सर्वभूतेषु चात्मनि चात्मानमीश्वरं स्थितं मामेव तेन कः
श्यमेकस्य सर्वेषु वृत्तित्वमत आह । बहिरंतः पूर्णमित्यर्थः तत्कुतः अपावृतमनावरणं अनाच्छादनं तद
पिकुतः यथा खमसंगत्वादित्यर्थः ॥ १२ ॥ हे महाद्युते अतिप्रात्त इत्यनेन प्रकारेण केवलं ज्ञानमुपाह

कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ॥ मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ९
देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् ॥ देवासुरमनुष्येषु मद्भक्ताचरितानि च
१० पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् ॥ कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ॥
मामेव सर्वभूतेषु बहिरंतरपावृतं ॥ ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ १२ ॥ इति स
र्वाणि भूतानि मद्भावेन महाद्युते ॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥ १३ ॥ ब्राह्म
णे पुक्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके ॥ अक्रूरे क्रूरके चैव समदृक्पंडितो मतः ॥ १४ ॥

श्रितः सन् सर्वाणि भूतानि मद्भावेन मन्यमानः सभाजयत् पंडितो मत इत्युत्तरेणान्वयः ॥ १३ ॥ ननु उ
त्तमाधमसमेष्वेकरूपेण सभाजनमपांडित्यमेव स्यात्सत्पूज्यादिव्यतिक्रमादित्याशंक्य तामेव
ज्ञानदृष्टिं प्रपंचयति ब्राह्मण इति विषमेष्वपि समदृक् समं मामेव पश्यन्नैषम्यमेव वद्भेददर्शी यति
ब्राह्मणपुक्कस इति तौ वैषम्यं पुक्कसोंत्यजजातिविशेषः ॥ स्तेने ब्रह्मस्वहारिणि ब्राह्मण्ये ब्राह्मणेभ्यो
दातरीति कर्मतः अर्के विस्फुलिंगे इति गुणतः ॥ अक्रूरे शांते क्रूरे चेति स्वभावतः ॥ १४ ॥ ॥

राम॰ १३८

जाति २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नरेष्वभीक्ष्णं मद्भावं कुर्वतः सद्यः फलविशेषमाह । नरेष्विति । समोत्तमहीनेषु स्पर्द्धादयं स्वस्मिन्नहंकार
श्चेति निवृत्तिं वियंति नश्यंति ॥१५॥ भूतेषु तेषामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह । विसृज्येति स्मय
मानान्हसतः स्वान्सर्वीलज्जां दैहिकीं दृशामहमुत्तमः सज्जनीव इति । दृष्टिं तया दृशा या व्रीडा लज्जा

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् । स्पर्धासूयातिरस्काराः साहंकारा वियंति हि ॥१५
विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीं । प्रणमेद्दंडवद्भूमावाश्वचंडालगोखरं ॥१६
यावत्सर्वेषु भूतेषु मद्भावो नोपजायते । तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥१७॥

तोर विसृज्य श्वचंडालादीनभिव्याप्य प्रणमेत् । न विरोधं कुर्यादित्यर्थः ॥१६॥ एवं पंचभिः श्लोकैः रू
ज्ञायाः समदृष्टेरविधिमाह । द्वाभ्यां यावदिति ॥१७॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ भाग॰ पदी॰ १२९

तस्यैवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति ॥ अतः आत्ममनीषया सर्वत्रेश्वरदृष्ट्या या विद्या तया
अलं परितो ब्रह्मैव पश्यन् सर्वतः ॥ क्रियामात्रादुपरमेत ॥ १८ ॥ किमयमेवोपायः अस्ति वान्योऽपेक्षा पीत्य
यां सन्ति बहवः समीचीनस्त्वयमेवेत्याह अयं हीति ॥ १९ ॥ भगवद्धर्मलक्षणोपायस्य समीचीनत्वमे-

सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया ॥ परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः ॥ १८
अयं हि सर्वकल्पानां सध्रीचीनो मतो मम ॥ मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः ॥ १९
न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि ॥ मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः ॥ २०

वोपपादयति ॥ द्वाभ्यां नहीति ॥ अंग हे उद्धव ॥ अनाशिषो निष्कामस्य मद्धर्मस्य उपक्रमे सति अण्वपि वैगुण्यादिभिर्नाशो नास्त्येव यतो मयैवं निर्गुणत्वादयं धर्मः ॥ सम्यग्व्यवसितो निश्चितः ॥ न तु मन्वादिमुखेन कथंचित् ॥ २० ॥ ॥

राम॰ १२९

विंध्योय इति श्रूयमर्थः किं वक्तव्यं मद्धर्मस्याधंम इति यतो लौकिकोपि यो यो निरर्थः ॥ वाच्यं आया
तः सोपि मयि परे निष्फलाय चेत्कल्प्यते निष्कामनया ॥ र्पितश्चेत्तर्हि धर्म एव स्यात् निरर्थायासे दृष्टांतः
पृथ्या भयशोकादेर्हेतोः पलायनाक्रंदनादि क्लेशस्तद्वत् ॥ २७ ॥ अतो मद्भजनमेव तु हेतुर्विवेकस्य मनी
षाया स्वाल्पवयस्य च फलमित्याह ॥ एषेति ॥ तामेव दर्शयति सत्यममृतं च मामाप्नुवन्नेनासत्येन मर्त्येः
न विनाशिना मनुष्यदेहेन इहास्मिन्नेव जन्मनि प्राप्नोतीति ॥ एतस्यैव बुद्धिर्मनीषा चेति बुद्धिर्विवेकः

यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत् ॥ तदायासो निरर्थः स्याद्भयादेरिव सत्तम ॥ २१
एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां ॥ यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं ॥ २२ ॥ ए
षते भिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः ॥ समासव्यासविधिना देवानामपि दुर्गमः ॥ २३
अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत् ॥ एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः ॥ २४
सुविविक्तं तव प्रश्नं मयैतदपि धारयेत् ॥ सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति ॥ २५ ॥ य ए
तन्मम भक्तेषु प्रदद्यात्सुपुष्कलं ॥ तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मना ॥ २६ ॥
स

मनीषा चातुर्यं ॥ २२ ॥ मद्वाक्यकरणार्थमुपसंहरति ॥ एष त इति द्वाभ्यां समासव्यासविधिना संक्षेपवि
स्तारप्रकारेण ॥ किं चाभीक्ष्णं तावत् ॥ ज्ञानं एतदनुसंधानकथनपठनश्रवणपराणामप्येतदेव फलं भवती
त्याह चतुर्भिः ॥ २४ ॥ सुविविक्तमिति ॥ मया सुविविक्तं दत्तोत्तरं एतद्व्याख्यानमपि यो धारयेत् अनुसं
दध्यात् ॥ ब्रह्मगुह्यं वेदेपि रहस्यं ॥ २५ ॥ सुपुष्कलं यथा भवति तथा ब्रह्मदायस्य ब्रह्मददाती तथ्यान

॥ ५८ ॥

समधीयीत उद्धवे। पवित्रं परमं शुचि। अन्येषामपि शोधकं स्वयेन शुद्धोत् ॥ २७ ॥ २८ सम्यक्ज्ञानात् अनुत्पन्नो
पुनरूपदेष्टात्मानं आत्माशुभेन पृच्छति। अपि किमुपधारितं माकल्यमाह ॥ २९ ॥ नैतदिति शठाय वंचकाय
१। स्तब्धाणाय अविनीताय यदि भक्तिः स्यात्तर्हि ब्रूयात् ॥ ३१ ॥ एतज्ज्ञानेन पुमान् कृतार्थो भवतीत्याह नैत-
दिति। अत्र दृष्टान्तमाह पीत्वेति पीयूषं स्वादु ॥ ३२ ॥ ननु संन्यासिनः कृतिज्ञेयानि तत्र तत्फलसाधनानि स-

य एतत्समधीयेत पवित्रं परमं शुचि ॥ स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् ॥ २ ॥ य एतच्छ्र-
द्धया नित्यमव्यग्रः शृणुयान्नरः ॥ मयि भक्तिं परां कुर्वन्कर्मभिर्न स बध्यते ॥ २८ ॥ अप्युद्धव त्व-
या ब्रह्म सखे समवधारितं ॥ अपि ते विगतो मोहः शोकश्चासौ मनोभवः ॥ २९ ॥ नैतत्त्वया दां-
भिकाय नास्तिकाय शठाय च ॥ अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां ॥ ३० ॥ एतैर्दोषैर्वि-
हीनाय ब्रह्मण्याय प्रियाय च ॥ साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां ॥ ३१ ॥ नैतद्विज्ञा-
य जिज्ञासोर्ज्ञातव्यमवशिष्यते ॥ पीत्वा पीयूषममृतं पातव्यं नावशिष्यते ॥ ३२ ॥ ज्ञाने कर्म-
णि योगे च वार्तायां दंडधारणे ॥ यावानर्थो नृणां तात तावांस्तेहं चतुर्विधः ॥ ३३ ॥

र्थं संन्यस्य भक्तानां भक्तस्य तु सर्वं अहमेवातो मदेकशरणो भवेत्याह ज्ञान इति ज्ञानादौ यावानर्थो मो-
दिलक्षणश्चतुर्विधार्थस्तावान्सर्वोपि तेहमेव तत्र ज्ञाने मोक्षः कर्मणि विहिते धर्मः कर्मण्येव स्वा-
भाविके तु कामः योगे त्वणिमादिसिद्धयः वार्तायां कृष्यादावर्थः दंडनीतौ वैश्वर्यमिति सिद्धैश्व-
र्ययोरपि कामान्तर्गतत्वाच्चातुर्विध्यं ॥ ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उत इत्यत आह मत्स्य इति ॥ यदा त्यक्तसमस्तकर्मा सन्नो निवेदितात्मा भवति ॥ तदा सौमे विविकीर्षितः
विशिष्टं कर्तुमिष्टो भवति ॥ ततस्त्वामस्तत्वं मोदं प्रतिपद्यमानो मयात्मभूपाय मदैक्याय मत्समानैः
श्रेयोर्थं यतियावत्कल्पते योग्यो भवतीत्यर्थः ॥ २४ ॥ अथ आदर्शितो योगमार्गो यस्मै सः ॥ २५ ॥ एवं प्रणयेनैव
तूर्णं तोभितं चित्तं धैर्येण विष्टभ्य बहुमन्यमानः ॥ आत्मानं कृतार्थं मन्यमानः ॥ २६ ॥ मयायः सोहमाः

मत्स्योऽप्यदात्यक्तसमस्तकर्मा निवेदितात्मा विविकीर्षितो मे ॥ तदामृतत्वं प्रतिपद्यमानो मया
त्मभूयाय च कल्पते वै ॥ २४ ॥ शुक उवाच ॥ स एवमादर्शितयोगमार्गस्तदुत्तमश्लोकवचो नि
शाम्य ॥ बद्धांजलिः प्रीत्युपरुद्धकंठो न किंचिदूचेश्रुपरिप्लुताक्षः ॥ २५ ॥ विष्टभ्य चित्तं प्रणया
द्वचूर्णं धैर्येण भाजन्बहुमन्यमानः ॥ कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं १८
उद्धव उवाच ॥ विद्राविता मोहमहांधकारो य आश्रितो मे तव सन्निधानात् ॥ विभावसोः किं नु स
मीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य ॥ २७ ॥ प्रत्यर्पितो मे भवतानुकंपिना भृत्याय विज्ञान
मयः प्रदीपः ॥ हित्वा कृतज्ञस्तव पादमूलं कोन्यं समीयाच्छरणं त्वदीयम् ॥ २८ ॥

श्रितस्त्वासीत्स तव संनिधाने नैव विद्राविततः प्रभवंति ॥ किं तु बाधाय समर्थो भवंति अज्ञानाद्यवस्थो
पि नर्क ॥ २७ ॥ किं च यद्यपि तव संनिधानादेव गतस्तथाप्यनुकंपिना भवता भवता विज्ञानमयः प्रदीप
प्रत्यर्पितः ॥ स्वमायया हृतः पुनः समर्पितः अतस्तव कृतज्ञो यस्त्वया कृतमनुग्रहं जानाति सः
को नाम त्वदीयं पादमूलं हित्वान्यच्छरणं समीयादाश्रयेत ॥ २८ ॥

श्री॰ भा॰ ए॰ टी॰ १४१

किंच दाशार्हादिभृत्यादेः स्वमायया स्नेहपाशः प्रसारितः स त्वयैवात्मतत्त्वज्ञानशस्त्रेण वृक्णश्छि-
न्नः ॥ ३९ ॥ एवं यदुपतिना यावदुक्तं तं तथ्यापेनाववाप्यं येन मोस्तीति अनुशाधि अनुशासितव्यं अनुशास-
नीयमाह यथेति मुकुंदावस्थानपायिनी ॥ ४० ॥ तदुक्तमोमित्यंगीकृत्य तथापि मयादिष्टो लोकसंग्र-
हार्थं येनावतकं विनाह गच्छेति बदर्यादिशेति युक्तः ॥ ४१ ॥ स्नानादेः पूर्वमेव मत्पादतीर्थोदभूताया

वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु ॥ प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना ॥ ३९ ॥ नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां ।
यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी ॥ ४० ॥ श्रीभगवानुवाच ॥ गच्छोद्धव मयादिष्टो
बदर्याख्यं ममाश्रमं ॥ तत्पादतीर्थोदके स्नानोपस्पर्शनैः शुचिः ॥ ४१ ॥ ईक्षयालकनंदाया विधूताशेषकल्मषः ॥ वसानो वल्कलान्यंग वन्यभुक्सुखनिःस्पृहः ॥ ४२ ॥ तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः ॥ शांतः समाहितधिया ज्ञानविज्ञानसंयुतः ॥ मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव ४४
अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परम् ॥ ४४ ॥

अलकनंदाया गंगायाः ॥ ईक्षया वसानः परिधानः वन्यभुग्वन्याशनभोजी ॥ ४१ ॥ द्वंद्वमात्राणां
शीतोष्णादिविषयाणां सुशीलः आर्जवादिस्वभावः ॥ ४२ ॥ मे त्वया विविक्तं सुविचारितं त्रिस्रः
त्रिगुणात्मिका गतीरतिक्रम्य ॥ ४४ ॥

राम॰ १४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हरिमेधसासंसारंहरतिमेधायस्यतेन श्रीकृष्णेन अद्वंद्वपरोपिनिर्द्वंद्वः स्वविनिष्ठोपि सुपक्रमे
निर्गमसमये॥४१॥ सुदुस्त्यजः स्नेहो यस्मिन् तेन वियोगात् कातरो भीतः॥ अतएव न परिहातुमश
क्नुवन्नातुरो विह्वलः सन् कृच्छ्रं कष्टं यथा यथा प्राप॥४२॥ ततस्तु भर्तृपादुके तेनैव कृपया दत्ते मूर्ध्नि विभ्रत्
तिनिर्बंधरूपयानदात्तयाते पुनः पुनः नमस्कृत्य ययौ अग्रे च पृष्ठतोन्वगमं भर्तुः पादविश्लेषणात्तम
स्यादितृतीयस्कंधोपक्रमोक्तानुसारेण बदरिकाश्रमं गच्छन्॥ भगवतः प्रभासयात्रामुपक्रांत्यश
ने॥ पृष्ठतो गतः सन्नुपसंहृतनिजकुलं भगवंतमेकांते दृष्ट्वा तत्कालप्राप्तेन मैत्रेयेण सह पुनः कृपया

शुक उवाच॥ स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः॥ शिरो निधाया
श्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्युपक्रमे॥४१॥ सुदुस्त्यजस्नेहवियोगकातरो नश
क्नुवंस्तं परिहातुमातुरः॥ कृच्छ्रं ययौ मूर्द्धनि भर्तृपादुके विभ्रन्नमस्कृत्य ययौ पुनः पुनः ४२
ततस्तमंतर्हृदि संनिवेश्य गतो महाभागवतो विशालां॥ यथोपदिष्टां जगदेकबंधुना तत
पः समास्थाय हरेरगाद्गतिं॥४३॥ य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भगवता प्रभाषितं
कृष्णेन योगेश्वरसेविताङ्घ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते॥४४॥

भगवतोपदिष्टेन तपसा कालक्षेपं तदा ज्ञानी यथा वितिष्ठ दृश्य विशालां बदरिकाश्रमं गतः सन् हरे
र्गतिमगात् कथंभूता तेनैव जगदेकबंधुना यथोपदिष्टां तदा मत्तस्त्वं प्रतिपद्यमानो मयात्मभूयाय य
चकल्प नैवं प्रतिवक्ष्यगतोस्मि ह्रो मामेष्यसि ततः परमित्येवमुक्तप्रकारः॥४३॥ आनंदसमुद्रोद्भ
गवदृष्टिमार्गात्तस्मिन्संभृतमेकीकृतमेतत॥ यः सच्छ्रद्धयाश्रामेवमर्शषदपि सेवित्वा वर्त्तते समुच्य
तरति किं वक्तव्यं तत्संगाज्जगदपि विमुच्यत इत्यर्थः॥४४॥॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवं कृतोपदेशं जगद्गुरुं प्रणमति भवमिति भवः संसारः भयं च जरारोगादिनिमित्तं तद्भयं निहं
ज्ञानं च विज्ञानं च भृत्यवर्गाणां यथा योग्यम् अपहर्तुं यो ऽसौ तद्वयम् उपजहे उद्धृतवान् तदेवाह
वेदसारम् एकं किं तत् ज्ञानविज्ञानरूपं च तत्सारं श्रेष्ठं च भृंगवदिति यथा पुष्पमकं पयन्नेवासौ तत
मुपसंहरति । तथा स्वपक्षकृतवेदानुसारेणैव उदधितश्चैकं तेभ्यो ऽभयं यथायथं भृत्यवर्गान्
पाययत् । तं नतो ऽस्मीति ॥४९॥ येनानुकंपितं विश्वमुद्धवप्रश्ननिर्णयैः ॥ तं वंदे परमानंदं नंदनंद

भवभयमपहर्तुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं ॥ अमृतमुदधितश्चा
पाययद्भृत्यवर्गान्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतो ऽस्मि ॥४९॥ इति श्रीभागवते एकादश स्
कंधे भगवदुद्धवसंवादे श्रीगमप्रवेशो नामैकोनत्रिंशो ऽध्यायः ॥२९॥ श्रीराजोवाच ॥ ततो महा
भागवत उद्धवे निर्गते वनं ॥ द्वारवत्यां किमकरोद्भगवान्भूतभावनः ॥१॥ ब्रह्मशापोपसंसृ
ष्टे स्वकुले यादवर्षभः ॥ प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् ॥२॥३॥४॥

नंदरूपिणं ॥५॥ इत्येकादशे एकोनत्रिंशः ॥२९॥ त्रिंशे तु प्राणपत्तिश्च मौसलक्षयतो हरेः ॥ स्वस्था
स्वगतिश्च महान्विकृत्यं संजहार निजं कुले ॥१॥ विरामाय पुराणस्यार्थं उपपत्तिं मौसले ॥ कथावसाने ततः
शेषविशेषं परिपृच्छति ॥२॥ तत इति त्रिभिः ॥१॥ ब्रह्मशापोपसंसृष्टे कुले सति अयं भावः ॥ भगवति
न हि शापः प्रभवति यादवत्वानुकरणाच्च सोपि कथं चिन्मान्यः ॥ अतः किमकरोदिति तदेव तु
उक्तं कथमत्यजदिति सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणं ॥२॥३॥४॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्स्थं वयति प्रत्याकृष्टमिति यस्मिन् रूपे लग्नं नयनं परावर्तयितुमबला न शेकुः ॥ यच्च कर्णरंध्रेण
प्रविष्टं तत्सतामात्मनि विलग्नं स्थितिं विनमिव तिष्ठति ततो न सरति न निर्गच्छति यस्य श्रीः शोभा स
कीर्त्यमाना कवीनां वाचां रतिमुल्लासविशेषं जनयति । तेषां मानं जगत्सृष्टयंतां जनयंतीति किं तु वः
कव्यपश्च विस्मयः रूपं जित्वा सर्जं नस्य श्रेष्ठस्य नं दृष्ट्वा युधिष्ठिरनास्तत्साम्यं सात्र्यं स्तंभं वृशुः प्राप्ताः ततः

प्रत्याकृष्टं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं ॥ य
च्छ्रीर्वाचां जनयति रतिं कीर्त्यमाना कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ॥ ऋ
षिरुवाच ॥ दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान् ॥ दृष्ट्वासीनान्सुधर्मायां कृ
ष्णः प्राह यदूनिदं ॥ ४ ॥ श्रीभगवानुवाच ॥ एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः ॥ मुहूर्त
मपि न स्थेयमत्र नो यदुपुंगवाः ॥ ५ ॥ उत्तिष्ठंतु यदुश्रेष्ठाः स्थानतो नात्र शिष्यते ॥ स्त्रियो बा
लाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः ॥ ६ ॥ वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ॥ ६ ॥ तत्रा
भिषिच्य शुचयः उपोष्य सुसमाहिताः ॥ देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ॥ ७ ॥ ब्रा
ह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं ॥ गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ॥ ८ ॥

तद्रूपेणात्यजदित्यन्वयः ॥ ३ ॥ दिवि सूर्यपरिवेषादीन् ॥ भुवि भूकंपादीन् ॥ अंतरिक्षे दिग्दाहादीन्महो
त्पातानादीन्स्वयमेवोत्पादितान् अन्ये तु धूमकेतुनाकाशात् ॥ ४ ॥ यमस्य केतवो बोधकाः एवमत्युसूचका इत्यर्थः
नः अस्माभिः ॥ ५ ॥ प्रत्यक्स्रोतवाहिनी ॥ ६ ॥ अभिषिच्य स्नात्वा ॥ ७ ॥ ब्राह्मणांस्तु ततः कृतशांतिका
गवादिभिः पूजयिष्यामः ॥ ८ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
भाग
पु ११
१४२

विधिः प्रतीकारः मंगलायनं च ॥ किं च द्विजदेवगवां पूजाउद्धव इह एव तु देवलोके परमउद्भवो भवि-
ष्यतीति भावः ॥१०॥ मधुद्विषो वाक्यमाकर्ण्य तथेत्यभिनिपत्यउत्तीर्य समुद्रं ॥११॥ सर्वश्रेयोपबृंहितमि
त्यत्रसर्वविघातैः भगवनाऽऽक्रैरपि सर्वैः श्रेयोभिः संहितवक्रः ॥१२॥ पीयततइतिपानं मैरेयकं मदिरा

विधिरेषह्यरिष्टघ्नोमंगलायनमुत्तमं ॥ देवद्विजगवांपूजा भूतेषुपरमोभवः ॥१०॥ इतिसर्वे
समाकर्ण्यपयदुवृद्धामधुद्विषः ॥ तथेतिनौभिरुत्तीर्यप्रभासंप्रययूरथैः ॥११॥ तस्मिन्भ-
गवतोदिष्टंयदुदेवेनयादवाः ॥ चक्रुःपरमयाभक्त्यासर्वश्रेयोपबृंहितं ॥१२॥ ततस्तस्मि
न्महापानंपपुर्मैरेयकंमधु ॥ दिष्टविभ्रंशितधियोयद्द्रवैर्भ्रश्यतेमतिः ॥१३॥ महापा-
नाभिमत्तानांवीराणांदृप्तचेतसां ॥ कृष्णमायाविमूढानांसंघर्षःसुमहानभूत् ॥१४॥ यु
युधुःक्रोधसंरब्धावेलायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥
१५॥ रामायनमः ॥ ॥

विशेषंमधुसुरसंदिष्टेनदैवेनविभ्रंशितधियः ॥ नत्वन्यथा तुस्मिन्स्थानेतदुचितमितिभावः
यस्यद्रवैरसैः ॥१३॥ कृष्णमायाविमूढानामित्तिमुख्योहेतुः ॥ संघर्षः कलहः ॥१४॥ ततो
युयुधुरित्यादि ॥१५॥ ॥ राम ॥ ॥

राम
१४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पतंत्यरतस्ततस्तुलंत्यः पताकाश्चेषु ते ॥ वृष्ण्यादिभिर्मिथः समेत्य हन्येन नयच्चन्निर्न्यस्थः दद्विंदंते
दिव ॥ १४ ॥ मिथः समेत्येत्य सप्रपंचः प्रद्युम्नेन्यादिवतभिः ॥ गदोक्रूरसप्रभानेकः पुत्र गापरस्तो
लुमित्रास्तरथ्याविनिर्देशमार्षं श्रुतरथनामावाक स्थित ॥ १९ ॥ मदंशेनमदनमसावलोकाः
दिताः ॥ १७ ॥ दाशार्हादयोनवतत्रद्वंष्याः ॥ अर्बुदामाथुराः शूरसेनाश्च तत्रदेशीयाः ॥ १८ ॥ आर्त

पुनस्त्वनाकैरथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः समेत्याश्वतरैः सुरु
मदान्यहन्नपृषैर्दद्विविहिपावने ॥ १९ ॥ प्रद्युम्नसांबौयुधिष्ठिरमत्सरावक्रूरभोजावनि-
रुद्धसात्यकी ॥ सुभद्रसंग्रामजितौसुदारुणौगदौसुमित्रासुरथौसमीयतुः ॥ २० ॥ अन्ये
चयेवैनिशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्योन्यमासाद्य मदांधका
निनाजघ्नुरुद्धतुरेणविमोहिताभृशं ॥ २१ ॥ दाशार्हवृष्ण्यंधकभोजसात्वतामध्वर्बुदामाथुर
शूरसेनाः ॥ विसर्जनाःकुकुराःकुंतयश्चजघ्नुर्मिथस्तेत्यविसृज्य सौहृदं ॥ २२ ॥ पुत्राःस्त्वयु
ध्यन्पितृभिर्भ्रातृभिः स्वस्रीयदौहित्रपितृव्यमातुलैः ॥ मित्राणिमित्रैःसुहृदःसु
हृद्भिर्ज्ञातींस्त्वहन्ज्ञातयएवमूढाः ॥ २३ ॥ शरेषुहीयमानेषुभज्यमानेषुधन्वसु श
स्त्रेषुक्षीयमाणेषुमुष्टिभिर्जह्रुरेरकाः ॥ २४ ॥ तावज्रकल्पाह्यभवन्परिघामुष्टिनाभृताः
जघ्नुर्द्विषस्तैःकृष्णेनवार्यमाणास्तुतेचते ॥ २५ ॥ प्रत्यनीकंमन्यमानाबलभद्रंचमोहिताः
हन्तुंकृतधियोराजन्नाततायिनः ॥ २६ ॥

भिस्युनि आद्यादिशत्वानांसप्रतियोगिवाविन्राद्धा तरोमावला इत्यादिनेयं मित्रैः सु मित्राणि
च अहन्नहनवंतः ॥ १५ ॥ पंचसुपथतः पुनःकुनेगदकुः ॥ २ ॥ परिवालोहतदडाः भूताःरनाः तनश्च श्री
कृसमपिप्रत्यनीकं प्रतिपत्त ॥ २६ ॥ २२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एरकामुष्टिरेव परिघौ उद्यम्य ॥ २३ ॥ स्पर्धानिमित्तः क्रोधः कुलं क्षयं निन्ये ॥ २४ ॥ २५ ॥ पौरुषं योगं
परमपुरुषध्यानलक्षणं तमेवाह संयोज्येति मानुष्यं लोकं भूलोकं मनुष्यरूपतां वा ॥ २६ ॥ धरोप-
स्थे भूतले ॥ २७ ॥ भ्राजिष्णुरूपं ॥ २८ ॥ तदेवानुवर्णयति श्रीवत्सांकमिति चतुर्भिः ॥ २९ ॥ सुंदरस्मितं वक्-

मुघलावपि संक्रुद्धा उद्यम्य कुरुनंदन ॥ एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि ॥ २३ ॥ ब्र
ह्मशापोपसृष्टानां कृष्णमायावृतात्मना ॥ स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोग्निर्यथा वनं ॥ २४ ॥ ए
वं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः ॥ अवतारितो भुवो भार इति मेने वशेषितः ॥ २५ ॥ रामः
समुद्रवेलायां योगमास्थाय पौरुषं ॥ तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि ॥ २६
रामनिर्याणमालोक्य भगवान्देवकीसुतः ॥ निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं ॥ २७
बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया ॥ दिशो वितिमिराः कुर्वन्विधूम इव पावकः ॥ २८
श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसं ॥ कौशेयांबरयुग्मेन परिवीतं सुमंगलं ॥ २९
सुंदरस्मितवक्त्राब्जं नीलकुंतलमंडितं ॥ पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ॥ ३०
कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः ॥ हारनूपुरमुद्राभिः कौस्तुभेन विराजितं ॥ ३१
वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं ॥ ३२

त्राब्जं यस्मिंस्तत् पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिन् ॥ ३० ॥ ३१ ॥ वनमालया परीतान्यंगानि
यस्मिंस्तत् ॥ निजायुधैः उपरीतांगं पंकजारुणं वामं पादं दक्षिणे ऊरौ कृत्वा आसीनं रूपं बिभ्रत् ॥ ३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नरान्नामकश्विलजबकोमृगस्तुसंगतस्यास्यमिवाकारोभ्यस्यन्तं वरणे ॥ ३१ ॥ ३२ ॥ ब्रह्मशापहतं नमेनत्वाप
राधरनिवेदतत्र्याह ॥ यस्यतवात्मयोगरविंतं स्वाधीनमाय्यारविंतं विस्मिताः अस्यतनयाकृद्रादयस्त्वयेवा
वेमिमांयनयावेदद्दृष्टारस्तेपिनविदुः तस्यते अविंममाय्यस्यपतद्ब्रह्मशापादिअजसानिस्त्वयंअसहन

मुसत्वाभुशोषायः स्वेडहतनेमुक्तेंबकोजरा ॥ मृगस्याकारवरणं विमायमृगशोकया ॥ ३२
चवभंजनंतपुरुषेहद्गृह्यात्मकृतकिल्बिषः ॥ भीतः पपातशिरसापादयोरस्तुरद्विषः ॥ ३३
अजाननाहृतमिदं पापेनमधुसूदन ॥ तंतमर्हसिपापस्य उत्तमश्लोकमेनच ॥ ३४ ॥ यस्यात्र
स्मरणंन्नृणामज्ञानध्वांतनाशनं ॥ वदंतितस्यतेविष्णोमयासाधुहृतंप्रभो ॥ ३५ ॥ तन्माशु जहि
वैद्यावपापानेमृगलुब्धकं ॥ यथापुनरहं त्वेवंनकुर्यांसदतिक्रमे ॥ ३६ ॥ यस्यात्मयोगर
चितंनविदुर्विरिंचोरुद्रादयोस्यतनयाः पतयोगिरांये ॥ त्वन्मायमयापिहितदृष्टयएतदंजः
किंतस्यतेवयमसद्गतयोगृणीमः ॥ ३७ ॥ श्रीभगवानुवाच ॥ माभैर्जरेत्वमुत्तिष्ठकाममेषकृ
तोहिमे ॥ याहितंमदनुज्ञातं स्वर्गसुकृतिनांपदं ॥ ३८ ॥ श्रीशुकउवाच ॥ इत्यादिष्टोभगवता
कृष्णेनेच्छाशरीरिणा ॥ त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ ॥ ४० ॥ दारुकः कृष्णपदवी
मन्विच्छन्नाधिगम्यतां ॥ वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ ॥ ४१ ॥ ॥

यः पापयोनयोन्यंकिंस्मरणीमः कथंवर्ण्याममः ॥ इतियावत ॥ अतस्तदास्तां आशुत्वरितं मामेवापरा
धकारिणं लापकर्माणं महापराधकृतंजहीतिभावः ॥ ३७ ॥ इच्छाशरीरेणान्यस्यायंभावः ॥ ३९ ॥ मुद्गस्वेन म
यीनिजंशरीरं निमंतर्धाय तत्स्वनिष्ठमेवं विदं वनमात्रमितिपततदेवसक्तवीकरिष्यतिदेवादयोत्रस्यस्तु

[illegible] ५ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री० भाग० एका० १६५

तं पृतिनं च दृष्ट्वा तस्य पादयोर्निपपात ॥ ४२ ॥ उदीक्षमाणस्य सूतस्य सतः ॥ ४४ ॥ ४६ ॥ निर्याणं योगमार्गेण ॥ ४७ ॥ मद्दशां मिनीच्छाशरीराभिप्रायेण अर्जुनावितारक्ष्यमाणः इंद्रप्रस्थं गमिष्यथेति वक्ष्यतीति

तेन च ति स्मपुनिराद्यपैर्हतेनस्वचान्यम स्वेच्छकृतकेतनं पतिं ॥ स्नेहदृष्टनात्मा निपपात तत्पादयोरथ्यादवषुत्सवाष्पलोचनः ॥ ४२ ॥ अपश्यतस्त्वच्चरणांबुजं प्रभो दृष्टिः प्रनष्टा तमसि प्रविष्टा ॥ दिशो न जाने न लभे च शांतिं यथा निशायामुडुपे प्रनष्टे ॥ ४३ ॥ इति ब्रुवति सूते वै रथो गरुडलांछनः ॥ खमुत्पपात राजेंद्र साश्वध्वज उदीक्षितः ॥ ४४ ॥ तमन्वगच्छन्दिव्यानि विष्णुप्रहरणानि च ॥ तेनातिविस्मितात्मानं सूतमाह जनार्दनः ॥ ४५ ॥ गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः ॥ संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां ॥ ४६ ॥ द्वारकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः ॥ मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ॥ ४७ ॥ स्वं स्वं परिग्रहं सर्वे आदाय पितरौ च नः ॥ अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ ॥ ४८ ॥ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः ॥ मन्मायारचनामेतां विज्ञायोपशमं व्रज ॥ ४९ ॥ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः ॥ तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ॥ ५० ॥ इति श्रीभागवते एकादशे त्रिंशोध्यायः ॥ ३० ॥

टीका ९

पूर्वेणान्वयः ॥ ४८ ॥ मन्मायारचनामेतां विज्ञायेति निजश्रीमत्तैरंतर्हितत्वात् यशोकं मा कुर्वित्यर्थः ॥ ४९ ॥ ऊलस्य विनष्टत्वात् दुर्मनाः ॥ ५० ॥ इति श्रीभावार्थे एकादशे त्रिंशोध्यायः ॥ ३० ॥

राम० १६५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पकं विशोसंकथामज्ञामभगवानितः ॥ तमेवानुययुः प्रीत्या वसुदेवादयस्ततः ॥ देवाग्रदूविथाया
दोभूयो देवान्विथाभ्व ॥ श्रीशुकः ॥ स्वेच्छया धामस्वतनैव समाविशन ॥ मुनयः सनकादयः ॥ प्रजेश्वरा
मरीच्यादयः द्विजा गरुडलोकवासिनः पतिताः मैत्रपादयो वा भगवतो निर्याणं द्रष्टुकामाः सन्तः परमो
त्सुकाः सन्तः तत्रागमन ॥ ४ ॥ तेषामौत्सुक्यकृतं महोत्सवमाह साद्धेन गायन्तस्तुति ॥ ३ ॥ विभूतीः इन्द्रादीन्
पद्मनेत्रे न्यमीलयदित्यस्यायं भावः ॥ पूर्वं ब्रह्मादिभिः सलोकांल्लोकपालान्नः पाहि वैकुण्ठकिङ्करानिति प्रा
र्थितत्वादिदानीं च स्वसंलोकं प्रतिनेतुमागतत्वाद् हृष्ट्वा जनेषु दाक्षिण्यान्नेव ययिन्तु समाधिमिव कुर्वन्नेत्रे
न्यमीलयदिति ॥ ५ ॥ योगिनामिव स्वच्छन्दमृत्युमेवारयति ॥ ५ ॥ लोकाभिराममिति त्र्यर्थम् ॥ योगिनो
श्रीशुक उवाच ॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः ॥ महेन्द्रप्रमुखा देवा मुनयः सप्रजेश्वराः
पितरः सिद्धगन्धर्वा विद्याधरमहोरगाः ॥ चारणा यक्षरक्षांसि किन्नराप्सरसो द्विजाः ॥ २ ॥ द्रष्टुकामा
भगवतो निर्याणं परमोत्सुकाः ॥ गायन्तश्च गृणन्तश्च शौरेः कर्माणि जन्म च ॥ ३ ॥ ववृषुः पुष्पवर्षा
णि विमानावलिभिर्नभः ॥ कुर्वन्तः संकुलं राजन्भक्त्या परमया युताः ॥ ४ ॥ भगवान्पितामहं वीक्ष्य वि
भूतीरात्मनो विभुः ॥ संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ॥ ५ ॥ लोकाभिरामां स्वतनुं धार
णाध्यानमंगलं ॥ योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकं ॥ ६ ॥ ॥
हि स्वच्छन्दमृत्यवः ॥ स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकान्तरं प्रविशन्ति ॥ भगवांस्तु न तथा ॥ किं
त्वदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुण्ठमविशत् तत्र हेतुः लोकानामभिरामः ॥ अभितो रम
णास्थितिर्यस्यां तां जगदाश्रयत्वेन जगतोऽपि दाहप्रसङ्गादित्यर्थः ॥ किञ्च धारणाध्यानस्य मंगलं शोभनं
विषयं द्रुत न तथा तयोर्निर्विषयत्वं स्यात् दग्ध्वने चायाप्युपासकानां तथैव तद्रूपसाक्षात्कारः फलत्वाभि
प्रेतिभावः ॥ इच्छाशरीराभिप्रायेणवा यथाग्न्यनमेवास्तु न चापि लोकाभिरामामित्यादि विशेषणाना
मानर्थक्यप्रसङ्गाद् दर्शितप्रदर्शया अनिरोधाय निर्गतत्वमेव साम्प्रतम् ॥ ५ ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदा तं स्वं स्वमेव लोकमागमिष्यतीति संभ्रमेण देवादिकृतः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादिस
न्मानो वा भवदित्याह । दिवीति भूमेः सकाशात्तं श्रीकृष्णमनुययुः ॥ ७ ॥ तदा श्रीकृष्णे अंतर्हिते सति
कुतो गत इति वितर्कयंतोपि ब्रह्मरुद्रादयो देवादयः ॥ स्वधामनि विशंतं श्रीकृष्णं न ददृशुः ॥ तत्र हेतुः
अविज्ञातगतिमिति क्वचित् । कृचिद्ददृशुश्च न तोति विस्मिताश्च बभूवुरित्यर्थः ॥ ८ ॥ अविज्ञातगतित्वे
दृष्टांतेन समर्थयति सौदामिन्या गतिर्यथा मर्त्यैर्न लक्ष्यते देवैस्तु लक्ष्यते तथा भूमंडलं हित्वा गच्छतः

दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात् ॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानुतं ययुः ॥ ७
देवादयो ब्रह्ममुख्या न विशंतं स्वधामनि ॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥ ८
सौदामिन्या यथाकाशे यांत्या हित्वाभ्रमंडलम् ॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः
ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः ॥ विस्मितास्तां प्रशंसंतः स्वं स्वं लोकं ययुस्तदा ॥ १०
राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य । ॥ । ॥ । ॥

श्रीकृष्णस्य देवैरपि न लक्ष्यते किंतु तत्पार्षदैरेवेत्यर्थः ॥ ९ ॥ अभिप्रायापरिज्ञानतः प्रथमे क्षिप्तं
दृष्टांतेन सपरिकरं दृष्ट्वा पुनस्तमेवार्थं प्रपंचयति । राजन्निति त्रिभिः ॥ परस्य सर्वकारणस्य तनु
भृत्सु यादवादिषु जनना प्ययेहा ॥ आविर्भावतिरोभावचेष्टा मायया अंतःकरणमात्रस्य वै हित्वा
यथा विकृतरूपवनाना रूपैर्जन्मादीन्विडंबयति नटस्तद्वत् ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्र विहृत्य क्रीडित्वा अंते प्रलये संहृत्य च २

व २

अभ्यासेनावयावादेवादिषु जन्माद्यशंकायावद्विषमसंगतिरेवाथादिष्वसौ विष्णुरेतपवास्त इत्याह स्रष्ट्वेति आ
त्म ॥ नात्स्वयमेवेदं जगत्स्रष्ट्वा अंतर्यामित्वेनानुविश्य आत्ममहिम्ना स्वमहिम्नि उपरतं सन्नास्ते ॥ ११ ॥ न
पुनरन्यस्यामंतव्यं यतोस्मिन्नेवावतारे तत्स्वभावनिरति तयोच्यत इत्याह ॥ मर्त्येनेति यमेन स्वलोकं प्र
तिनीतं गुरुसुतं मर्त्येन तेनैव शरीरेण य आनयत् ॥ आनीतवान् शरणदः शरणागतरक्षकः त्वां
च ब्रह्मास्त्रदग्धं यो रक्षितवान् ॥ यश्चांतकानामंतकमपि ईशं श्रीरुद्रं बाणसंग्रामे जितवान् मृगयुं लु
ब्धकं सः स्वर्गं अनयत् नित्यं असौ स्वावने स्वरक्षणे अनीशः असमर्थः किं ॥ १२ ॥ ननु यदि स मर्त्यस्तर्हि

स्रष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिमोपरतः स आस्ते ॥ ११ ॥ मर्त्येन यो
गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं ॥ जिग्येंतकांतकमपीशमसा
वनीशः किं स्वावने स्वरनयन्मृगयुं सदेहं ॥ १२ ॥ तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतु
र्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥ १३ ॥

किं चिरकालमत्रैव तेन वपुषा किं नातिष्ठत् ॥ तत्राह तथापीति यद्यपि उक्तप्रकारेण अशेषस्य जगतः
स्थित्यादिषु अनन्यहेतुर्निरपेक्षतया एवं कारणं स्वयं यद्यस्मादशेषशक्तिधृक् ॥ तथापि यादवान् संहृत्य निज
वपुः ॥ अत्र शेषितं अवशेषितं प्रणेतुं कर्तुं नैच्छत् किं तु स्वमेव लोकमनयत् तत्र हेतुः ॥ मर्त्येन देहेन किं न कि
चित् कार्यमिति स्वस्थानामात्मनिष्ठानां दिव्यां गतिमेव प्रकर्षेण दर्शयन् अन्यथा तेपि दिव्यां गतिं मना
हृत्य योगबलेन देहसिद्धिं विधायात्रैव वर्तेयन्ते तन्माभूदित्येतदर्थमिति भावः ॥ १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री। भाग। पुरी। ४७

एतान्नुक्तमप्रकारांकथितमप्रपंचोपदवींगतिं ॥१४॥ ततोदेवंभगवतास्वलोकंगच्छतावसुदेवादीना
मपितत्स्थानप्राप्त्युपायः किंतितत्राप्तीत्यमाह दारुकइत्यादिनायतः कृष्णविच्युतः भगवद्विरह
मापन्नः ततोलोकोद्भवनेशंतुनासिंचदित्यर्थः ॥१५॥१६॥ कृष्णरामौसुतानावपश्यंतः ॥२०॥२१॥ सदुक्ति

यएतांप्रातरुत्थायकृष्णस्यपदवींपरां ॥ प्रयतःकीर्तयेद्भक्त्यातामेवाप्नोत्यनुत्तमां ॥१७
दारुकोद्वारकामेत्यवसुदेवोग्रसेनयोः ॥ पतित्वाचरणावस्रैर्न्यषिंचत्कृष्णविच्युतः ॥१८
कथयामासनिधनंवृष्णीनांकृत्स्नशोनृप ॥ तच्छ्रुत्वोद्विग्नहृदयाजनाःशोकविमूर्छि
ताः ॥ तत्रस्मत्वरिताजग्मुःकृष्णविश्लेषविह्वलाः ॥ व्यसवःशेरतेयत्रज्ञातयोघ्नंतआ
ननं ॥१९॥ देवकीरोहिणीचैववसुदेवस्तथासुतौ ॥ कृष्णरामावपश्यंत्यःशोकार्तावि
जहुःस्मृतिं ॥२०॥ प्राणांश्चविजहुस्तत्रभगवद्विरहातुराः ॥ उपगुह्यपतीन्स्तातचितामारु
रुहुःस्त्रियः ॥२१॥ रामपत्न्यश्चतद्देहमुपगुह्याग्निमाविशन् ॥ वसुदेवपत्न्यस्तद्गात्रं
प्रद्युम्नादीन्हरेःस्नुषाः ॥२२॥ कृष्णपत्न्योविशन्नग्निंरुक्मिण्याद्यास्तदात्मिकाः ॥ अर्जु
नःप्रेयसःसख्युःकृष्णस्यविरहातुरः ॥२३॥ आत्मानंसांत्वयामासकृष्णगीतैःसदुक्तिभिः
बंधूनांनष्टगोत्राणामर्जुनःसांपरायिकीं ॥२४॥ हतानांकारयामासयथावदनुपूर्वशः
क्रियाश्चकारविधिवत्कृष्णस्यस्नेहविह्वलः ॥२५॥

अ१ यो२
भिः सत्यैर्वितथ्योक्त्येयेषुतैः ॥ अहंप्रकाशः सर्वस्ययोगमायासमावृतः ॥ मूढोयंनाभिजाना
तिलोकोमामजमव्ययं इत्यादिभिः ॥२१॥ नष्टगोत्राणांनष्टसंततीनांसांपरायिकीं पिंडोदकादि
कांक्रियां ॥२२॥२३॥२४॥ राम ॥

राम। ४७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰
भा॰ ए॰
ए॰ टी॰
१४८

आदितआरभ्यकृष्णचरितकीर्तनस्यफलमाह॥ यएतदितिद्वाभ्यां॥ २७॥ शंतमानिपरममंगला
निपरमहंसगतौश्रीकृष्णे॥ २७॥ २८॥ एवमेकादशस्कंधभावार्थस्यप्रदीपिका॥ स्वात्मानंदरतैर्भीः

द्वारकांहरिणात्यक्तांसमुद्रोप्लावयत्क्षणात्॥ वर्जयित्वामहाराजश्रीमद्भगवदालयं॥ २३॥
नित्यंसन्निहितस्तत्रभगवान्मधुसूदनः॥ स्मृत्याशेषाशुभहरः सर्वमंगलमंगलः॥ २४॥
स्त्रीबालवृद्धानादायहतशेषान्धनंजयः॥ इंद्रप्रस्थंसमावेश्यवज्रंतत्राभ्यषेचयत्॥ २५॥
श्रुत्वासुहृद्वधंराजन्नर्जुनात्तेपितामहाः॥ त्वांतुवंशधरंकृत्वाजग्मुः सर्वेमहापथं॥ २६॥
यएतद्देवदेवस्यविष्णोःकर्माणिजन्मच॥ कीर्तयेच्छ्रद्धयामर्त्यः सर्वपापैःप्रमुच्यते॥ २७॥
इत्थंहरेर्भगवतोरुचिरावतारवीर्याणिबालचरितानिचशंतमानि॥ अन्यत्रचेहचश्रु
तानिगृणन्मनुष्योभक्तिंपरांपरमहंसगतौलभेत॥ २८॥ इतिश्रीभागवतेमहापुराणे
एकादशस्कंधेवैयासक्यांपरमहंससंहितायांअष्टादशसाहस्र्यांश्रीभगवदुद्धवसं
वादेमौसलोपाख्यानेएकत्रिंशोध्यायः॥ ३१॥ ॥

तेनश्रीधरेणप्रकाशिता॥ १॥ इतिश्रीभावार्थदीपिकायामेकादशस्कंधेएकत्रिंशोध्यायः॥ ३१॥
समाप्तोयमेकादशस्कंधः संपूर्णः॥ ॥ ॥ ॥ राम ॥ ॥ ॥ ॥

राम।
१४८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एकादशसमाप्तः ११

॥ ३५ ९२७ ५ —

=३/८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative